178/XXVIII
9.94

994

994

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 1

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५५ जय - कन्या [सं १

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

SEPTEMBER 1954

427

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription **Rs. Two only.**

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D.T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥


1 श्रीराघवेन्द्रचरितामृतम् ।
2 वरदाभ्युदयचम्पूः ।
3 मुकुन्दमाला ।
4 राष्ट्रभाषा ।
5 कश्चन ज्यौतिषिकः
6. प्रकृतिभेदः ।
7 पुस्तकपरामर्शः ।

सस्यं च सर्वत्र समृद्धिमागा-
द्यत्रैष यात्रामगमद्यतीन्द्रः ॥ ६३ ॥

प्रासूत वन्ध्या तनयं मनोज्ञं
व्यङ्गोऽभवत् सङ्गतकोमलाङ्गः ।
अकिञ्चनोऽविन्दत काञ्चनाद्रिं
यतीशितुस्तस्य तपःप्रभावात् ॥ ६४ ॥

भुक्तिप्रियान् पायसभक्ष्यभोज्यै-
र्भक्तिप्रियान् कृष्णकथाप्रसङ्गैः ।
मुक्तिप्रियान् सात्वततत्ववादैः
सन्तर्पयामास जनान् यतीन्द्रः ॥ ६५ ॥

स ज्ञानभासा जगदुद्दिधीर्षु-
श्चचार तीर्थाटनकैतवेन ।
गुरुर्गुरूणां हि परार्थ एव
न स्वार्थकामा यतयो भवन्ति ॥ ६६ ॥

दृष्ट्वा यतिं तं तपसा ज्वलन्तं
विद्याविलासस्पृहणीयशोभम् ।
वाचा मृदुं वाग्मिवरं वरेण्यं
जना बभूवुः पुलकाञ्चिताङ्गाः ॥ ६७ ॥

आलोकशब्दं समुदीरयन्तो
मतान्तरीया अपि योगिवर्यम् ।
प्रत्युद्गता भक्तिभरावनम्राः
समाजयन्ति स्म पुरः पतन्तः ॥ ६८ ॥

---

६८ आलोकशब्दम्– जयशब्दम् ।

विद्यासु सर्वासु विचक्षणस्य
कुशाग्रबुद्धेः कुशलस्य वाचि ।
तस्याभवत् कर्कशतर्कशास्त्रं
क्रीडाङ्गणं संश्रितवादकेलेः ॥ ६९ ॥

कृतेऽमुना संसदि पूर्वपक्षे
तदीयवाग्वैभवसंश्रवोत्थम् ।
आनन्दबाष्पं प्रतिवादिवर्ग-
स्तस्योत्तरं निर्वचनं चकार ॥ ७० ॥

स भैरवादीनपरैरधृष्यान्
विजित्य वादेष्वमितप्रभावः ।
सम्माननामाप विवादगोष्ठ्यां
क्षितीश्वराद्वल्लभराजधान्याः ॥ ७१ ॥

कृताप्लवान् व्याकरणाम्बुराशा-
वाचान्तशब्दाम्बुनिधिः स भिक्षुः ।
प्साधातुसम्बन्धिनि यङ्लुगन्ते
विजित्य विस्माययति स सभ्यान् ॥ ७२ ॥

क्रोधं न वादेषु चकार योगी
न चाप्यनर्थं वचनं बभाषे ।
न जातु वैतण्डिकतामवापत्
प्रोचे सदा सस्मितमेव वाक्यम् ॥ ७३ ॥

वचोमुखं तस्य निशम्य रम्यं
तत्वामृतस्यन्दि गभीरभावम् ।

शिरांसि भक्त्या धरणौ निधाय
नमांसि सभ्या व्यदधुः सभासु ॥ ७४ ॥

नानाप्रकारैर्मतजातिभेदै-
र्भिन्नानसौ नैजपदाब्जसक्तान् ।
कृत्वा निजानुग्रहभाजनानि
समुद्धारोद्धृतशोकशल्यान् ॥ ७५ ॥

लोकस्य भक्तिं कनकस्य मुक्तिं
देसायिनो वंशकरं च पुत्रम् ।
दत्वा यतिः सर्वजनाभिवन्द्यं
परार्ध्यमुच्चैःपदमध्यरुक्षत् ॥ ७६ ॥

स वैद्यशास्त्राम्बुधिपारदृश्वा
जनाननेकानुपतापभाजः ।
उल्लाघतां प्रापयति स्म सद्यो
लोकोत्तरैश्चित्रफलैः प्रभावैः ॥ ७७ ॥

यो यो गदः स्याद्भिषजामसाध्यः
सर्वोऽप्यसावस्य यतेः सुसाध्यः ।
नारायणो वैद्यवरो यदस्य
जागर्त्युपान्ते सततप्रमत्तः ॥ ७८ ॥

यात्राप्रसङ्गाद्यतितल्लजोऽयं
रौप्यासनं प्राप्य समुत्कचेताः ।
स्वीयाः कृतीः कृष्णपदारविन्दे
समार्पयद्भक्तियुतान्तरङ्गः ॥ ७९ ॥

प्रशान्तगम्भीरनिवेशरम्यं
मन्त्रालयं मन्त्रविदन्ततोऽसौ ।
सम्प्रापदेकान्तनिवासहेतो-
र्यादोनिशाजेन कृतावलम्बः ॥ ८० ॥

पुरा मुरारिं यजता हि यत्र
प्रह्लादराजेन मखो व्यतानि ।
मन्त्रालयः सोऽयमशेषवन्द्य-
स्तेनाधुना भूषितभूमिभागः ॥ ८१ ॥

त्रेतायुगे यत्र हि रामभद्रो
विश्रान्तवान् श्रान्ततनुर्मुहूर्तम् ।
विनिर्मितं तेन शिलाचयेन
वृन्दावनं पावनमेतदिन्धे ॥ ८२ ॥

वृन्दावनेऽस्मिन् जनवृन्दवन्द्ये
नृसिंहमुख्यप्रतिमाभिरामे ।
भूत्वा हरिध्यानपरो यतीशः
प्रसादयत्याश्रयतो जनौघान् ॥ ८३ ॥

शाखावतां वेदमहीरुहाणां
माध्वं मतं पक्वफलायमानम् ।
आस्वादयन् स्वादुरसं खगोऽसौ
वृन्दावनं नीडमलङ्करोति ॥ ८४ ॥

कलौ युगेऽस्मिन् विरतप्रचारं
धर्मं पुनः स्पष्टमनाः कृतादौ ।

८४ शाखावताम्– इदं वेदानां महीरुहाणां च विशेषणम् ।

## अथ द्वितीयो विलासः ।

अथ कोपवतीं सरस्वतीं तामपहायैव चिकीर्षुमश्वमेधम् ।
अवलोक्य मुनीन्द्रबृन्दमारादरविन्दासनमेवमाचचक्षे ॥ १ ॥

**हे भगवन्!** विधातस्सर्वदा दुर्वारकोपा नोपागमिष्यति सरस्वती । ततस्सावित्र्यादिपत्न्यन्तरसमेतो भवानत्र चिकीर्षितं क्रतुमारब्धुमर्हतीति । तथैवेति तामरसभूरप्यभ्युपगम्य तमध्वरं सावित्र्यादि[1]संयुतो निराशङ्कस्सङ्कल्पयामास ।

अथानुतिष्ठन् हयमेधदीक्षामभ्यागतानध्वर[2]दर्शनाय ।
सुरासुरान् मानयितुं विधाता धरासुरान् धर्मविदो[3]न्ययुङ्क्त ॥ २ ॥

पत्युःप्रजानां परमाज्ञया तत्सभासदस्साधु सभाजयन्तः ।
भूमीसुरा भूरितरां सपर्यां विशेषतस्ते त्रिदशेषु तेनुः ॥ ३ ॥

[4]सुपूजनेनावमतास्सुधाभुजां सर्वेऽपि दैत्यास्सदसस्स्वयंभुवः ।
तत्त्वावबोधादरतस्तिरस्कृताश्चित्तादहम्हा इव निर्गता बहिः ॥ ४ ॥

अनन्तरममरबृन्दमवमन्तुकामा भीमा दैत्यस्तोमा अञ्जामाय मतिमारचयामासुः । तांश्च संयते यतमानान् कार्याकार्यविवेचनो विरोचनो वचन[5]मिदमवोचत । भो भोः पूर्वदेवाः! अनालोचितरुचिर[6]मचिरमनर्थोदर्कममुं सन्नाहमुपजहतु भवन्तः ।

तथाहि —

सहसा कुर्वतां कर्म शर्महानि[7]रसंशया ।
सुलभा शलभानां शुग्वह्निमह्नाय विन्दताम् ॥ ५ ॥

असाध्ये यतमानोद्राग[8]नालोच्य निजं बलम् ।
उपलं बालकस्तुङ्गमुद्धरन्निव खिद्यते ॥ ६ ॥

---

1 संयुक्तो 2 दर्शनार्थं 3 अन्वयुङ्क्त 4 संपूजनेन 5 मेव
6 अचिरमिति क कोशे नास्ति 7 असंशयमिति मुद्रितपुस्तके
8 अविविञ्चन्(क) अविज्ञाय(ख) । (अत्र पाठभेदाः-क, ख कोशीयाः)

प्रबलैरपि चाविचार्य कार्ये यतमानैर्वत सेव्यते विपादः ।
अविमृश्य पदं ह्रदे मदेभा ददतो ग्राहमुखे द्रुतं [1]पतन्ति ॥ ७ ॥

विकलनिजपक्षशक्ति[2]र्विचेष्टमानो जनः परबलेन ।
आकुलतामाकलयेत्कोकिलपाक इव काकलोकेन ॥ ८ ॥

प्रायेण दुर्बलमपि प्रबलावलम्बसम्पन्नमुल्बणबलोऽपि न लोप्तुमीष्टे ।
किं कुञ्जरः कथय केसरिकन्दरान्तकासारसारसकदर्थनलब्धवर्णः ॥९॥

प्रस्पर्धते जडात्मा परेण यस्तद्बलं [3]ह्यपश्यन् सः ।
कबलीक्रियते रिपुणा कलशीतनयेन सलिलराशिरिव ॥ १० ॥

यदुपायत एव साधनीयं क्रियते तत्र न विक्रमस्समर्थैः ।
वसनं दृढकण्टकेपु लग्नं कृतिभिर्न प्रतिकृष्यते बलेन ॥ ११ ॥

मध्ये निधाय कमपि क्षपयेद्विपक्षान्
साक्षाद्यदि स्पृशति तैः प्रबलैर्विनश्येत् ।
आधाय कुम्भमनलोन्तरतो जलस्य
क्वाथाय जायत इयात् क्षयमन्यथाऽयम् ॥ १२ ॥

इत्थं च निगदन्ति नीतिविदः —

प्राज्ञापचारः कुजनानुसारः प्रजाजिघांसा प्रमदैकसक्तिः ।
बालेन सख्यं बलवद्विरोधो मृत्योर्विवर्ताष्षडिमे निरुक्ताः ॥ १३ ॥

सङ्घर्षमुत्पाद्य मिथो रिपूणां भङ्गं बुधाः सङ्घटयन्ति तेषाम् ।
ग्रावोपरि ग्रावनिपातनेन ग्राव्णोर्द्वयोरप्युदिया[4]द्विभेदः ॥ १४ ॥

इदञ्चावधेयम् —

कपटेन पटेन चापिधेया विकृतिस्साधु हृदश्च वर्ष्मणश्च ।
लघुधीरिह यः प्रकाशयेत्तां लभते [5]केवलमेव लाघवं सः ॥ १५ ॥

ततश्च —

---

1 मुखं प्रयान्ति 2 विवेष्टमानः 3 बलमपश्यंश्च सः 4 द्वि भेदः
5 लाघवमेव केवलं

सकलदुरितहारी सगरक्षान्तकारी
दितिजनिचयघाती देवतापक्षपाती ।
हरिरधिहयमेधं ब्रह्मणाराध्यते त-
त्समरमिह न देवैः साम्प्रतं साम्प्रतं नः ॥ १६ ॥

परन्तु अत्रायमुपायः प्रतिभाति । अयं किल पङ्कजासनो विनैव सरस्वतीमश्वमेधेन यजते। तदुपज्ञं तस्याः क्रोधमेधयद्भिरस्माभिरध्वर-भङ्गस्सङ्घटनीयस्तन्मुखेनैव ।[1]

एतच्च वैरोचनं वचनमुचितमित्यभिनन्दन्तो दितिनन्दना अरविन्द-भवसुन्दरी सन्दर्शनाय प्रस्थाय सरस्वतीप्रतीर[2]मुपासेदुः । [3]उपसद्य च सद्य एव द्विजवेषधरा असुरा गिरान्देवतामेवं[4] तावदभितुष्टुवुः ।

[5]जय देवि सदा सर्वसदागमसमीडिते ।
जय देवि बुधानां सद्वरदे परदेवते ॥ १७ ॥

कविलोकचकोरचन्द्रिकां त्वामरविन्दासनपूर्वपुण्यशैलीम् ।
परिपीय विलोचनानि मातर्महतीं कामपि सौहितीं लभन्ते ॥ १८ ॥

सा च वाचां देवी तदीयस्तुतिप्रसन्ना किं नाम भवतामागमनप्रयोज-नमिति तानप्राक्षीत । पृष्टाश्च ते तामेवमवोचन् ।

कुमतिभिर्मुनिभिः प्रतिबोधितो वनजभूर्वनितान्तरसंयुतः ।
सवनमारभते भवतीं विना कवनमम्ब विना प्रतिभामिव ॥ १९ ॥

इमाममर्यादामसहमाना वयमेतदुदन्तं [6]भवत्यै प्रत्यावेद्य त्वन्मुखेनैव[7] तन्मखप्रत्यूहं कर्तुकामास्समागताः स्मः ।

---

1 'एष हि नीतिविदामुद्घोषः' इति वाक्यं, 'मध्ये निधाये'ति पूर्वोपात्त-श्लोकश्च अस्मिन् स्थले उपलभ्यते 'क' कोशे । पूर्वं स श्लोकः नास्ति ।
2 उपसेदुः, क पाठः । 3 ते च इति मुद्रितकोशपाठः 4 मेव तावदिति क पाठः । मे तावदिति ख पाठः । 5 इदं श्लोकद्वयं तालकोशेषु नोपलभ्यते । 6 भवतीं इति क, ग पाठः । 7 एवकारः क, ग कोश-योर्नास्ति ।

ततश्च—

मखभङ्गं विरिञ्चस्य मुखभङ्गं सुपर्वणाम् ।
कर्तुमर्हसि दृप्तानां हर्तुमर्हसि नश्शुचम् ॥ २० ॥

पत्युर्मखप्रत्यूहः कथङ्कारं करणीय इति माशङ्किष्ठाः ।

हन्तानादृत्य धातुस्सहचरि भवतीमश्वमेधः प्रवृत्तोऽ-
प्यत्यर्थं दुस्सहत्वात्प्रथितशकनया स त्वया वरणीयः ।
रोद्धव्यं वस्तु भव्योत्तरमपि निपुणैस्त्वन्यथाकारकश्चे-
दत्युष्णं पौष्णमर्हश्छिदमपि किरणं वारयन्त्यातपत्रैः ॥ २१ ॥

इत्येवमत्याग्रहिणीं दैत्यानामुक्तिमुपश्रुत्य कुपितवत्या सरस्वत्या प्राजापत्याध्वरप्रत्यूहं कर्तुमत्युल्बणवैयात्यया वेगवत्याख्यतटवत्याकारं बिभ्रत्या सह्यगिर्यधित्यकातो निर्गत्य सत्यव्रतं प्रत्याजग्मे ।

सर्वामुर्वीमुदञ्चत्तरङ्गरतरसा साधुना सा धुनाना
पातालं व्याप्नुवाना किल जलवलनैरभ्रगर्भं लिहाना ।
व्याधून्वानाऽथ नानागिरिकुलमचलं लोकमानान् पुनाना
नीरन्ध्रीभूतदिक्का सरसिजवसतेः सिन्धुरूपा पुरन्ध्री ॥ २२ ॥

तदा किल मदाकुलसुरकरटिवरकरटतटस्यन्दमानदानपूरव्यतिकरकिम्मीरितनीरतया कुलशिखरिशिखराक्रमणसमयसमुपनततदीयधातुपांसुमांसलतया च सञ्जातयमुनासरस्वतीसङ्गगङ्गाप्रवाहमोहमावहन्ती, घनतरस्यदसमुत्पाटितविविधविटपिपटलनिबिडतरुणकुसुमनिकरविसृमररसमकरन्दधाराभिः प्रवाहजवाकृष्यमाणक्षोणीधरकन्दरोत्थितकण्ठीरवकण्ठरवश्रवणकातरकलङ्कसारङ्गसमाश्वासनव्यासङ्गवेलासमुपनततरङ्गसङ्घातप्रतिघातविदलितकुरङ्गलाञ्छनमण्डलगलदमृतझरीभिश्च पुनरुक्तमाधुर्यगाम्भीर्या, सलिलोपरि परिप्लवमानहरिदश्वस्यन्दनधुरन्धरगन्धर्वक्रान्तिसन्दोहसंवलनदशाद्विगुणितविशालशैवालमाला, पतनोत्पतनोल्लसत्कल्लोलसङ्घसङ्घोषाडम्बरपरिकल्पितनिलिम्पलोकानोकहशाखाग्रनिष्पतत्पुष्पतत्याम्रेडित [1]डिण्डीरखण्डषण्डपाण्डरा, जलमध्यवल्गमानवलाहककुलान्तरसन्दृश्यमाननक्षत्रलक्षसमर्पितपुष्करपर्णाभ्यर्णवर्तिपुण्डरीकमण्डलीमोहा

1 डिण्डीरषण्डा, इत्येव तालकोशेषु ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारनिक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २८] कलि ५०५५ जय कन्या साधारण [सं १


# मुकुन्दमाला ॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्या रामा मृदुतनुलता नन्दने नापि रन्तु
भावे भावे हृदयभवने भावयेयं भवन्तम् ॥ ४ ॥

प्रसन्नेन भगवता साक्षादाविर्भूतेन 'वरं यं कञ्चन पृच्छ । ददामि' इत्यादिष्टः 'अविस्मृतिस्त्वच्चरणारविन्देऽस्तु । अयं मे वरोऽभिमतः' इति प्रार्थयाञ्चक्रे। अविस्मृतिर्नाम सततानुवृत्ता स्मृतिरेव । भगवति निरतिशयप्रीत्या सततमनुवर्तमाना स्मृतिर्भक्तिः ।

स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते । इति वचनात् । भक्तिश्च बहुफलसाधनम्। तत्र किं फलमुद्दिश्य भक्तिः प्रार्थ्यत इति भगवान् पप्रच्छ।

कुलशेखरस्य तु भक्तिरेव फलमभिमतम्, न तु तत्साध्यमन्यद् यत् किमपि । तदिदं पूर्वमेव 'एकान्तमियन्तमर्थम्' इत्यनेन सूचितम् । अथापि तत् सर्वथा अश्रुतवानिव, अनवहित इव च सन् भगवान् कस्मै फलाय भक्तिरपेक्ष्यत इति प्रश्नमकरोत् । तत्र उत्तरमधुना ब्रवीति ।

अहं तव चरणयोः द्वन्द्वं अद्वन्द्वहेतोः न वन्दे । सुखदुःखे, शुभाशुभे शीतोष्णे, मित्रामित्रे, मृदुकठिने इति लोके पुरुषैरनुभूयमानानि बहूनि द्वन्द्वानि सन्ति । यद्यप्यत्र सुखशुभशीतादीनि अनुकूलानीव भान्ति तथापि तेषां दुःखमूलत्वदुःखोदर्कत्वदुःखमिश्रत्वकृतं फल्गुत्वं निरूपयन्तो विवे-

किन: प्रतिकूलपक्ष एव तानि निक्षिपन्ति। ततः दुःखादीनामिव एषामपि निवृत्तिं कामयन्ते। एषां द्वन्द्वानां निवृत्तिः ध्वंसः अद्वन्द्वम्। अस्य हेतोः, एतद्रूपं फलं लब्धुं त्वच्चरणारविन्दद्वन्द्वमहं न वन्दे।

कुम्भीपाकं गुरुं नारकं अपनेतुमपि न वन्दे। कुम्भ्यां क्षिप्त्वा यत्र पापिनः पच्यन्ते स कुम्भीपाकः। अत एव स गुरुः अतिमात्रसुदुःसहः। अपनेतुं परिहर्तुम्।

नन्दने देवोद्याने मृदुतनुलताः रम्याः रामाः स्त्रियः अप्सरसः रन्तुं भोक्तुमपि न वन्दे।

प्राप्तुमभिलष्यमाणं फलं द्विविधं भवति — अनिष्टनिवृत्तिरूपं इष्टप्राप्तिरूपं चेति। अनिष्टं ऐहिकमामुष्मिकमिति द्विविधम्। अत्र आद्यं सांसारिकं द्वन्द्वरूपम्। अन्त्यं नरकयातनात्मकम्। इष्टं तु आमुष्मिकमेव ऐहिकस्य अत्यल्पसुखादेः अनिष्टतयैव गणनात्। एवं च ऐहिकानिष्टनिवृत्तिं वा आमुष्मिकानिष्टनिवृत्तिं वा आमुष्मिकेष्टप्राप्तिं वा फलमुद्दिश्य भगवति भक्तिमन्ये कुर्युः। अहं तु तेषु यत् किमपि फलं नापेक्षे। किं तर्हि?

भावे भावे हृदयभवने भवन्तं भावयेयम्। भावे भावे जन्मनि जन्मनि। भव इति भाव इति च एकार्थम्। यद्वा भावश्चित्तवृत्तिः। तस्यां सर्वस्यामिति। हृदयमेव भवनम्। भवतो यथासुखं वस्तुमर्हं स्थानमिति भावः। भवन्तं अखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणज्ञानानन्दैकस्वरूपत्वादिविशिष्टम्। भावयेयं ध्यायेयम्। विषयीकुर्यामिति वा।

"नन्विदं निरन्तरध्यानं भक्तिरेव। भक्त्या लभ्यं किं फलं भवतोऽभिमतमिति हि मया पृच्छ्यत।"

सत्यं तथा पृच्छ्यते। मयाऽपि तस्यैव प्रश्नस्योत्तरमुच्यते। भक्त्या लभ्यमन्यत् फलमन्ये इच्छन्तु, यदि इच्छन्ति। मम तु भक्तिरेव फलम्, न ततो व्यतिरिक्तं यत् किमपि।

हरे। भक्त्युत्पत्तिविवृद्धिविरोधिसकलपापविध्वंसनविचक्षणस्त्वम्।

---

# राष्ट्रभाषा ॥

( पण्डित सप्तर्षिदीक्षितः, कलकत्ता )

भारतवर्षे राष्ट्रभाषाया आवश्यकतां अवगच्छन्तः अस्मच्छासकाः हिन्दीभाषाया एव राष्ट्रभाषात्वं उचितमिति निश्चित्य तथैव च प्रकटीचक्रुः। तस्यैतस्य भाषाविशेषस्य तथ्यस्वरूपं राष्ट्रभाषात्वे संस्कृतस्य स्थानप्रदर्शनद्वारा यथामति इह विशदीक्रियते।

स्वतन्त्रं किञ्चन राष्ट्रं स्वकीयासु विविधभाषास्वन्यतमां सर्वजनसाधारणीं काञ्चन भाषां राष्ट्रभाषात्वेन व्यवस्थापयितुं वाञ्छतीति सहजमेतत्। एतदनुसृत्यैव अत्र अद्य हिन्दीभाषा राष्ट्रभाषात्वेन शासकैः परिगृहीता वर्तते। हिन्दीभाषायाः राष्ट्रभाषास्थानप्राप्तये योग्यता वर्तते न वेति शासकैः सम्यक् विचार्यैव सा स्वीकृतेति च उच्यते। तेषां तथा करणे प्रधानतया कारणद्वयमस्तीति केचन अभिप्रयन्ति—

1 हिन्दीभाषायाः सारल्यम्।
2 अस्मद्देशे तस्याः बहुजनभाषितत्वेन सुगमत्वं चेति।

तत्र प्रथमं कारणमसङ्गतमेव। 'अनभ्यासे विषं विद्या' इति केनचिन्महात्मना उक्तम्। यदि काचन विद्या अनभ्यासे सति विषमिव स्यात् तर्हि तदेतदभियुक्तवचनं नूतनभाषाभ्यासे अधिकतरं युज्यते। स्वमातृभाषां विहाय सर्वोऽपि मनुष्यः भाषान्तराभ्यासं कठिनमेव मन्यते। यदि भाषान्तराभ्यासे काठिन्यं केनचिन्नाङ्गीक्रियेत तर्हि तत्र निश्चितं विशिष्टं कारणं स्यात्। द्राविडः कश्चित् विद्यारम्भसमयादारभ्य उद्योगावाप्तिपर्यन्तं आङ्गलभाषाभ्यासवासनावासितान्तःकरणश्चेत् तदा तस्य आङ्गलभाषा अतिसुलभेव प्रतिभाति। तत्र न किमप्याश्चर्यम्। तस्यां अभ्यासबलेन स्वमातृभाषापि तस्य कदाचित् कठिना भासेत। एवमेव भाषान्तरविषयेष्वपि।

सर्वास्वपि भाषासु सामान्यव्यवहारार्थं सर्वसाधारणशब्दाः प्रसिद्धा वर्तन्ते। विशिष्टव्यवहाराय विशेषशब्दानां आवश्यकता भवत्येव। एतद्द्वयं सर्वजनवाणीसाधारणमिति वेदितव्यम्।

अत्र उदाहरणार्थं हिन्दीभाषैव गृह्यताम् । अस्यां भाषायां उत्तरदेशेषु बाहुल्येन व्यवह्रियमाणानि तद्देशजनसामान्यविदितानि पदानि सन्ति। अत एवेयं अतिसरलेव द्योतते। परं कस्याश्चन भाषायाः साधारणशब्दसमूह एव तद्भाषास्वरूपमिति किं वक्तुमुचितम् ? न कदापि । किञ्च हिन्दीभाषायां विज्ञानादिविषयेषु विशिष्टव्यवहाराय विशेषशब्दान् अलभमानाः केचन संस्कृतात् पदान्युद्धृत्य निरसारं निर्विवेकं च नियोज्य "इयं शुद्धहिन्दी" इति सोत्साहं गर्जन्ति । अपरे केचन यवनादिभाषान्तरेभ्यः पदानि संयोज्य "इयं हिन्दुस्तानी" इति कथयन्ति । एवं उभयेषां वाग्वादेन सर्वाः प्रजाः समाकुलिता भवन्ति । एवं च इदानीं हिन्दीभाषायाः स्वरूपमपि समाकुलितत्वेन अव्यवस्थितमेव दृश्यते । विशेषशब्दसङ्ग्रहार्थं भाषान्तरेभ्यः पदानि आनाय्य निरवधानं निवेश्यमानेयं भाषा सरला उत विरला ? अतः भाषायाः सौलभ्यं सारल्यं वेति न किञ्चिदिह विद्यते।

हिन्दीभाषायाः बहुजनभाषितत्वेन सुगमत्वं इति द्वितीयं कारणं निगद्यते। व्यवस्थितस्वरूपाभावेन तस्याः भित्तिहीनस्येव चित्रस्य स्थितिरस्ति । व्रजभाषा, वङ्गभाषा, यवनभाषा, अवधिभाषा इत्याद्यानां भाषाणां सम्मिश्रणरूपेणैव अधुना हिन्दीभाषायाः स्वरूपमुपलभ्यते। विना विशिष्टव्याकरणविचारं विविधाभ्यः प्रान्त्यभाषाभ्यः समुद्धृतानां पदानां निचय एव आधुनिकहिन्दीभाषास्वरूपमस्ति । अतस्तत्तत्प्रान्ते तत्तत्प्रान्त्यभाषाया एव बहुजनभाषितत्वं अवगम्यत्वं चेति वक्तुमुचितं; न तु स्वेच्छया कल्पितस्य हिन्दीभाषाविशेषस्य। तस्मात् सर्वजनसाधारणतया हिन्दीभाषायाः बहुजनभाषितत्वं अवगम्यत्वं वा नाङ्गीकर्तुं शक्यते।

अधुना संस्कृतस्य राष्ट्रभाषात्वेप्राशस्त्यं प्रदर्श्यते। केचन संस्कृतं मृतं मन्यन्ते। तत्र कारणं— 'कदापि लोके कुत्रापि संस्कृतस्य जनसामान्यव्यवहारः नोपलभ्यते । पण्डितपरम्परामध्य एव तस्य प्राचुर्येण व्यवहारो दृश्यते' इति केचित् वदन्ति । तदेतत् सत्यमेव । परं तदर्थं तस्य मरणं सञ्जातमिति कथनमबद्धम्। यदा तस्य कदाचित् कुत्रापि जनसाधारणव्यवहृतत्वेन जननमेव न निश्चेतुं पार्यते ; केवलं पण्डितपरम्परामध्य एव च प्रचारो दृश्यते । कथं तर्हि तस्य मर्त्यभावः सङ्गच्छ-

ताम् ? अत एव सा अमर्त्यभाषात्वेन अस्मदभियुक्तैराख्यायते। तत्त्वान्वेषणे तु संस्कृतमेव भारतीयप्रान्त्यभाषासु, देहिष्वात्मेव विराजते। एवं स्थितेपि ये संस्कृतं मृतं मन्वते, तैः पाश्चात्यविद्यादोषदुष्टैः पण्डितम्मन्यैर्वा भाव्यम् । भारतीयसंस्कृतेः सभ्यतायाश्च मूलं संस्कृतमेवेति सर्वेपि स्वीकुर्वन्ति। अतः संस्कृतस्य यथोचितं प्रचारेणैव पाश्चात्यप्रथापिशाचीपीडिताया अस्मत्सभ्यतायाः संस्कृतेश्च पुनरुद्धारणं भवितुमर्हति । हिन्दीभाषायाः प्रचारेण तु श्रीतुलसीदासादीनां कतिपयानामेव कवीनां तत्कृतीनां च प्रचारः स्यात् , न तु समस्तभारतदेशस्य संस्कृतेः सभ्यताया वा पुनरुद्धारणप्रसक्तिः।

संस्कृतस्य राष्ट्रभाषात्वेन स्वीकरणे केचन कांश्चन दोषान् निर्दिशन्ति। ते च दोषाः प्रायेण—

1 व्याकरणविषयबाहुल्येन काठिन्येन च संस्कृतस्य दुरवगमत्वम्।
2 संस्कृतपण्डितानां अपर्याप्तत्वात् बहुकालव्ययसाध्यत्वम।
3 विज्ञानादिविषयाणां प्रचारणे शब्ददौर्लभ्यम्।
4 मतजातिसम्प्रदायानां पुनर्जननभीरुत्वं चेति।

अत्र प्रथमो दोषः स्वयंकृतोऽनर्थ एव । सोयमनर्थः पाश्चत्यविद्याप्रचारप्रथानुसारेण संस्कृतस्यापि विद्यालयेषु व्यवस्थापनादुत्पन्नः । आरम्भविद्यार्थिभिः अतिसुलभतया अवगाह्यमानं अस्मदभियुक्तानां पन्थानमविगणय्य आरम्भावसर एव अनपेक्षितानां प्रकृतिप्रत्ययविचारपूर्वकं सुबन्तादीनां पदानामुपन्यासः कोमलमतीनां बालानां कृते सर्वनाशकरः। साधारणपदानां स्पष्टोच्चारणमपि कर्तुं श्रममनुभवतः बालकस्य अक्षरोत्पत्तिस्थाननामधेयानां ज्ञानेन किं प्रयोजनम् ? रामशब्दमजानतो बालस्य रामशब्दनिष्पत्तिप्रसङ्गेन वा किम् ? परं अद्यत्वे दुर्भाग्यवशात् विक्रयार्थमेव केवलं प्रकाश्यमानानि पुस्तकानि बाहुल्येन विद्यालयेषु विनिवेशितानि दृश्यन्ते। संस्कृतं अतीव कठिनमिति विद्यार्थिनां मनने हेतुरयमेव । वस्तुतस्तु काचन भाषा कठिना सरलेति वा कथनं विभ्रम एवेति मया पूर्वमेव प्रतिपादितम्। तस्मादध्यापकैः संस्कृतभाषायां परिचयं दातुमेव प्रयतितव्यम्। न तु आरम्भावसर एव व्याकरणविशेषाध्यापनेन बालानां संस्कृताभ्यासे काठिन्यबुद्धिरुत्पादनीया।

द्वितीयश्च दोषः संस्कृतपण्डितानां अपर्याप्तत्वं अत एव बहुकालव्ययसाध्यत्वं चेति । अधुना विद्यालयेषु ये संस्कृताध्यापकाः सन्ति, तैरेव

संस्कृतप्रचारं कर्तुं पार्येतेति मे मनीषा। तथा च अद्यत्वे हिन्दीभाषाप्रचारस्य कृते महद्धनं व्ययीक्रियते। तदर्धं यावत् संस्कृतपण्डितोपयोगद्वारा संस्कृतस्य प्रचारे यद्युपयुज्येत तर्हि नूनं ते पण्डिताः स्वं प्रत्युज्जीविताः सुरभारतीं भारतवर्षे प्रत्यानयेयुः। तस्मान्न पण्डितानाम पर्याप्तत्वेन संस्कृतप्रचारदौर्लभ्यं शङ्कनीयम्।

यदा संस्कृतं राष्ट्रभाषात्वेन परिगृह्य संस्कृतज्ञानमनिवार्यमिति शासकैः प्रकटीक्रियेत तदा तदर्थं प्रयतमानाः पुरुषाः कालक्रमेण शनैःशनैः तस्मिन् ज्ञानमवाप्नुयुः। संस्कृतस्य प्रचारविषये अतितीव्रता शीघ्रता वा नोचिता। वस्तुतः कस्याश्चन भाषायाः प्रचारः स्वयमेव कालक्रमेण सावधानं प्रापणीयः। अधुना हिन्दीभाषाप्रचारधुरन्धराः केचन अतिमहता धनव्ययेन अतितीव्रं त्वरितं च रसाभासप्रचारमेव कर्तुं बद्धश्रद्धा लक्ष्यन्ते। तेन च व्याकुलाः प्रजाः हिन्दीभाषां गर्हितुमेव प्रवर्तेरन्। भाषाप्रचारणं नाम नैकस्मिन्नेवाहोरात्रे साधयितुं शक्यम्। अतस्तद्विषये सर्वैः सावधानेन भवितव्यम्।

तृतीयो दोषस्तु विज्ञानादिविषयप्रचारणे शब्ददौर्लभ्यमिति। अत्र प्रथमं हिन्दीभाषायाः परिस्थितिं पश्यामः। विज्ञानं, व्यवसायः, अर्थशास्त्रं, भूगोलशास्त्रं इत्येवमादयः बहवो विषयाः अद्यत्वे हिन्दीभाषायां पाश्चात्यभाषाभ्यः विशेषतः आङ्गलभाषातश्च अनूदिता उपलभ्यन्ते। अनूद्यमानानामेतेषां विषयाणां कृते विशेषशब्दा आवश्यका भवन्ति। ते च शब्दाः कुतः समासाद्य निवेशिताः इति चेत् संस्कृतादेव। एवं प्रान्त्यभाषास्वपि विशेषशब्दस्थाने संस्कृतमेव विराजते। इत्थं भाषान्तरेभ्यः परस्सहस्रं विशेषशब्दान् दातुं समर्थस्य शब्दसागरस्य संस्कृतस्य कुतः शब्ददौर्लभ्यम्?

मतजातिसम्प्रदायानां पुनर्जननभीरुत्वमन्त्यो दोषः। संस्कृतभाषाभ्यासे मतविशेषविषयो न कश्चिद्दोषो दृश्यते। यवनाः द्राविडेषु च केचन प्रायः संस्कृतं कठिनमिति वदेयुः। तच्च कारणं निस्सारमिति पूर्वमेव निरस्तम्।

जातिविषयसम्बन्धी कश्चन महान् दोषो वर्तत इति केचन भृशं शङ्कन्ते। तथाहि— संस्कृतस्य राष्ट्रभाषात्वे ब्राह्मणाः स्वयं संस्कृतं सम्यगधीत्य चातुर्वर्ण्यव्यवस्थापनं कुर्युरिति। कारणमिदं सङ्कुचितदृष्टिगोचरमेवेति मे प्रतिभाति। ब्राह्मणानां जनसंख्या तदितरजनसंख्यापेक्षया

अत्यल्पिष्ठैवेति सर्वे सम्यक् जानन्ति । यथा वा स्वल्पसंख्याका ब्राह्मणाः संस्कृतमधीत्य जातिव्यवस्थापने स्वतन्त्राः तद्वत् बहुसंख्याका ब्राह्मणेतरे अपि राष्ट्रभाषात्वेन अनिवार्यतया संस्कृतज्ञानमवाप्य जातिसम्प्रदाय-शिथिलीकरणेपि स्वाधीना एव । किञ्च अधुना भारतीयसंस्कृतिः, सभ्यता, सम्प्रदायश्च पाश्चात्यविद्याभ्यासबलेन आङ्गलेयानां संस्कृत्यादिभिः सम्मिश्रिता वर्तन्ते । सेयं दशा गत्यन्तराभावेन इष्टापत्तिरेवेति बहवो विद्वांसः अभिप्रयन्ति । यदि त्रिशङ्कुस्वर्गसमानेयं दशा प्रजातन्त्रेऽस्मिन् राष्ट्रे अद्य बहुजनसम्मतत्वेन इष्टा तर्हि अस्तु नाम परिवर्तनशीलेस्मिन् संसारे जातिव्यवस्थापनमपि भाविबहुजनाभिमतत्वेन अन्यथानुपपत्त्या इष्टापत्तिरेवेति । अतोऽयं विषयः प्रजातन्त्रभूतेऽस्मिन् राष्ट्रे विवादयोग्यतामपि न भजते ।

एवञ्च राष्ट्रभाषात्वे हिन्दीभाषापेक्षया संस्कृतस्यैव युक्तं स्थानमित्यत्र न मे सन्देहलेशः ।

[अत्र विमृष्टेषु विषयेषु अन्येपि विद्वांसो यदि स्वस्वाभिप्रायं विलिख्य प्रेषयेयुः तत्प्रकाशने वयं सज्जाः सन्तोषिणश्च । सं ]

---

# कश्चन ज्यौतिषिकः ॥

(पण्डित वि. अनन्ताचार्यः)

कस्मिंश्चिद्ग्रामे, आङ्गिरसो नाम ब्राह्मणः आसीत् । सः ज्योतिषशास्त्रे अत्यन्तं निपुणः । तस्य कन्या काचन जज्ञे । तस्या जातकं पिता परीक्षाञ्चक्रे । भर्तृसमागमस्य प्रथमदिन एव सा विधवा भविष्यतीति व्यजानात् । विवाहयोग्ये वयसि वर्तमानां तां परिणेतुं वरम् अन्विवेष । आङ्गिरसः सत्यवादी । अनृतं तस्य सर्वथा नेष्टम् । कन्याप्रेक्षकेषु सत्यमेव उक्तवान् । सर्वेऽपि ब्रह्मचारिणः एनां निराचक्रुः । अन्ततः एको वर्णी विशददर्पः आजगाम । सः आत्मनो मरणमपि अनुमत्य एनां परिणेतुमङ्गीचकार । विवाह असीत् । कस्याञ्चित् निशि भर्ता तया सह संविवेश । आङ्गिरसस्तु रात्रावेव जामातुः मरणं ध्रुवं मत्वा तस्य दहनसंस्काराय सर्वाणि संविधानानि चकार । रात्रिः जगाम । दम्पती न बुबुधाते । कवाटं भित्त्वा प्रविश्य सुखसुप्तौ तौ ददर्श । विस्मितोऽभूत् । सद्य

एव ज्योतिश्शास्त्रस्योपरि चुक्रोध । सर्वाणि पुस्तकानि दग्धुं निश्चिकाय । प्रज्वलितेऽग्नौ तानि प्रक्षेप्तुं सन्नद्धे तस्मिन्, साक्षात् बृहस्पतिः विप्ररूपेण आजगाम । 'किमिद'मिति पप्रच्छ । आङ्गिरसः सर्ववृत्तम् अकथयत् । बृहस्पतिः 'भो मा त्वरस्व । रात्रौ किं वृत्तमासीदिति तव दुहितरं पृच्छ' इत्याज्ञापयामास। पृष्टा सा एवम् अवादीत्—'निशि मम भर्ता जलसमीपं गतः, अहमपि अन्वगाम् । जले अवतरतः तस्य पादं ग्राहो जग्राह । सः चुक्रोश । अहं करस्थं दीपमादाय तत्समीपं गतवती । तस्य समीपे दीपं निरवापयम् । तेन भीतो ग्राहः भर्तारं त्यक्त्वा पलायाञ्चक्रे । ततः स्वस्थः भर्ता मया सह गृहमागतः' इति । बृहस्पतिः प्रोवाच—'ब्रह्मन्, दुर्ज्ञेय-सूक्ष्माणि शास्त्राणि । सहसा शास्त्रेषु कोपं मा कृथाः ।' इत्येवमुक्त्वा स तिरोदधे ।

---

# प्रकृतिभेदः ॥

I

—किमरे, स्वामी आगच्छति, प्रसारितपादः शयान एव वर्तसे उत्थाय यथोचितमुपविश रे ।

—स्वामिनं पश्य रे, स्वामिनम् । कोऽयं मनुष्यः यदिमं त्वं स्वामीत्यभिदधासि । मूर्तो दुराचारः। यत्र क्वापि यत् किमपि भुङ्क्ते । यतः कुतश्चिदपि यत् किमपि प्रतिगृह्णाति ।

—अपर्यालोच्य न किञ्चित् सहसा सावधारणं वक्तुं युक्तम् ।

—तिष्ठ रे, अस्मिन् अणुमात्रं एकं गुणं दर्शय। जितोऽहं भविष्यामि।

II

—पश्यसि किमिह वर्तत इति ?

—आमरे, सम्यक् पश्यामि । यद्भवानाह तत् सत्यम् । "नारायण नारायण" इत्ययमुच्चः अविच्छिन्नमुच्चरन् आस्ते, एवं दिनावसाने भक्त्या क्रियमाणमिदं भगवन्नामोच्चारणं अकार्यसहस्रकारिणोऽप्यस्य कालक्रमेण समग्रं श्रेयो विधास्यति । न संशयः ।

---

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 2

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५५ जय - तुला [सं २

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

OCTOBER 1954

R
S
V
L
00994

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दययया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः—श्रीगीतार्थदीपः ८९ — ९६

तेन तृतीयोऽपि प्रश्न इह समाहितो भवति । 'परमात्मसमाराधनतया कृतं कर्मैव'हि 'मोक्षसाधनज्ञानाङ्गतया स्थित्वा मोक्षं साधयति'। ते यज्ञेनाराधिताः मदात्मका देवाः वः युष्मान् भावयन्तु स्वाराधनापेक्षितान्नपानादिकैः पुष्णन्तु । एतेन 'क्षणिकस्यापि देवताप्रीतिरूपापूर्वद्वारा फलसाधनत्वम् । महाप्रलये त्विन्द्रादिलयेऽपि परदेवताप्रीतिद्वारा पुनः फलप्रदत्व'मिति द्वितीयशङ्कापरिहारः । सांसारिकभोगसाधनस्याप्यन्नपानादेः देवताराधनार्थतयोपयोगे सति मोक्षानुगुणत्वं भवती"ति चरमप्रश्नसमाधानमपीह व्यञ्जितम् ।

'उक्तस्यैवार्थस्य मोक्षोपयोगित्वज्ञापकमुत्तरार्धम् । उक्तरीत्या परस्परं, यूयं देवान् देवा युष्मानिति, भावयन्तः उपकुर्वन्तः परं श्रेयः मोक्षमवाप्स्यथ । एतदनुसारेणैव पूर्वार्धे सर्वं मोक्षपर्यन्ततया व्याख्यातम् । न चात्रापि परमिति विशेषणे सत्यपि मोक्षेतरार्वाचीनोत्कृष्टश्रेयः परत्वाश्रयणमेवास्तु । किमर्थं मोक्षपर्यन्तानुधावनमिति वाच्यम् । 'सुराणामपि चाधिपत्यम्' इति मोक्षेतरसकलसुखविरक्तं अर्जुनं प्रत्युपदिश्यमानत्वेन तस्यावश्यकत्वात् ।

*நீங்கள் தேவர்களைப் பூஜியுங்கள், தேவர்கள் உங்களைப் போஷிக்கட்டும். இப்படிப் பரஸ்பரம் உதவி உத்தமமான நன்மையைப் பெறுவீர்கள்.* 11

१३१ इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२ ॥

"ते देवा भावयन्तु वः' इत्युक्तस्य पोषणस्य प्रकारः 'देवान् भावयत' इत्यस्य व्यतिरेके प्रत्यवायश्चोच्यते"। यज्ञभाविताः यज्ञेनाराधिता देवाः इष्टान् भोगान् उत्तमपुरुषार्थलक्षणं मोक्षं साधयतां वः युष्माकं ये अभिमता भोगाः भोगसाधनभूता अर्थाः तान् दास्यन्ते । पूर्वपूर्वयज्ञैराराधिताः उत्तरोत्तरयज्ञसाधनसम्पत्तिं विदधतीत्यर्थः । अयं पोषणप्रकारः । अथ व्यतिरेके प्रत्यवायः । तैः देवैः दत्तान् धान्यरूपान् भोगान् एभ्यो दातृभ्यो देवेभ्यः यज्ञहवीरूपेण अदत्वा यः भुङ्क्ते सः स्तेनः चोर एव । "चौर्यं हि नाम अन्यदीये तत्प्रयोजनायैव परिक्लृप्ते वस्तुनि स्वकीयता-

बुद्धिं कृत्वा तेन स्वात्मपोषणम् ।" ननु कथमेवंविधं चौर्यं प्रकृते । "उच्यते। देवा हि यज्ञैराराधिता अपि हविर्ग्रहणार्थमेव फलं प्रयच्छन्ति। यथा राजानः षड्भागसङ्ग्रहाय स्वाराधकेभ्यः क्षेत्रादिकम् । तत्र करप्रदानविमुखाः पुरुषा इव हविरादिकमप्रयच्छन्तो दण्ड्या इति । एवं यज्ञमकुर्वतः चोरत्वेन न परं पुरुषार्थानर्हतामात्रं अपि तु निरयगामित्वं च भविष्यतीत्यभिप्रायः । हिशब्दः पूर्वोक्तार्थोपपादनपरत्वं सूचयति ।

யஜ்ஞங்களினால் பூஜிக்கப்பட்ட தேவர்கள் மேலும் பூஜை நடப்பதற்காக உங்களுக்கு வேண்டிய பொருள்களைக் கொடுப்பார்கள். அவர்கள் கொடுத்தவற்றை அவர்களுக்குக் கொடுக்காமல் எவன் தானே புசிக்கின்றானோ அவன் சோரனே. 12

१३२ यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥

पूर्वोक्तमेव विवृणोति । "तत्र पूर्वार्धं 'श्रेयः परमवाप्स्यथ ।' इत्यस्य प्रकारकथनम् । उत्तरार्धं तु 'तैर्दत्तान्' इत्याद्युक्तचोरत्वप्रपञ्चनरूपम् ।" 'यज्ञशिष्टं अमृताख्यं अशितुं शीलं येषां ते यज्ञशिष्टाशिनः ।'इन्द्राद्यात्मनाऽवस्थितपरमपुरुषाराधनार्थतयैव द्रव्याण्युपादाय पक्त्वा तैर्यथावस्थितं परमपुरुषमाराध्य तच्छिष्टाशनेन ये शरीरधारणं कुर्वते ते' । सन्तः विशेषणमिदम् । 'यज्ञशिष्टाशिन एव वर्तमाना इत्यर्थः ।' सर्वकिल्बिषैः अनादिकालोपार्जितैः आत्मयाथात्म्यावलोकनविरोधिभिः सर्वैः पापैः मुच्यन्ते त्यज्यन्ते । विध्वस्तपापा भवन्तीति यावत् । यज्ञशिष्टाशनेन आत्मावलोकनविरोधिषु पापेषु निवृत्तेषु आत्मावलोकनं लब्ध्वा मुक्ता भवन्तीति अनेन प्रकारेण श्रेयः प्राप्तिरित्युक्तं भवति । ये तु आत्मकारणात् । कारणशब्दः प्रयोजनरूपहेतुपरः । आत्मनः स्वस्य क्षुन्निवृत्त्यादिरूपं यत्प्रयोजनं तस्मादेव हेतोः, तदेवोद्दिश्येत्यर्थः । परमपुरुषेणेन्द्राद्यात्मना स्वाराधनाय दत्तान् आत्मार्थतयोपादाय' । पचन्ति, पचतेर्भोजनार्थत्वात् पक्त्वा भुञ्जत इतीह विवक्षितम् । ते पापाः 'पुल्लिङ्गोऽत्र पापशब्दः तद्गुणसारन्यायात् पापविशिष्टविषयः । पापात्मानः । पापस्वभावा इत्यर्थः । अघं भुञ्जते । अघशब्दोऽत्र अन्ने औपचारिकः । अघहेतुत्वात् तदन्नं अघमि-

त्युपचर्यते। ते 'आत्मावलोकनविमुखाः नरकायैव पचन्ते'। 'आत्मार्थं पचमानस्य पूर्वकिल्बिषनिवृत्त्यभावात् आत्मावलोकनवैमुख्यम्। उत्तरोत्तर-किल्बिषहेतुत्वाच्च पुनर्नरकप्राप्ति'रिति चोरत्वं प्रपञ्चितम्।

யஜ்ஞம் அநுஷ்டித்து அதில் மிகுந்ததையே உண்டு ஜீவிக்கின்றவர்கள் எல்லாப் பாவங்களினின்றும் விடுபடுகின்றனர். அப்படியல்லாமல் தமக்காகவே என்று சமைத்து உண்கின்றவர்கள் வெறும் பாவத்தையே உண்கின்றவர்களாவர். (அந்த அன்னம் மேல்மேலும் பாவத்தையே பெருக்கி நரகத்திற்கே அவர்களைக் கொண்டுசேர்க்கும்.) 13

१३३ अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

१३४ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥

१३५ एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

"पुनरपि लोकदृष्ट्या शास्त्रदृष्ट्या च सर्वस्य यज्ञमूलत्वं दर्शयित्वा यज्ञानुवर्तनस्यावश्यकार्यताम्, अननुवर्तने दोषं चाह"। "उक्तस्यैवार्थस्य प्रमाणप्रदर्शनपूर्वकप्रपञ्चनं 'अन्नाद्भवन्ति' इत्यादिना क्रियत" इत्यादरार्थ-त्वादपौनरुक्त्यम्।"

अन्नात् सर्वाणि भूतानि भवन्ति। अन्नस्य पर्जन्यात् सम्भवः उत्पत्तिः। इदमुभयं सर्वलोकसाक्षिकम्। पर्जन्यः यज्ञाद् भवति। इदं शास्त्रेणावगम्यते "अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते। आदित्या-ज्जायते वृष्टिः ... " इत्यादिना। यज्ञः कर्मणः समुद्भवति। कर्म द्रव्यस्य आर्जनम्, आर्जितस्य पचनम्, इत्यादिरूपम्। कर्म ब्रह्मण उद्भवति। अत्र ब्रह्मशब्दनिर्दिष्टं प्रकृतिपरिणामरूपं शरीरम्। कर्मशरीरोद्भवमित्युक्तं भवति। ब्रह्म शरीरं अक्षरसमुद्भवम्। अत्र अक्षरशब्दनिर्दिष्टो जीवात्मा। अन्नपानादितृप्तेन अक्षरेण जीवात्मनाऽधिष्ठितं शरीरं द्रव्यार्जनादिकर्मणे

प्रभवतीति कर्मसाधनभूतं शरीरमक्षरसमुद्भवमित्युच्यते । अनेन 'कर्म-ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवमित्यर्धेन कर्मजीवशरीररूपभूतोद्भव-मित्युक्तं भवतीति ज्ञेयम् ।

एवमर्थेषु शास्त्रत्रयस्य पुरुषस्य कर्तव्यमंशं प्रकृतोपयोगितया निष्कृष्य दर्शयति -- तस्मादित्यर्धेन । उक्तेष्वर्थेषु पूर्वपूर्वस्य उत्तरोत्तरोत्पन्न-त्वादित्यर्थः । सर्वगतं ये कर्मयोगाधिकारिणः ये च ज्ञानयोगाधिकारिणः तान् तैर्वा गतम् । तेषां सर्वेषां सम्बन्धीत्यर्थः । ब्रह्म शरीरं नित्यं सदा यज्ञे प्रतिष्ठितम् । यज्ञमूलकमित्यर्थः ।

एवं प्रवर्तितं परमपुरुषेण 'एतत्सर्वमानुपूर्व्या प्रवर्तताम् उत्पद्यताम्' इति सङ्कल्पितं चक्रं — भूतशब्दनिर्दिष्टानि सजीवानि शरीराणि अन्नात्, अन्नं पर्जन्यात्, पर्जन्यः यज्ञात्, यज्ञः कर्तृव्यापाररूपात् कर्मणः, कर्म सजीवेभ्यः शरीरेभ्यः, सजीवानि शरीराणि पुनरप्यन्नात् इत्यन्योन्यकार्य-कारणभावेन चक्रवत् परिवर्तमानमर्थजातं इह कर्मयोगज्ञानयोगरूपसाधने वर्तमानः यः अधिकारी नानुवर्तयति उत्तरोत्तरं प्रवर्तमानं न करोति, न्यायेन द्रव्यमार्ज्य यज्ञानुष्ठाने सति हि तत्प्रवर्तनं कृतं स्यात् । तदभावे तत्प्रवर्तनाभाव एव । सः यज्ञशिष्टेन देहधारणमकुर्वन् अघायुर्भवति । 'अघकारणत्वात्, अघकार्यत्वात्, तदुभयसङ्ग्राहकाघसम्बन्धित्वमात्राद्वा उपचारात् अघरूपं आयुर्यस्य तथाविधो भवति । अत एवेन्द्रियारामो भवति । नात्मारामः । इन्द्रियाण्येवास्योद्यानानि भवन्ति । अयज्ञशिष्ट-वर्धितदेहमनस्कत्वेन उद्रिक्तरजस्तमस्कः आत्मावलोकनविमुखतया विषय-भोगैकरतिर्भवति । अतः हे पार्थ स मोघं जीवति । ज्ञानयोगादौ प्रयत-मानस्यापि निष्फलप्रयत्नत्वात् ।

ப்ரஜைகள் அன்னத்திலிருந்து உண்டாகின்றனர். அன்னம் மழையிலிருந்து உண்டாகின்றது. மழை யஜ்ஞத்திலிருந்து உண்டாகின்றது. யஜ்ஞம் பொருள் ஸம்பாதிப்பது முதலிய கர்மாவினால் உண்டாகின்றது. இக்கர்ம ப்ரஜைகளினிடத்தி லிருந்து உண்டாகின்றது. (ப்ரஜைகள் முற்கூறியபடி அன்னத்திலிருந்து உண்டாகின்றனர்). ஆகையால் ப்ரஜைகள் யாவரும் யஜ்ஞத்தையே ஆதாரமாகக் கொண்டிருக்கின்றனர்.

இப்படி ஒரு சக்கிரம் பகவானால் சுழற்றி விடப்பட்டிருக்கிறது. தனது யோக்யதைக்குத் தக்கபடி யஜ்ஞம் நடைபெறும்படி செய்து இந்தச் சக்கிரம் மேன்மேலும் சுழன்று வரும்படி செய்யவேண்டும். அப்படிச் செய்யாதவன் பிழைத்திருப்பதே பாவம். அவன் உலக இன்பங்களிலேயே ஆழ்ந்து ஆத்மாவைப்பற்றிய அறிவையே பெறாமல் போவான். அவன் செய்யும் முயற்சியும் வீணாகும். 14—16.

१३६ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥

१३७ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

'असाधनायत्तात्मदर्शनस्य मुक्तस्यैव महायज्ञादिवर्णाश्रमोचितकर्मानारम्भ इत्याह'। ज्ञानयोगाद्यधिकारिणोऽपि कर्मकर्तव्यताया उक्तत्वात् 'तस्मादसक्तः' इत्यादिनाऽनुपदं वक्ष्यमाणत्वाच्च तन्मध्ये 'यस्त्वात्मरतिः' इत्यादिश्लोकौ न ज्ञानयोगाद्यधिकारिविषयौ, किन्तु फलदशाविषयौ। मुक्तविषयाविति यावत्।

यस्त्विति तुशब्दः ज्ञानयोगादिसाधननिष्ठाव्यावृत्त्यर्थः। कर्मादिरूपप्रतिबन्धकाभावात् तन्निवर्तकज्ञानयोगकर्मयोगरूपसाधननैरपेक्ष्येण स्वत एव यो मानवः आत्मरतिः आत्मनि रतिः आभिमुख्यं यस्य, तथाविध एव स्यात्। न तु विषयाभिमुखः। तथा आत्मतृप्त एव च स्यात्, न त्वन्नपानादिभिरात्मव्यतिरिक्तैस्तृप्तः। तथा आत्मन्येव सन्तुष्टश्च स्यात्, न तूद्यानस्रक्चन्दनगीतवादित्रनृत्तादौ। पोषकवस्तुजन्या प्रीतिस्तृप्तिः। भोग्यवस्तुजन्या प्रीतिस्तुष्टिः। धारकपोषकभोग्यादिकं सर्वमात्मैव यस्य, तस्य कार्यं आत्मदर्शनाय कर्तव्यं न विद्यते। स्वत एव सर्वदा आत्मदर्शनसत्त्वात्।

अत एव तस्य इह आत्मदर्शनोपायमध्ये कृतेन अनुष्ठितेन केनचित् नार्थः प्रयोजनं नास्ति। अकृतेन च केनापि कश्चन यः कोऽपि। योग्यतावशेनात्र अनर्थ इत्यध्याहार्यम्। अनर्थः न न विद्यते।

अस्य स्वत एव आत्मव्यतिरिक्तसकलवस्तुविमुखस्य मुक्तस्य भूतेषु प्रकृतिपरिणामविशेषेषु आकाशादिषु शब्दादिकार्यसहितेषु अर्थव्यपाश्रयः, अर्थशब्दो भावप्रधानः अर्थत्वेन प्रयोजनत्वेन व्यपाश्रयः स्वीकरणं न च कश्चिदस्ति । अर्थ एव व्यपाश्रयः स्वीकरणीयं वस्त्विति वा । शब्दादिषु विषयेषु कस्यचित् प्रयोजनतया स्वीकरणं यदि भवेत् तत् आत्मदर्शनस्य प्रतिबन्धकमिति तन्निवृत्त्यर्थमुपायापेक्षा भवेत् । मुक्तस्य स्वत एव आत्मेतरसकलविषयविरक्तत्वात् तत्सङ्गरूपप्रतिबन्धकं नास्तीति तन्निवृत्त्यर्थमपि कर्मयोगादिकं नानुष्ठेयमिति ।

ஆத்மாவையே தாரகமாகவும் போஷகமாகவும் போக்ய மாகவுமுடைய முக்தன் இருக்கின்றானே அவனுக்குத்தான் ஆத்மஸாக்ஷாத்காரத்திற்காகச் செய்யவேண்டிய கார்யமொன்று மில்லை. அவன் ஸ்வயமே எப்போதும் ஆத்மஸாக்ஷாத்கார முடையவன். ஆகலின், அவன் கர்மயோகம் முதலியதைச் செய்வதால் ப்ரயோஜநமொன்றுமில்லை. செய்யாவிட்டால் ப்ரத்யவாயமுமில்லை. சப்தம் ரூபம் முதலிய போக்ய விஷயங் களில் இது வேண்டுமென்ற அபேக்ஷையும் அவனுக்கு இல்லை. ஆகையால் இதைக் கழிப்பதற்காகவும் அவன் கர்மயோகாதி களைச் செய்யவேண்டியதில்லை. 17—8

१३८ तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥ १९ ॥

तस्मादित्येतत् कर्मणः कर्तव्यतायां पूर्वोक्तसमस्तहेतुपरामर्शी । यस्मात् मुक्तस्यैव कर्मयोगादिसाधनं नानुष्ठेयं, यस्माच्च सुशकत्वादप्रमादत्वात् अन्तर्गतात्मयाथात्म्यानुसन्धानत्वात् ज्ञानयोगिनोऽपि कर्मानुवृत्त्यपेक्षत्वाच्च कर्मयोग एवात्मदर्शनसिद्धौ श्रेयान् तस्मात् असक्तः सङ्गरहितः कार्यं भगवदाराधनरूपतया अवश्यं कर्तव्यम् । एवं मन्यमान इत्यत्र तात्पर्यम् । सततं यावदात्मप्राप्ति कर्म समाचर अनुतिष्ठ । ततः किं भवतीत्यत्राह— असक्तो हीति । असक्तः मदिष्टसाधनमिदम्, एतज्जन्यं फलमहं भोक्ष्य इति फलाभिसन्धिरहितः कार्यमिति बुद्ध्या वक्ष्यमाणा-

कर्तृत्वानुसन्धानपूर्वकं च कर्म आचरन् पूरुषः, परम् ; अत्र प्राप्यतया निर्दिष्टोऽयं परः देहातिरिक्तात्मप्रकरणत्वात् प्रकृतेः परो जीवः । तम् आत्मानं आप्नोति अनुष्ठीयमानेन कर्मयोगेनैव प्राप्नोति । ज्ञानयोगव्यवधानमन्तरेणापि कर्मयोग एवात्मप्राप्तिं साधयतीत्युक्तं भवति। हि यत एवं फलं भवति तस्मादाचरेति पूर्वेणान्वयः ।

இப்படி முக்தரான பிறகே கர்மாவைச் செய்யாமலிருக்கலாமாகையினாலும், முன் கூறியபடி செய்வதற்கு எளிதாய் அபாயமில்லாததாய் ஆத்மஜ்ஞானத்தையும் தனக்குள் அடக்கிக்கொண்டிருப்பதாய் ஜ்ஞாநயோகத்தைச் செய்கின்றவனும் சிறிதளவு அவச்யம் செய்யவேண்டியதாயிருக்கின்ற கர்மயோகமே ஆத்ம ஸாக்ஷாத்காரத்தை உண்டாக்குவதில் ஜ்ஞானயோகத்தைக் காட்டிலும் சிறந்த ஸாதனமாகையாலும் பற்றில்லாமல் செய்யவேண்டுமாகையால் செய்கின்றேன் என்ற எண்ணத்துடன் ஆத்மதர்சனம் உண்டாகும் வரையில் கர்மாவைச் செய். இப்படி ஸங்கமிராமல் கர்மாவைச் செய்துவந்தால் ஜ்ஞானயோகமில்லாமலே ஆத்மதர்சனம் உண்டாகும். 19

१३९ कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।

कर्मयोगस्य ज्यायस्त्वं शिष्टानुष्ठानेनोदाहरति । जनकादयः राजर्षयः ज्ञानिनामग्रेसराः प्रसिद्धाः । ते कर्मणैव न तु कर्म परित्यज्य ज्ञानयोगेन संसिद्धिं आत्मसाक्षात्काररूपफलसिद्धिं आस्थिताः प्राप्तवन्तः ।

ஜ்ஞானிகளுக்குள் சிறந்தவர்களான ஜநகமஹாராஜர் முதலானவர்கள் கர்மாவினாலேயே ஸித்தியை அதாவது ஆத்ம ஸாக்ஷாத்காரத்தைப் பெற்றார்கள்.

लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि ॥ २० ॥

१४० यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

एवं प्रथमं मुमुक्षोर्ज्ञानयोगानर्हतया कर्मयोगाधिकारी यो भवति

तस्य कर्मयोग एव कार्य इत्युक्त्वा ततः परं ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगात् कर्मयोग एव श्रेयानिति सहेतुकमुक्तम् । इदानीं शिष्टतया व्यपदेश्यस्य सर्वथा कर्मयोग एव कार्य इत्युच्यते ।

लोकस्य सङ्ग्रहः अशक्यविषयप्रवृत्तिजन्यादपायात् उद्ग्रहणम् उद्धरणम् । रक्षणमिति यावत् । अर्थान्तरं च वक्ष्यते । तं सम्पश्यन्नपि अवदधानश्च कर्तुमेव, कर्मेति प्रकरणाल्लभ्यते कर्मैव कर्तुमर्हसि । कुर्या इत्यर्थः । मम कर्मकरणे कथं लोकसङ्ग्रह इति चेत् शृणु । श्रेष्ठः कृत्स्नशास्त्रज्ञतया अनुष्ठातृतया च प्रसिद्धः यद्यद् आचरति तत्तदेव इतरः अकृत्स्नविज्जनः आचरति । तदेवाचरन् कथमाचरति ? सः श्रेष्ठः स्वेन क्रियमाणं यत्प्रमाणं प्रमाणशब्दोऽत्रावधिपरः । अनुष्ठेयकर्मस्वरूपस्य चावधिरङ्गान्येव ।' यदङ्गयुक्तं कर्म कुरुते आचरति तत् तदङ्गयुक्तमेव लोकः अकृत्स्नविज्जनः अनु वर्तते अनुसृत्य वर्तते अनुतिष्ठतीति पर्यवसितगत्या बोध्यम् । त्वं यदि ज्ञाननिष्ठामवलम्बसे तत्रानधिकारी अन्योऽपि जनः त्वामेव प्रमाणीकृत्य स्वयमपि कर्मपरित्यागेन ज्ञाननिष्ठामवलम्बमानः असामर्थ्यात् प्रच्युतो नश्येत् अथ कर्मयोगमवलम्बसे, स्वयमपि लोकः स्वाधिकारोचितमिममेवावलम्ब्य सिद्धिं गच्छेत् । एवं लोकसङ्ग्रहो भवति । "अतो लोकरक्षार्थं शिष्टतया प्रथितेन श्रेष्ठेन स्ववर्णाश्रमोचितं कर्म सकलं सर्वदाऽनुष्ठेयम् । अन्यथा लोकनाशजनितं पापं ज्ञानयोगादप्येनं प्रच्यावयेत् ।

லோகரக்ஷணத்தைக் கருதியும், நீ கர்மாவையே செய்ய வேண்டும். உன்னைப்போன்ற பெரியோன் எதைச் செய்கின்றானோ அதையே மற்ற ஸாமான்ய ஜநங்களும் செய்வர். அதையும் அவன் எவ்விதமாகச் செய்கின்றானோ அவ்விதமாகவே செய்வர். (ஆகையால் நீ கர்மாவைச் செய்யவேண்டும் இல்லாவிட்டால் உன்னைப் பார்த்துத் தாங்களும் ஜ்ஞாநநிஷ்டையை ஆரம்பித்து அதைச் செய்யமுடியாமல் அவர்கள் கெட்டுப்போவார்கள். அப்படி அவர்கள் கெடுவதற்குக் காரணமாயிருந்த நீயும் அதனாலுண்டான பாவத்தினால் ஆரம்பித்த ஜ்ஞாநநிஷ்டையை அநுஷ்டிக்கமுடியாமல் அதிலிருந்து நழுவி கெடுவாய்)

Registered No. M 2300

Book XXVIII ॥ श्रीः ॥ No. 3

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५५ जय - वृश्चिक [ सं ३

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

NOVEMBER 1954

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription **Rs. Two only.**

Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* **D.T. Tatacharya Siromani, M. O. L.**
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥


1 श्रीराघवेन्द्रचरितामृतम् ।
2 वरदाभ्युदयचम्पूः ।
3 मुकुन्दमाला ।
4 संस्कृतग्रन्थजातम् ।
5 वैदिका विशेषाः ।
6 यथाभिमतम् ।
7 सुभाषितम् ।
8 पुस्तकपरामर्शः ।

मन्ये विधिः स्थापितवान् सुगुप्तं
बृन्दावनेऽस्मिन् यतिकैतवेन ॥ ८५ ॥

आनन्दतीर्थस्य कृपाकटाक्षैः
स्थाने भृतं स्थानमिदं वदन्ति ।
गुरोर्हि शिष्ये विशदावभासे
सन्दृश्यते सन्दृशि पक्षपातः ॥ ८६ ॥

वृद्धा युवानः पुरुषाः स्त्रियश्च
समेत्य तत्तत्ककुभां विभागात् ।
तत्पादपङ्केरुहमाश्रयन्तो
मन्त्रालयाद्धद्रशतं नयन्ति ॥ ८७ ॥

संसारकान्तारभुवं प्रविष्टाः
प्रभ्रष्टमार्गाः परितो भ्रमन्तः ।
प्रसार्य हस्तौ भवतः पुरस्ता-
द्याचन्ति भिक्षां भवतापतप्ताः ॥ ८८ ॥

त्व चापि भिक्षुः प्रथितस्तथापि
लक्ष्मीपतेस्त्वं परमप्रियोऽसि ।
तस्मादुपादाय निकाममर्थं
त्वं भक्तवर्गाय ददासि भिक्षाम् ॥ ८९ ॥

सत्ये च धर्मे च रतोऽसि नित्यं
तत् सत्यधर्मा त्वयि सुप्रसन्नः ।
तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं
कल्पद्रुमाणामपि कल्पवृक्षे ॥ ९० ॥

त्वामेत्य योगीशमनन्तवित्तं
कथं न लोको भविताप्तकामः ।
यः काञ्चनायाञ्चति काञ्चनाद्रिं
स किं भवेज्जात्वनवाप्तहेमा ॥ ९१ ॥

सङ्कल्पितं लौकिकमर्थजातं
कल्पद्रुमाद्याः प्रतिपादयन्ति ।
अलौकिकध्वान्तनिरासकारि
ज्ञानं न तेषां कतमोऽपि दत्ते ॥ ९२ ॥

क्वकल्पवृक्षः क्व च कामधेनु-
श्चिन्तामणिः क्वेति च नैव विद्मः ।
सर्वोऽपि सोऽस्माकमभीष्टसिद्धौ
त्वमेव सम्प्रार्थितदानशौण्डः ॥ ९३ ॥

त्वदाश्रयात् सिध्यति भक्तिभाजां
ज्ञानं नराणामभिवाञ्छितं च ।
तत् कल्पवृक्षादिकमल्पसारं
विहाय ते पादयुगं श्रयामः ॥ ९४ ॥

तुङ्गं हि भद्रं भवदाश्रितानां
नीचैर्गतीनामपि सिध्यतीह ।
यत्तुङ्गभद्रा भवदाप्तभद्रा
गङ्गेव लोकानखिलान् पुनाति ॥ ९५ ॥

---

९१ अनन्तवित्तम्— अनन्तः नारायणः वित्तं यस्येति योगिपक्षे, अनन्तं वित्तं धनं यस्येति काञ्चनाद्रिपक्षे च द्रष्टव्यम् ।

९५ अत्र नीचैर्गतित्वं निम्नगात्वेन तुङ्गभद्रायामपि द्रष्टव्यम् ।

स्वान्ते रमेशं पुरतः कपीशं
सर्वत्र सर्वेशमपीक्षमाणः ।
त्वं पश्यतामग्रसरोऽसि योगि-
न्नपश्यतामस्मि पुरःसरोऽहम् ॥ ९६ ॥

तव प्रसादात् तपसा प्रभूता-
दन्धोऽप्यनन्धो भवति क्षणेन ।
अज्ञोऽपि विज्ञाननिधित्वमेति
मूकोऽपि वाचस्पतितामुपैति ॥ ९७ ॥

अद्यापि भक्ता भवतो विभूतौ
परःशता जाग्रति साक्षिभूताः ।
अस्तंगतस्यापि तव प्रकाशः
क्षितौ समन्तात् प्रसृतो विभाति ॥ ९८ ॥

आर्ताः श्रयन्त्यार्तिविनाशनाय
गायन्ति दासाः स्वगिरां विशुध्यै ।
विद्याविवृध्यै च भजन्ति विज्ञाः
श्रीराघवेन्द्रं श्रितपारिजातम् ॥ ९९ ॥

शिष्यस्य दीपो विदुषो विवस्वान्
भक्तस्य भाग्यं भुवनस्य भूतिः ।
द्वारं च लोकान्तरभावुकानां
श्रीराघवेन्द्रो जयति व्रतीन्द्रः ॥ १०० ॥

आचार्यस्य त्रिभुवनगुरोर्मध्वनाथस्य शिष्यो
वेदान्ताब्धेः परतटगतः षट्सु शास्त्रेष्वभिज्ञः ।
नानाश्चर्यप्रकटनपटुः पापसम्भेददक्षो
भूत्यै भूयान्निखिलजगतां राघवेन्द्रो यतीन्द्रः ॥ १०१ ॥

---



आक्रामन्तीव रसातलं आचामन्तीव भूतलं, आप्लावयन्तीव त्रिविष्टपं, आप्याययन्तीव सप्तरत्नाकरान्, आकम्पयन्तीव सप्तकुलाचलान्, सञ्चालयन्तीव दिक्चक्रवालं, संक्षोभयन्तीव ब्रह्माण्डं, उद्विग्नयन्तीव दिग्गजान्, उन्मूलयन्तीव महाटवीः, उपरुन्धतीव पद्मबन्धुगतिं, प्रतिषेधयन्तीव चन्द्रचङ्क्रमणं, भक्षयन्तीव नक्षत्रगणं, भर्त्सयन्तीव स्वं विना प्रक्रान्ताध्वरकर्माणं ब्रह्माणं, मज्जयन्तीव प्रपञ्चं, लङ्घयन्तीव प्रलयजलधिं, तर्जयन्तीव प्रत्यध्वरऋत्विजः, कबळयन्तीव काञ्चीनगरीं, राजपत्नीव विधृतविचित्रोर्मिका [1]युद्ध्यमानभटपङ्क्तिरिव [2]व्यालोलपरमकरवाला, अङ्गरीतिरिव [3]ग्राहकगृहीता, [4]विकृतिरिवोच्चोदका, [5]ऋक्षवन्तनगरीव रक्षितशम्बराडम्बरा, दाशरथिदयाझरीव समूलकाषंकषिता-[6]नुकूलमहागश्रेणिका, कृपणगृहिणीव [7]कुवलयभूषिता, कुजनतेव[8]

---

1 ऊर्मिकाः- अङ्गुलीयकानि तरङ्गाश्च । 2 भटपङ्क्तिपक्षे - व्यालोलाः परमाः उत्कृष्टाः करवालाः कृपाणाः यस्यां सा । नदीपक्षे व्यालोलपराणि मकराणां मीनानां वालानि यस्यां सा । 3 'अवग्राहगाहिका' इति मुद्रितकोशे पाठः । तदनुगुणा टिप्पणी च तत्र दत्तास्ति । परं तु सर्वेषु तालकोशेषु उपरि निर्दिष्ट एव पाठः दृश्यते । अत्र तु पाठे अङ्गरीतिरिवेत्यस्य मीमांसाशास्त्रप्रसिद्धाङ्गकलाप इवेत्यर्थः । ग्राहकग्रहीतेत्यस्य अङ्गपक्षे ग्राहकैः श्रुत्यादिभिः अङ्गताबोधकप्रमाणैः गृहीतेति वा प्राभाकरपारिभा पारिभाषिक प्रक्रियया वाऽर्थः । नदीपक्षे नक्रैराक्रान्तेत्यर्थः । 4 विकृतिः- विकृतियागः । तत्पक्षे उच्चोदकेत्यस्य उत् उत्पन्नं चोदकं 'प्रकृतिवद्विकृतिः कर्तव्या' इति चोदकवाक्यं यस्यां सा । नदीपक्षे उच्चं अधिकं उदकं जलं यस्यां सेति । 5 ऋक्षदन्तेति तालकोशेषु । शम्बराडम्बरः- शम्बराख्यासुरसंरम्भः, जलसंरम्भश्च । 6 दयापक्षे अनुकूलानां आश्रितानां महागांसि- महापराधाः, तेषां श्रेणिः परम्परा, सा समूलकाषंकषिता यया दययेति । नदीपक्षे अनुकूलमहागाः कूलसमीपे प्ररूढाः महावृक्षाः तेषां श्रेणिः समूलकाषंकषितेति । 7 कुवलयैः कुत्सितकटकैः नीलोत्पलैश्च । 8 कुजनता कुत्सितजनसमूहः । तत्पक्षे सतां असतां आकलयन्ती इति छेदः । नदीपक्षे- तामरससहिततामिति ।

सतामरसतामाकलयन्ती, [1]सवेगगमनापि राजहंसगतिः, [2]सवनसमृद्धिरपि वितताऽगराजिलोपाश्रिता, [3]अप्रदानशीलतया प्रख्याताऽपि स्वर्णस्तोमपरिपूरितसकलाशा, [4]नागोल्बणप्रवाहापि भूभृदाकर्षणप्रवृत्ता, कञ्जभवनसवनभञ्जने रागवती वेगवती द्रागवतीर्णवती सत्यव्रतसन्निकर्षम्।

स्ववर्जमारब्धमुखं विरिञ्चं सनिर्जरं द्रागिव तर्जयन्ती।
निर्जग्मुषी [5]सह्यतटाद्युगान्तपर्जन्यवद्वेगवती जगर्ज ॥ २३ ॥

तदा किल श्रुताद्भुतवेगवतीगर्जितानां पितामहवितानशालागतानां देवतानां भूदेवतानां च सञ्जाता परमाकुलता नोपगता वाचामपि गोचरताम्।

तथा हि—

नादे नादेयाद्भुतपूरस्य समृद्धे धावं धावं [6]तत्र सुरैर्भूसुरजालम्।
हस्तन्यस्तप्रस्तरमस्तस्तुतशङ्कं त्रस्तत्रस्तं ग्रस्तमभूदुस्तरदुःखैः ॥२४॥

उद्वेगागर्जिते धातुरुद्वेगा[7]वर्जिते क्रतौ।
स्वाहाकारश्शमं प्राप्तो हाहाकारो [8]विजृम्भितः ॥ २५ ॥

---

1 सवेगगमनापि सत्वरगमनापि, राजहंसगतिः राजहंसवत् मन्दगतिः यस्यास्सेति विरोधः। राजहंसानां गतिः प्राप्यस्थानमिति परिहारः। 2 सवनसमृद्धिरपि - वृक्षषण्डसमृद्धिसहितापि। विततानां अगानां वृक्षाणां राजेः पङ्क्तेः लोपेन अभवेन आश्रितेति विरोधः। जलसमृद्धियुता, वितताऽगैः विस्तृतवृक्षैः राजिलैः जलजन्तुमिश्रैः उपाश्रिता इति परिहारः। 3 अप्रदानशीलतया प्रख्यातापि दानाभावस्वभावतया प्रसिद्धापि, स्वर्णस्तोमेन सुवर्णसमूहेन पूरिता सकलानां जनानां आशा मनोरथः यया इति विरोधः। अपां जलस्य प्रदानं शीलं यस्याः, तादृशस्वभावतया प्रसिद्धा, स्वर्णस्तोमेन सुष्ठु अर्णसां जलानां स्तोमेन, परिपूरिताः सकलाः आशाः दिशः यया सेति परिहारः। 4 नागोल्बणप्रवाहापि अगैः पर्वतैः उल्बणः प्रवाहः यस्यास्सा तद्भिन्नापि, भूभृदाकर्षणप्रवृत्तेति विरोधः। नागैः सर्पैः उल्बणप्रवाहेति परिहारः। 5 सह्यन'गात् क'। 6 स्वाविसुरैः इति ताळकोशेषु। 7 उद्वेगार्तजने, इति ताळकोशेषु। 8 उद्वेगार्तजने, इति ताळकोशेषु।

अपि च,

वेगवत्यागमोद्वेगविद्रुताशेषमानुषा ।
वितानशाला सा भेजे स्वयमेव [1]वितानताम् ॥ २६ ॥

अनन्तरमाकस्मिकात्यद्भुतनदीस्रोतस्समापतनचकिता वितानविलोकनार्थमागतास्सर्वेऽपि सनिर्वेदं चतुर्वदनं यजमानं शरणमुपजग्मुरब्रुवंश्चैवम् । भगवन् पितामह परित्रायस्व परित्रायस्व शृणु चेदं वचनम्—

हठान्महीभृत्कटकानशेषानामज्जयन्तो मुखलग्नफेनाः ।
[2]रक्षस्तुरङ्गा इव यज्ञहान्यै नदीतरङ्गा द्रुतमापतन्ति ॥ २७ ॥

दीप्रवाहागमनतो निर्वर्त्येऽस्मिन् [3]तव क्रतौ ।
नदीप्रवाहागमनं चेद्विघ्नो नास्य किं भवेत् ॥ २८ ॥

इदं वचनं निशमयन्निति कर्तव्यतामुग्धो हिरण्यगर्भो योगदृष्ट्या दैत्यदुरुक्तिमुपश्रुत्य कुपितवत्याः भारत्याः कृत्यमिदमित्यधिगत्य गत्यन्तरविरहाद्गरुडध्वजमेव भगवन्तं शरणमुपगच्छन्नच्छमतिरित्थमनुसमधत्त ।

भवकैरवभास्करासुरारे तव कैङ्कर्यविघातभीतचेताः ।
तरणं विपदम्बुधेरभीप्सन् शरणं त्वच्चरणाम्बुजं [4]भजामि ॥ २९ ॥

भवत्पदकुशेशये भवनिवृत्तये स्वाशये
रमासख दयोदधे रचितभक्तभव्ये दधे ।
यथा न भयमध्वरे भवति सिन्धुतो मध्वरे[5]
तथा तु मयि धन्यतां विदधती कृपा तन्यताम् ॥ ३० ॥

हर्तुं सत्वरमापदां समुदयं कर्तुं बहूस्सम्पदो
धर्तुं वाथ समस्तलोकभरमुद्धर्तुं भवादाश्रितान् ।
लोप्तुं प्राप्तमदान् द्विषस्सुचरितं गोप्तुं च निश्शङ्कितं
कः शक्तः कमलासहाय जगति त्वत्तः परो विद्यते ॥ ३१ ॥

---

1 वितानतां शून्यतामित्यर्थः । 2 नाग्नास्तुरङ्गा इति मुद्रितकोशे । नाग्नाः नग्नमत(जैनमत)सम्बन्धिनः इति तत्रत्यटिप्पणी । 3 महाक्रतौ 'क' । 4 व्रजामि 'क' । 5 मध्वरे मधुरिपो इति सम्बोधनम् ।

[1]वर्णत्रयं सुविद्यं श्रीमत्स्यादित्यनु[2]श्रववचस्त्वम्।
व्यर्थतयेव विवृण्वन् श्रीमत्स्यात्मा श्रुतीरुदहरस्त्वम्॥ ३२॥

[3]कूर्मरूपो भवाञ्शौरे येनापि वसुधा भृता।
तेन त्वं चकृषे चित्रं देवान्नवसुधाभृतः॥ ३३॥

[4]कोलतां त्वत्परः प्राप्य को लतामिव मेदिनीम्।
खण्डितोग्रारिरुद्धर्तुं पण्डितो वनराशितः॥ ३४॥

रूपवत्कार्यमपि ते नृहरे विस्मयावहम्।
हिरण्यमपि विख्यातं [5]यदनष्टापदं व्यधाः॥ ३५॥

अपि कुप्रतिग्रहमवाप्य जनो यदि नाम[6]कार्यमिह निर्वहति।
परमल्पकोऽपि परिवृद्धिमियादिति वामनेन भवता विवृतम्॥ ३६॥

मृगयुरिव भृगुपते त्वं मृगयून इवावनीभुजो दृप्तान्।
समताडयः परशुना प्रतिगर्जद्रक्तपान[7]दृप्तेन॥ ३७॥

[8]प्राहार्षीस्त्वं राम तुष्ट्यै बुधानां लङ्कारक्षोदक्षमस्वादु शब्दम्।
त्वत्पुत्राभ्यां त्वत्सुकाव्यं ररक्षेऽलङ्कारक्षोदक्षमस्वादुशब्दम॥ ३८॥

---

1 वर्णत्रयं ब्राह्मणक्षत्रियवैश्यरूपं वर्णत्रयम। श्रीमत्स्यात् मीनाकृतेः भगवतः। सुविद्यं शोभना विद्या वेदविद्या यस्य तत्। श्रीमत् स्यात् शोभायुक्तं स्यात् इति व्यर्थता। 2 अनुग्रहवचः इति 'क'। 3 येनापि येन आपि इति छेदः। नवसुधाभृतः गिरिभृद्भिन्नान्। नवामृतभाजः अकार्षीरिति वास्तवार्थः। 4 त्वत्परः त्वद्भिन्नः कः पुमान्, कोलतां वराहतां प्राप्य, खण्डितोग्रारिरसन्, मेदिनीं लतामिव, वनराशितः जलराशितः समुद्रतः उद्धर्तुं पण्डितः स्यादित्यर्थः। 5 अनष्टापदं अष्टापदभिन्नमिति विरोधः। अनष्टाः आपदः विपदः यस्य तं आपद्युक्तं कृतवान् इति वास्तवार्थः। 6 देव इति 'क'। तदा देव इति सम्बोधनम। 7 मत्तेन इति 'क'। 8 हे राम, बुधानां देवानां तुष्ट्यै अस्वादुशब्दं कठोरशब्दं, लङ्कारक्षोदक्षं, लङ्कायां विद्यमानं राक्षसनायकं रावणं प्राहार्षीः अवधीः। त्वत्पुत्राभ्यां कुशलवाभ्यां, बुधानां पण्डितानां तुष्ट्यै, अलङ्कारक्षोदक्षमस्वादुशब्दं अलङ्काराणां क्षोदस्य उपमर्दस्य, क्षमाः स्वादवः शब्दाः यस्मिन् तत्, तादृशं त्वत्सुकाव्यं रामायणं ररक्षे इत्यर्थः।

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २८] कलि ५०५५ जय - वृश्चिक साधारण [सं ३

# मुकुन्दमाला ॥

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद्भव्यं भवतु भगवन् पूर्वकर्मानुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥

पुनरपि भगवान् भक्तमुवाच—

प्रिय कुलशेखर, लोकमर्यादामतिक्रम्य न किमपि भवता आचरणीयम्। यदुद्दिश्य पुरुषः प्रवर्तते तत् फलमित्युच्यते । एवं विधानि चत्वारि फलानि प्राधान्येन लोके परिगण्यन्ते । तान्येव पुरुषार्था इत्यभिधीयन्ते । धर्मः अर्थः कामः मोक्ष इतीमे पुरुषार्थाः प्रसिद्धाः । एषां प्राप्तिसाधनतया भक्तिः शास्त्रेषूपदिश्यते । एवं सति, पुरुषार्थमपुरुषार्थं करोमि, साधनं फलं करोमीति यदि भवान् सङ्कल्पयति, लोकमर्यादाविरुद्धं ह्येतत् । तन्मा भूत् । एषु पुरुषार्थेषु यत्किञ्चन उद्देश्यं कृत्वा तत्साधनतयामयि भक्तिं कर्तुं यततां भवान् ।

इति । अत्रोत्तरमाह राजा कुलशेखरः ।

"नास्था धर्मे । फलविशेषसाधनतया वा अवश्यकर्तव्यतया वा शास्त्रेषु विहितं कर्म धर्म इत्युच्यते । जन्मान्तरसुकृतपरिपाकवशेन तदनुष्ठाने केषाञ्चन श्रद्धा भवति । तेषां सर्वो मनोरथः तद्विषय एव । तेन तेषां धर्मः पुरुषार्थः । न च स सुसाधः । देवालयं निर्मिमीमहि, तटाकं

खनेम, पानीयशालाः परिकल्पयेम, अपेक्षमाणानां अन्नानि वस्त्राणि च दद्याम, देवान् यजेमहि इति हि महता कुतूहलेन प्रवर्तन्ते, भूयो भूयो विघ्नैः प्रतिहताश्च निर्विण्णा भवन्ति । अतस्ते भगवन्तं भजन्ते समग्रं धर्माचरणमस्माकं सम्पद्यतामिति । एवमर्थलिप्सया दुर्लभकन्याविशेषकामनादिना च निमित्तेन भगवति भक्तिं कुर्वन्ति ।

एषु धर्मार्थकामरूपेषु पुरुषार्थेषु यस्मिन् कस्मिन्नपि न मे आस्था रुचिः अस्ति । अत इमे मां प्रति पुरुषार्था न भवन्ति । कथमहं तेषु यं कमपि फलतया उद्दिशेयम् ।”

अथ भगवानुवाच — ननु कुलशेखर, यद्यपि भवत एषु आस्था नास्ति तथापि मोक्षरूपे चरमे उत्तमे पुरुषार्थे आस्था भवेदेव । न हि विवेकिनस्तत्र पराङ्मुखा भवन्ति । तमुद्दिश्य मयि भक्तिं प्रार्थय ।

कुलशेखरः — भगवन्, तस्मिन्नपि मे आस्था नास्ति ।

भगवान् — तर्हि तत् कथं न ब्रवीषि ?

कुलशेखरः — मोक्षो हि त्वत्प्राप्तिरेव । तत्र कथं आस्थाविरहः स्पष्टं कथनीय इति तूष्णीमवर्तिषि ।

भगवान् — स्पष्टं कथने तव शङ्का । व्यङ्ग्यमर्यादया ज्ञापनं तु अभिमतमेव ।

कुलशेखरः — आम् । अभिमतमेव । तथा ज्ञापितवांश्चास्मि ।

भगवान् — कथं ?

कुलशेखरः — कामा हि द्विविधाः । अल्पा अनित्याश्च संसारिभिर्भुज्यमानाः, अनल्पाः शाश्वताश्च मुक्तैर्भुज्यमानाः ‘सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चितेति ।’ इत्युपनिषत्सु आम्नाताः । इमे उभयेऽपि हि ‘नैव कामोपभोगे’ इत्यनेन सङ्गृहीताः ।

भगवान् — नन्वेवं मोक्षवैमुख्ये ‘पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्’ इत्युक्तरीत्या संसारबन्धोऽनुवर्तमान एव भविष्यति । पूर्वपूर्वजन्मकृतकर्मफलं हि उत्तरोत्तरजन्मसु अवश्यमनुभोक्तव्यम् ।

कुलशेखरः — भगवन्, पूर्वकर्मानुरूपं यद्यद्भविष्यत् तत्तद्भवतु । न तत्र मनागपि मे चिन्ता वा भीतिर्वा । तस्मान्मुक्तावपि नास्त्यास्था ।

भगवान्—यद्यल्लोके फलं प्रसिद्धं तत्सर्वं भवतः आस्थापदं न भवति। किं तर्हि भवत आस्थापदम् ?

कुलशेखरः—भगवन्, श्रूयताम्, विज्ञापयामि। एतन्मम बहुमतं श्लाघ्यं प्रार्थ्यं आस्थापदम्। किं तत्? अस्मिन् जन्मनि भाविषु जन्मान्तरेषु च त्वत्पादारविन्दविषया निश्चला भक्तिर्भवतीति यत्, इदं तत्। सा भक्तिः स्वयं फलभूता अस्तु उत्पद्यतां सर्वदाऽनुवर्ततां च।

यन्मम प्रार्थ्यं तद्भवता दातव्यम्। त्वच्चरणारविन्दभक्तिरेव मे प्रार्थ्या। तां मे देहि।

---

# संस्कृतग्रन्थजातम् ॥

—:o:—

## उपनिषदः।

अथ अपरा सामवेदीया उपनिषत् तलवकारोपनिषन्नाम। अस्याः केन इति पदेन उपक्रमात् 'केनोपनिषत्' इत्यपि प्रसिद्धिः। अत्रत्ये भागद्वये इन्द्रियव्यतिरिक्तः तेषामगोचरः आत्मेति प्रतिपाद्यते। द्वितीये अग्नीन्द्रादीनां देवानामपि दुरधिगमः परस्य ब्रह्मणः महिमेति।

अथ कृष्णयजुर्वेदीया उपनिषदः। तत्र मैत्रायणीयोपनिषत् अध्यायसप्तकात्मा। अत्र इक्ष्वाकुवंशप्रभवाय बृहद्रथाय राज्ञे आत्मस्वरूपं उपदिश्यते। ब्रह्मविष्णुरुद्राणां त्रयाणामपि ब्रह्मणः प्रादुर्भावविशेषरूपत्वम् इह प्रतिपाद्यते। वेदान्तप्रक्रियापेक्षया साङ्ख्यप्रक्रिया अत्र स्फुटतरं दृश्यत इत्याहुः। संसाराज्जुगुप्सा यद्यपि उपनिषदन्तरेष्वपि सूच्यते, तथापि अत्र सा अभिव्यक्ततरेति, अत्र प्रायः साङ्ख्यबौद्धवासना हेतुरिति च वदन्ति। जाग्रत्स्वप्नसुषुप्तेभ्यः तिसृभ्योऽवस्थाभ्यो व्यतिरिक्ता तुरीयाख्यावस्था इह प्रतिपाद्यते।

अथ अपरा कृष्णयजुर्वेदोपनिषत् काठकमिति प्रसिद्धा। अत्र आहत्य विंशतिशतं मन्त्राः सन्ति। तैत्तिरीयब्राह्मणे संक्षेपेण स्थिता नचिकेतसः कथा इह विस्तरेण निबद्धा। अत्रत्ये अध्यायद्वये प्रत्येकं तिस्रो वल्ल्यः

सन्ति। अत्र प्रथमाध्यायस्यैव प्राचीनत्वं द्वितीयस्य पश्चात् योगमार्गपरिचयशालिभिः योजितत्वं च उत्प्रेक्ष्यन्ते। ब्रह्मेतरपदार्थेषु वैराग्यं ब्रह्मविद्याधिकारे प्रयोजकमिति निरूपणे तादृशवैराग्यसंपादनोपायोपदेशे च अस्या उपनिषदः ऐदम्पर्यम्।

अथ अपरा कृष्णयजुर्वेदीया उपनिषत् श्वेताश्वतरनाम्नी; यत्र आहत्य दशशतं मन्त्राः सन्ति। श्वेताश्वतरो नाम कश्चिदृषिः आसीत्। तदीयेनैव नाम्ना इयमुपनिषत् आख्यायते। अत्र मन्त्रसङ्कलनप्रकारस्य अपरिष्कृतत्वात् नियमविशेषाननुसारित्वात् प्रक्षेपदर्शनाच्च अत्र बहूनां कर्तृत्वं प्रतीयत इति मन्यन्ते। कठोपनिषत्सम्बन्धिनां बहूनां मन्त्राणां अत्रोदाहरणात् सर्वथा ततोऽर्वाचीनेयमित्याहुः। यदन्यत्र अदृष्टः योगमार्गविस्तरः इह दृश्यते ततोऽपि अस्याः अर्वाचीनत्वं विज्ञायत इति च वदन्ति।

यच्चात्र कल्पान्ते जगतः प्रलयः, पुनः ब्रह्मणा सृष्टिश्चोच्यते असकृत् शिवादिपदप्रयोगश्च दृश्यते। ततोऽपि इह च कालतः अर्वाचीनत्वं व्यज्यत इति।

अथ बृहदारण्यकोपनिषत् शुक्लयजुर्वेदीया। अत्रत्येषु षट्सु अध्यायेषु द्वयं द्वयं एकैको भागो भवति। तत्र चरमस्य खिलकाण्ड इति व्यवहारः। एतेन, प्रतिपाद्यस्वरूपपरिशीलनेन च सर्वथा अयं भागः पश्चात् कैश्चित् योजित इति प्रतीयत इत्याहुः। आद्यभागद्वयमपि पुरा कदाचित् परस्परसंबन्धं विना पृथगासीत्, यस्मात् भागद्वयेऽपि याज्ञवल्क्यमैत्रेयीसंवादो दृश्यत इत्यपि नवीनानां अभ्यूहः। अस्मिन् भागद्वयेऽपि अस्ति वंश (गुरुपरम्परा) कीर्तनम्। तत्परिशीलनेन च इदं भागद्वयं आनवम्या विद्यासन्ततेः भिन्नभिन्नोपनिषद्रूपेण आसीदिति, ततः परमेव मिथस्संधानेन ऐकग्रन्थ्यं संपादितमिति च प्रतीयते। तत्र प्रथमस्य भागस्य मधुकाण्ड इति, द्वितीयस्य याज्ञवल्क्यकाण्ड इति च व्यवहारः।

अत्रापि ग्रहणसौकर्याय यज्ञाङ्गवस्तुषु उपासनं प्रथमतो विधाय ततः क्रमेण आत्मस्वरूपं निरूप्यते।

द्वितीयकाण्डे जनकसदसि प्रवृत्तायां सभायां अन्यैः कृतानां प्रश्नानां समाधानरूपेण याज्ञवल्क्यकृताः तत्त्वोपदेशाः, जनकं प्रति तेनैव साक्षा-

त्कृताश्च ते निबध्यन्ते । तत्र बहवोऽपि मिलिता अध्यात्मविद ऋषयः याज्ञवल्क्यं जेतुं नाशक्नुवन् ।

याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः मैत्रेयी, कात्यायनी चेति । तत्र ऐहिकेषु विषयेषु विरक्ता मैत्रेयी आत्मतत्त्वोपदेशाय याज्ञवल्क्यमभ्यर्थ्य तां विद्यामधिजगाम ; इतीदं पूर्वकाले स्त्रियोऽपि ब्रह्मविद्यायां श्रद्धालव आसन्निति ज्ञापयति । एवं याज्ञवल्क्यं प्रति प्रश्नं कृतवत्सु वाचक्नवी इति अपरा ब्रह्मवादिनी स्त्री श्रूयते ।

चरमे काण्डे छान्दोग्यसंवादिनो बहवो विषयाः । तथा स्त्रीवशीकरणगर्भनिरोधगर्भोत्पादनप्रभृतिक्षुद्रफलोपायाः केचन प्रदर्श्यन्ते । अत एव अस्य काण्डस्य विषयतो लाघवं मन्यमाना नवीनाः अर्वाचीनत्वमध्यवस्यन्ति ।

अपरा शुक्लयजुर्वेदीया उपनिषत् ईशावास्यरूपेति प्रागेवोक्तम् । अत्र केवलं अष्टादशैव मन्त्राः । प्रथममन्त्रस्य ईशावास्यमित्युपक्रमात् एवमस्याः नाम । बृहदारण्यके यः परमार्वाचीनभागः तस्य समकालिकी इयमुपनिषत् श्वेताश्वतरात्प्राचीनेति नवीनानामभिप्रायः । अत्र अतिसङ्क्षेपेण परमात्मस्वरूपं आत्मज्ञानविरहस्य अनर्थहेतुत्वं, ब्रह्मविदः अनुसन्धेयाः मन्त्राश्च उपदिश्यन्ते ।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

## काठकमारण्यकञ्च ।

काठकस्य त्रयाणां प्रपाठकानां सायणभाष्ये प्रारम्भेषु 'सावित्रचयनं त्वतं दशमेऽस्मिन् प्रपाठके । नाचिकेताख्यचयनमेकादश उदीर्यते । चातुर्होत्रं वैश्वसृजं द्वयं द्वादश ईर्यते ।' इति, अवसानेषु 'इति... .... यजुर्ब्राह्मणे तृतीयकाण्डे दशमप्रपाठके एकादशोऽनुवाकः', 'इति ... ... युजुर्ब्राह्मणे तृतीयकाण्डे एकादशप्रपाठके दशमोऽनुवाकः', 'इति ... यजु-

ब्राह्मणे तृतीयकाण्डे द्वादशप्रपाठके 'नवमोऽनुवाकः' इति च वाक्यानि सन्ति। एतद्भाष्येण काठकस्य प्रपाठकानां क्रमेण तैत्तिरीययजुर्ब्राह्मणतृतीयाष्टकदशमैकादशद्वादशप्रपाठकत्वेनावगमात् काठकं तृतीयाष्टकेऽन्तर्भूतं बुध्यते। भट्टभास्करकाठकभाष्ये मुद्रणकाराः काठकप्रपाठकानां तृतीयाष्टकदशमैकादशद्वादशप्रपाठकत्वेन गणनां न्यवेशयन्। तद्भाष्यस्यारम्भे 'एवमश्वमेधान्तानि तित्तिरिप्रोक्तानि काण्डानि व्याख्यातानि। अथ काठकाग्निकाण्डान्यष्टौ सावित्रनाचिकेतचातुर्होत्रवैश्वसृजारुणकेतुकानि पञ्च। दिवश्श्येनयोऽपाघाश्चेष्टयः स्वाध्यायब्राह्मणमष्टममिति' इति, अवसानेषु 'इति प्रथमे काठके, द्वितीये, तृतीये' इति च दृश्यते। भट्टभास्करारण्यकभाष्योपक्रमे 'अत्र सन्त्यष्टौ काठके काण्डानि कठमुनिना दृष्टानि सावित्रनाचिकेतचातुर्होत्रवैश्वसृजारुणकेतुकाख्यानि पञ्चाग्निचित्यानि। दिवश्श्येनयोऽपाघाश्चेष्टयः स्वाध्यायब्राह्मणमष्टममिति। एतेषामारुणकेतुकोऽस्मिन् प्रश्ने विधीयते।' इति विद्यते। अत्र अश्वमेधान्तकाण्डानि तित्तिरिप्रोक्तानीति अष्टौ काठककाण्डानि कठमुनिना दृष्टानीति च भाषणात्, काठकस्य प्रपाठकानां प्रथमद्वितीयतृतीयप्रपाठकत्वेन वचनात्, एवमश्वमेधान्तानि ... .... व्याख्यातानि। अथेत्याद्याख्यानाच्च काठकं तृतीयाष्टकेऽनन्तर्गतं तस्मादनन्तरं चेति भट्टभास्कराभिप्रायः प्रतीयते। कुम्भघोणमुद्रितकाठकपुस्तके 'तैत्तिरीययजुर्ब्राह्मणे काठके प्रथमः प्रश्न· द्वितीयः प्रश्नः, तृतीयः प्रश्नः' इति मुद्रणं भाष्यद्वयाननुगुणं भाति। तैत्तिरीयारण्यके सायणाभिमतः प्रश्नानां क्रम एवम् — भद्रं कर्णेभिरिति प्रथमः प्रश्नः। सह वै देवानामिति द्वितीयः। चित्तिस्स्रुगिति तृतीयः। नमो वाच इति चतुर्थः। देवा वै सत्रमिति पञ्चमः। परेयुवाँसमिति षष्ठः। शिक्षाऽऽनन्दभृगुवल्ल्यस्सप्तमाष्टमनवमाः। अम्भस्यपार इति दशम इति। तत्र भट्टभास्कराभिमतस्तेषां क्रमस्त्वित्थम् — परेयुवाँसमिति चतुर्थः प्रश्नः। वल्लीत्रयमपि एकः प्रश्नः। स आरण्यके पञ्चमः। अम्भस्य पार इति षष्ठः। नमो वाच इति सप्तमः। देवा वै सत्रमित्यष्टम इति। अतः एतन्मते आरण्यके प्रश्ना अष्टावेव। अयं क्रम एव श्रीवैष्णवैराद्रियते। आरण्यकभाष्यारम्भे 'व्याख्याता सुखबोधार्थं तैत्तिरीयकसंहिता। तद्ब्राह्मणं च व्याख्यातं शिष्टमारण्यकं ततः॥ वहिरारुणकेत्वाख्यः काठके पञ्चमःश्रुतः। आरण्यकादावाम्नातस्तद्व्याख्याऽथ प्रतन्यते॥' इति

सायणश्लोकयोः, 'एतेषामारुणकेतुकोऽस्मिन् प्रश्ने विधीयते ।' इति भट्टभास्करभाष्ये च काठकव्याख्यानानन्तरमारण्यकव्याख्याने आरण्यकप्रथमप्रश्ने काठकोक्तारुणकेतुकाम्नानस्य हेतुत्वेनोपन्यासादारण्यकस्य काठकानन्तर्यमवसीयते । ततो वेदोपसंहारे 'यदेकादशेऽहन्प्रवृज्यते । ... ऐव तपति ।' इत्यस्यानुसन्धानात्परं 'तस्यैवात्मा पदवित्तं विदित्वा .... ... ओम् ।' इत्यस्यानुसन्धानं चिन्तनीयमित्याचक्षते ।

---

पेक्सपिअर् कृतम्

# यथाभिमतम् ॥ [V. 4

(प्रविशति निकषोपलः, आर्द्री च)

जाक्विस्— नूनमिदानीं अपरः प्रवाह उपस्थितः । इमानि द्वन्द्वानि धर्मभवनमभ्यागच्छन्ति । अत्रेदं विचित्रयोर्मृगयोर्युगलमायाति, ययोः सार्वत्रिकमभिधानं जडाविति ।

निकषः— वन्दनं शुभाशंसनं च भवद्भ्यः सर्वेभ्यः ।

जाक्विस्— महाप्रभो, स्वागतं तस्मै भवान् ब्रवीतु । अयं स चित्रपटासङ्गी पुरुषः, येन मुहुर्मुहुः अस्मिन्नरण्ये मम समागमो वृत्तः । स किल आस्थानसभ्य आसीत् । तथा स सङ्गिरते ।

निकषः— यदि यः कोऽपि तत् सन्दिग्धे तर्हि स मां परीक्षताम् । नृत्तं कृतवानस्मि, स्त्रियमुपश्लोकितवानस्मि, मित्रे निपुणां शत्रौ मसृणां च वृत्तिमवलम्बितवानस्मि, त्रीन् सौचिकान् विनाशितवानस्मि* चतुरः कलहान् कृतवानस्मि । तेष्को मे अभिरुचितः ।

जाक्विस्— स कथमुपक्रान्तः ?

निकषः— नूनं आवां समागतौ, सप्तमे च कारणे युद्धमुपलब्धवन्तौ ।

जाक्विस्— कथं सप्तमं कारणम् ? महाप्रभो, इमं जनमभिस्निह्यतु भवान् ।

राजा— अतीवाहमस्मिन् स्निह्यामि ।

---

* बहु कर्मकारयित्वा वेतनमप्रदाय भ्रष्टनेनेति भावः ।

निकषः—देवस्ते अभिमतं ददातु, आर्य। तवार्थे एवमहमाशासे†। आर्य, विवाहेन जायमानं बन्धमनुसृत्य प्रतिज्ञां, विप्रतिपत्त्या जायमानं विभेदमनुसृत्य प्रतिज्ञाप्रत्यादेशं च कर्तुं जानपदानां मिथुनानां मध्ये अहमत्र सङ्कृष्य प्रविष्टोऽस्मि। तपस्विनी कन्या‡ आर्य कुरूपं वस्तु आर्य, अपि तु मम स्वकीयम्। मम किमपि कौतुकं, आर्य तत् परिग्रहीतुं यत् अन्यः कोऽपि न परिगृह्णीयात्। परमं आर्जवमिह वसति आर्य, लुब्ध इव दुर्वेश्मनि, यथा भवदीयं मौक्तिकं भवदीयशुक्तिकायाम्।

राजा— नियतमयं शीघ्रप्रतिभः निपुणभाषी च।

निकषः— जडानां वाग्वज्रं, तथाविधान् मधुरान् रोगांश्चापेक्ष्य§, आर्य।

---

# वृद्धभाषितम्॥ (13)

केशवार्यः— वेदस्य महिमानं भगवता कीर्त्यमानं श्रोतुं रामकृष्णौ त्वरेते।

आचार्यः—साधु। अस्मिन् विषये तयोः एवं प्रबला शुश्रूषा भवतीत्येतत् मम प्रहर्षाय कल्पते। किन्तु पूर्वं वेदं प्रति जनानां या वृत्तिः या चाद्य तामुभयीं अणिमात्रविभिन्नां चिन्तयतो मेऽन्तरात्मा कामप्यवस्थां प्रतिपद्यते, यां वाचा वक्तुं न शक्नोमि। प्रायः 'कण्ठः स्तम्भितबाष्पवृत्तिकलुषो' भवति। अद्यतनी स्थितिः भवतां प्रत्यक्षा। वेदे आदरः प्रायेण लुप्तः। राज्यस्य वेदस्य च नास्ति यः कोऽपि सम्बन्धः। मतविषये तटस्थं राज्यमिति वदन्तः सामान्यतः संस्कृतविद्यामपि प्रति औदासीन्यं

---

† अत्र प्रथमं वाक्यं राजानं प्रति उक्तम्। चरमं जाकिस्-इमं प्रति।

‡ आर्द्रीमभिप्रेत्येदमाह।

§ अपेक्ष्याहं शीघ्रप्रतिभः निपुणभाषी चेत्यन्वयः। इतरानपेक्ष्य अहं जडः अस्वस्थबुद्धिश्च। अथाप्यहं मर्मस्पर्शि निपुणं च भाषे तत् श्रोतॄणां मधुरं भवति। एवंविधं यज्जाड्यं वक्रबुद्धिता च तदनुसारि, तद्व्यतिरेकि शीघ्रप्रतिभत्वं निपुणभाषित्वं च ममास्ति। न तु लोके परमार्थतो ये बुद्धिमन्तो निपुणा जनाः, तेषां यादृशं तादृशमिति स्वनैच्यं प्रकाशयन् निकषोपल इदमाहेति विभाव्यम्।

विभ्रति । किमुत वेदं प्रति । राज्यव्यवहारे एवं स्थितेऽपि अधिकारे स्थितैः सनातनमतावलम्बिकुलप्रसूतैः पुरुषैः "अस्मद्देशस्य सर्वो महिमा वेदाधीनः । सर्वविज्ञानमूलभूतस्य तस्य विरहे देशान्तरापेक्षया अल्पोऽपि विशेषः अस्मद्देशस्य नाभविष्यत् ।" इति तत्त्वमिदमवदधानैः तस्य यथा प्रचारो न लुप्येत, यथा बहवः तदध्ययने प्रवर्तेरन् तथा महत् स्थिरं संविधानं कर्तुं यतमानैर्भाव्यम् । सर्वे ते बुद्धिमन्तः समर्थाश्च । अथापि अस्मिन् विषये कदाचिदपि चिन्तालेशोऽपि न भवति । वेद इत्ययं विषयः न जातु तेषां बुद्धेर्गोचरीभवति ।

विद्याशालासु अध्याप्यमाना विद्या ईदृशीति भवन्तो जानन्त्येव । वेदपाठशालाः प्रायः सर्वाः अध्येतृविरहेण अभावं गताः । आग्रहारिका बालाः वेदाध्ययनस्य सर्वथा निष्फलतां पश्यन्तः वृथैव वा कालं नयन्ति, न त्वधीयते । बाल्ये अधीतवेदाः कतिपये तत्र तत्र पारायणं कुर्वन्तो वर्तन्ते । जीवनक्लेशं महान्तमनुभवन्तस्ते कुतो वयं वेदाध्ययनमकुर्मेति अनुशयाना एव सन्ति ।

अथ पूर्वं का स्थितिरिति पश्यत । द्विजकुलप्रसूता बालाः काले उपनीताः स्वधर्म इति वेदमधीयाना आसन् । अधीतस्य वेदस्य विस्मरणे महान् दोष इति धर्मशास्त्राणि उपदिशन्ति । तेन ब्रह्मयज्ञ इति देवालयोत्सवा इति, आचार्याणामवतारनक्षत्राणीति, शान्तिकर्मेति, प्रायश्चित्तमिति बहूनि निमित्तानि व्यपदिश्य वेदपारायणं कुर्वन्त एवासन् । प्रत्यग्रहारं वेदघोषः श्रूयमाण एवासीत् ।

स्वग्राम एव अध्यापयितरि स्थिते तस्य सविधे बाला अध्यैयत । अस्थिते ग्रामान्तरे यत्र स स्थितः तत्र गत्वा बन्धुकुलेषु वसन्तः भिक्षामटन्तो वा तस्य सकाशे अधीयते स्म ।

अद्विजानामपि सर्वेषां स्वधर्मनिष्ठेषु द्विजेषु प्रीतिः भक्तिः स्वकीयत्वाभिमानश्च अभ्यधिका आसन् । द्विजैः क्रियमाणं वेदाध्ययनं लोकस्थितिकारणमिति सुदृढः प्रत्ययः पूर्वं सर्वेषां जनानामभवत् । कियति तपसि कृते, कियति यत्ने कृते सा स्थितिः सम्पादयितुं शक्येति भवन्त आलोचयन्तु । उद्योगतृष्णापिशाची तदा न प्रादुर्भूता । जाता बालाः परस्तात् कथं जीविष्याम इति चिन्तां विना कुलक्रमागतां विद्यामभ्यस्यन्ति स्म । अभ्यस्तविद्यानुगुणं आचारं परिपालयन्त आसन् । राजानः प्रभवश्च अधीतवेदैः स्वधर्मनिष्ठैः महात्मभिरध्युषितानां अग्रहाराणां समृद्ध्या लोकसमृद्धिर्भव-

तीति सर्वशास्त्ररहस्यभूतं इदं तत्त्वं सम्यग् गृहीतवन्तः तेषां अनवरत चिन्ता यथा न भवेत् तथा गृहारामक्षेत्रादिदानेन अपेक्षितार्थसंविधानं समग्रम-कल्पयन् । ग्रामवासिनः कृषीवला अन्ये जना अपि श्रोत्रियैर्यथाविधि क्रियमाणेन वेदशास्त्राध्ययनेन जपहोमाद्यनुष्ठानेन च काले यावदपेक्षं वृष्टिः सस्यवृद्धिः तत्र शलभमूषिकाद्युपद्रवविरहः इत्येवमादयः क्षेमा भवन्तीति विश्वासदार्ढ्यशालिनः अत एव तेषु अनल्पां प्रीतिं भक्तिं च दर्शयन्तः तेषां सेवनमात्मनः श्रेयस्करं गौरवावहं चेति मन्यमानाः तेषां क्षेत्राणि कृष्ट्वा धान्यमुत्पाद्य स्वजीवनोपयुक्तमंशं स्वयं गृहीत्वा अन्यं तेभ्यः प्रदाय तेषामपेक्षितं अन्यत् साहाय्यं च सर्वं कृत्वा सन्तुष्टाः सुजीवनाश्चावर्तन्त । कच्चिदिमां स्थितिं भवन्तः सम्यग् बुद्धौ भावयन्ति ?

---

# पुस्तकपरामर्शः ॥

श्रीविरक्तिगुरुवरसप्तति:, श्रीयतिपतिवैभवदीपिका च ।

छन्दोग श्रीश्रीनिवासाचार्येण विरचिते । तत्पुत्रेण एस् अनन्ताचार्येण सटिप्पणे प्रकाशिते । अस्मादेव– Personal Assistant, Ministry of Finance, North Block, New Delhi–लभ्ये । आणकाष्टकमूल्ये ।

अनयोर्ग्रन्थयोः कर्ता छन्दोग श्रीनिवासाचार्यः कुमारवाडि स्वामीति प्रसिद्धः निरूढशास्त्रपाण्डित्य. मद्रास् महानगरान्तर्गते मैलापुरे वसन् चिरं बहूनां संस्कृते शास्त्रेषु च व्युत्पत्तिं सम्पादयन् आसीत् । न परं शास्त्रेषु कवनमार्गेऽपि महत् तस्य नैपुण्यमिति आभ्यां कृतिभ्यामवगच्छामः । अनयोराद्या विरक्तिराघवाचार्यनाम्नः तद्गुरोः स्तुतिपरा आर्यामयी । अन्या श्रीभाष्यकारभगवद्रामानुजवैभवप्रकाशनपरा चम्पूरूपा असम्पूर्णा । उभयत्र वाक् प्रसन्ना गम्भीरा च । कवेः कवित्ववासना पुष्कला दृश्यते ।

पितृकृती इमे टिप्पणीयोजनपुरस्सरं प्रकाशितवता संस्कृतविदा पुत्रेण पितृभक्त्यनुरूपं साधु कृतमिति पश्यन्तः प्रहृष्यामः ।

---

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५५ जय- धनुः [ सं ४

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

DECEMBER 1954

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूर्षद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari*
*Panditaraja* **D.T. Tatacharya Siromani,** M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


# विषयः ॥


शास्त्रानुबन्धः—श्रीगीतार्थदीपः ९७ — १०४

१४१ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

लोकरक्षणार्थं कर्मणः कर्तव्यतामेव द्रढयति इतः प्रभृति श्लोकत्रयेण । हे पार्थ जीवात् त्वत्तो विलक्षणस्य मे सर्वेश्वरस्य त्रिषु लोकेषु देवमनुष्यतिर्यग्रूपेण स्वच्छन्दतो वर्तमानस्य किञ्चन किमपि कर्तव्यं कर्म नास्ति । कुत इति चेत् यतः नानवाप्तमवाप्तव्यम् । अद्यावधि अनवाप्तं इतःपरं अवाप्तव्यं प्रयोजनं नास्ति । अवाप्तसमस्तकामस्य मम इतःपरमवाप्तव्यस्य प्रयोजनस्याभावात् तत्साधनतया कर्तव्यं कर्मापि नास्तीत्युक्तं भवति ।

वर्त एव च कर्मणि । अथापीत्यर्थे चकारः । कर्मणि वर्त एवेत्युक्ते न कदाचिदपि कर्मणो विरम्य ज्ञानयोगमनुतिष्ठामीति फलति । यद्वा प्रकरणौचित्यादेवकारोऽत्र भिन्नक्रमः । तथा च "अथापि कर्मण्येव वर्ते" इत्यर्थ इह लभ्यते ।

ஓ அர்ஜுனா! மூன்று உலகங்களிலும் தேவமனுஷ்யாதி உருவத்தில் இருக்கும் எனக்குச் செய்யவேண்டிய கர்ம ஒன்றுமில்லை. நான் அடையாத ஒரு பலன் இருந்தாலன்றோ அதற்கு உபாயமாக ஒன்றை நான் செய்யவேண்டும் அவ்வித பலன் ஒன்றும் எனக்கில்லை. நான் அவாப்தஸமஸ்தகாமன். ஆகிலும் நான் கர்மாவைச் செய்துகொண்டேதானிருக்கின்றேன். 22

१४२ यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

अहं शिष्टजनाग्रेसरवसुदेवगृहेऽवतीर्णः कर्मणि तत्कुलोचिते जातु जात्वपि सर्वदेत्यभिप्रायः अतन्द्रितः अनलसः अनुदासीनः यदि न वर्तेयं कर्मणि वृत्तिर्नामानुष्ठानमेव कर्म यदि नानुतिष्ठेयमित्युक्तं भवति तर्हि हे पार्थ, मनुष्याः अकृत्स्नविदः सर्वशः सर्वप्रकारेण मम वर्त्म कर्माननुष्ठानरूपां मदीयां पद्धतिं अनुवर्तन्ते अनुवर्तेरन् । प्रसङ्गरूपस्यापि सिद्धवत्का-

रामिप्रायेण वर्तमानव्यपदेशः । ततः किमिति चेत् कर्तव्यस्य साधनस्या-
ननुष्ठानेन अननुष्ठानजन्यप्रत्यवायेन च आत्मानमलब्ध्वा निरयगामिनो
भवेयुः ।

நான் எப்பொழுதும் உபேக்ஷையின்றி கர்மாவைச் செய்யாமல் போவேனேயாகில் ஸாமான்ய ஜநங்கள் எல்லிடத்திலும் என் வழியையே பின்பற்றி நடப்பார்கள். (என்னைப் பின்பற்றிச் செய்யவேண்டியதைச் செய்யாமல் போனால் ஆத்மஸாக்ஷாத்காரத்தைப் பெறாமல் நரகத்திற்குப் போவார்கள்.) 23

१४३ उत्सीदेयुरिमे लोका न कुर्यां कर्मचेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

ननु शास्त्रवश्याः शास्त्रविहितत्वात् कर्तव्यम् कुर्युरेव । न तु तवा-करणमाद्रियेरन् । इति शङ्कां परिहरन् अकरणस्य अनर्थहेतुतां च विशद-यति । अहं कर्म न कुर्यां चेत् इमे सर्वे लोकाः शिष्टजनाः उत्सीदेयुः नष्टा भवेयुः । मामेव प्रमाणीकृत्य मद्वत् कर्तव्याकरणात् । ननु शास्त्रमेव प्रमा-णीकरिष्यन्ति, न त्वामित्युक्तमिति चेत् उच्यते । सर्वेषां शास्त्रार्थानां सर्वै-र्निश्चेतुमशक्यत्वात् शिष्टाचारमेव भूयिष्ठाः प्रमाणीकुर्वन्तीति । उत्सादो नाशः । स च पुरुषार्थहानापुरुषार्थप्राप्तिरूपः । 'असन्नेव स भवति' इत्यादिवदेतत् ।

सङ्करस्य च कर्ता स्याम् । अन्यकर्तव्यस्यान्येन करणं सङ्करः । अकरणस्योत्सादहेतुत्वेऽवान्तरव्यापारोऽयं सङ्करः । अयं च ब्राह्मणादि-धर्मस्य युद्धनिवृत्त्यादेः क्षत्रियादिभिरनुष्ठानम् । मया मदुचिते कर्मणि अक्रियमाणे ,अन्योऽपि मदृष्टान्तेन तदुचितं कर्म अकुर्वन् अधिकार्यन्त-रोचितस्य तत्कर्माकरणस्य स्वयं करणात् स्वस्मिन् धर्मसङ्करप्रसङ्गं सम्पाद्य नष्टो भवतीति भावः ।

उपहन्यामिमाः प्रजाः । अहं मदवतारकुलोचितं कर्माकुर्वन् आसां शिष्टाचारशरणानां प्रजानां उपहतिं कृतवान् स्याम् । उपहतिः पश्चादपि कर्मानर्हता ।

अधिकारिणः अवश्यकर्तव्यस्याकरणं धर्मसङ्कररूपतया पश्चात्कर्तव्यकर्मानधिकारसम्पादकतया च आत्मसाक्षात्कारपूर्वकमोक्षलाभरूपपुरुषार्थहानस्य प्रत्यवायजननद्वारा नरकानुभवरूपापुरुषार्थप्राप्तेश्च हेतुर्भवतीति भावः ।

अयमनर्थो मा भूदिति यथाऽहं कर्म करोमि तथा त्वमपि कर्मैव कर्तुमर्हसि । अन्यथा त्वदाचारानुवर्तिनः अकृत्स्नविदः शिष्टा मुमुक्षवः स्वाधिकारमजानन्तः कर्मनिष्ठामनवलम्ब्य विनश्येयुः ।

*சாஸ்திரங்களிலிருந்து இது செய்யலாம் இது கூடா தென்பதை நிச்சயிப்பது எளிதான காரியமன்று. ஆகையால் பெரியோர் செய்வதையே ஸாதுக்கள் ப்ரமாணமாகக் கொள் வார்கள். ஆகையால் நான் கர்மாவைச் செய்யாமலிருந்தால் இந்த ஜனங்கள் செய்யவேண்டியதைச் செய்யாமல் தர்ம ஸாங்கர்யமேற்பட்டு நசித்துப்போவார்கள். மேல் செய்யப்பட வேண்டிய கர்மாக்களைச் செய்வதற்குரிய யோக்யதையையும் இழப்பார்கள்.* 24

१४४ सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥ २५ ॥

लोकस्य कर्मयोगज्ञानयोगयोरधिकारानधिकारप्रकारं विदुषः स्वाधिकारतिरस्कारेण तदधिकारानुरूपाचरणं चाह । अविद्वांसः आत्मन्यकृत्स्नविदः । कर्मणि सक्ताः सम्बन्धवन्तः । अवर्जनीयसम्बन्धा इत्यत्र तात्पर्यम् । आत्मविषयककृत्स्नज्ञानराहित्योक्त्या आत्मज्ञानाभ्यासरूपे ज्ञानयोगेऽनधिकारः सूचितः । कर्मण्यवर्जनीयसम्बन्धोक्त्या कर्मयोगाधिकारः सूचितः । अत्र 'अविद्वांसः, कर्मणि सक्ताः' इत्युभयं न सांसारिककर्मतत्प्रवणपुरुषविषयम् । तथा सति कर्मयोगमपि परित्यज्य सांसारिककर्माण्येव विदुषाऽप्यनुष्ठेयानीत्यापत्तेः । एते ज्ञानयोगेऽनधिकृताः कर्मयोगाधिकारिणः यथा कुर्वन्ति कर्मैवेत्यर्थाल्लभ्यते । तथा विद्वान् आत्मनि कृत्स्नवित् अत एव असक्तः कर्मणि सम्बन्धरहितः, ज्ञानयोगा-

धिकारवानिति भावः । एवम्भूते व्यपदेश्यः शिष्टः लोकसङ्ग्रहं चिकीर्षुः कर्मयोगमेव कुर्यात् । लोकस्य सङ्ग्रहः न रञ्जनादिः अपि तु एकीकृत्य स्वीकरणम् ; स्वानुष्ठाने समानाभिप्रायतया सयूथ्यतापादनमित्यर्थः ।

अत्र, यथा कुर्वन्ति तथा कुर्यादिति न केवलं दृष्टान्तदार्ष्टान्तिकविषयम्, अपि तु येन प्रकारेण स्वानुष्ठानं दृष्ट्वाऽन्ये कर्म कुर्युः तेन प्रकारेण विद्वानाचरेदित्येतदभिप्रायम् । तथा सति हि 'चिकीर्षुर्लोकसङ्ग्रहम्' इत्यपि सङ्गतं भवति ।

ஆத்மாவைப் பற்றிய முழு அறிவும் பெருமையால் ஜ்ஞான யோகத்தில் யோக்யதையில்லாதவர்களான கர்மயோகாதிகாரிகள் தமக்குரிய கர்மயோகத்தையே செய்ய எப்படி முற்படுவார்களோ அப்படி அவர்களுக்கு நிச்சயமுண்டாகும்படி ஜ்ஞான யோகத்தில் அதிகாரம் அதாவது யோக்யதையைப் பெற்ற பெரியோரும் கர்மயோகத்தையே செய்யவேண்டும். 25

१४५ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥ २६ ॥

लोकसङ्ग्रहप्रकारमाह । अज्ञानां आत्मविषयकृत्स्नज्ञानरहितानां अत एव ज्ञानयोगावलम्बनाशक्तानाम् । कर्मसङ्गिनां अनादिकर्मवासनया कर्मण्येव नियतत्वेन कर्मयोगाधिकारिणां मुमुक्षूणाम् । बुद्धिभेदं बुद्धेरन्यथाकरणम्, तच्च प्रकृते कर्मयोगादन्यदात्मावलोकनसाधनमस्तीति ज्ञापनम् । न जनयेत् न कुर्यात् । बुद्धिभेदः बुद्धेरन्यथाभवनम्, तच्च प्रकृते कर्मयोगादन्यदात्मावलोकनसाधनमस्तीति ग्रहणम् । तत् न जनयेत् नोत्पादयेत्, इत्यपि शक्यं विवरीतुम् । किं पुनः स कुर्यात् ? उच्यते । विद्वान् आत्मनि कृत्स्नवित्तया ज्ञानयोगशक्तोऽपि । युक्तः कर्मयोग एव ज्ञानयोगनिरपेक्ष आत्मावलोकनसाधनमिति बुद्ध्या सहितः । समाचरन् कर्मैव सम्यगाचरन् सर्वकर्माणि जोषयेत्, कर्मसङ्गिनामित्यनुषज्यते । अकृत्स्नविदां तेषां सर्वकर्मसु प्रीतिं जनयेत् । जुषी प्रीतिसेवनयोः ।

ஆத்மாவைப் பற்றிய ஜ்ஞானம் பூர்ணமாக இராமையால் கர்மயோகத்திலேயே அதிகாரமுள்ளவர்களுக்கு 'கர்மயோகமேயன்றி ஜ்ஞான யோகமென்கிற மற்றோர் யோகமிருக்கின்றது. அதைச் செய்யலாம்' என்று புத்தி மாறும்படி செய்யக்கூடாது தான் ஆத்மஜ்ஞானம் பூர்ணமாயிருந்து ஜ்ஞானயோகத்திற்கு அதிகாரியாயிருந்தாலும் ஜ்ஞானயோகாபேக்ஷையின்றி கர்மயோகமே ஆத்மஸாக்ஷாத்காரத்தை உண்டாக்குமென்ற எண்ணமுள்ளவனாய் கர்மயோகத்தையே செவ்வையாக அநுஷ்டித்து பூர்ண அறிவில்லாதவர்களுக்கு எல்லா கர்மாக்களிலும் ஆசையை உண்டாக்கவேண்டும்.
26

१४६ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अलङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥ २७ ॥

कर्मयोगमनुतिष्ठतो विदुषोऽविदुषश्च विशेषं प्रदर्शयन् कर्मयोगापेक्षितं यत् आत्मनोऽकर्तृत्वानुसन्धानं तस्य प्रकारमुपदिशति श्लोकचतुष्टयेन ।

तत्राविद्वान् यथाऽनुतिष्ठति तत् प्रथममाह । अहङ्कारविमूढात्मा । अहङ्कारो नाम अहमर्थभिन्ने प्रकृतिपरिणामभूते देहे अहमभिमानः। तेन विमूढः यथावदज्ञातः आत्मा स्वरूपं यस्य सः पुरुषः। प्रकृतेः गुणैः सत्त्वरजस्तमोरूपैः सर्वशः सर्वप्रकारं 'नियतं सङ्गरहितम्' 'अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।' इत्यादिभिर्वक्ष्यमाणसर्वप्रकारविशिष्टं यथा-तथेत्यर्थः । सर्वाणीत्यत्र पर्यवसानम् । क्रियमाणानि कर्माणि । कर्ता तृन्नन्तोऽयम् । तत्र 'न लोकाव्ययनिष्ठा खलर्थतृनाम्' इति षष्ठ्यानिषेधात् कर्माणीति द्वितीयैव । तेषां कर्तेति तृजन्तत्वे स्यात् । 'श्रियं युवाऽप्यङ्कगतामभोक्ता' इति रघुवंशे । तानि कर्ताऽहमिति मन्यते । यद्वा प्रतीत्यध्याहृत्य प्रकृतेर्गुणैः क्रियमाणानि कर्माणि प्रति तेषां विषये अहं कर्तेति मन्यत इति योज्यम् । वस्तुतः सर्वाणि कर्माणि प्रकृतेर्गुणैः क्रियन्ते, न पुरुषेण । इदमजानन् अविद्वान् तेषां विषये आत्मनः कर्तृत्वं मन्यते । एवं अविदुषोऽनुष्ठानं आत्मनः कर्तृत्वानुसन्धानपुरस्सरं भवतीत्युक्तं भवति।

ஆத்மாவைப் பற்றிய ஜ்ஞானம் பூர்ணமாயிராமல் கர்ம யோகம் அநுஷ்டிப்பவர்களுக்கும் ஜ்ஞானம் பூர்ணமாயிருந்து அதை அநுஷ்டிப்பவர்களுக்கும் விசேஷமுண்டு. அதாவது ப்ரக்ருதியின் குணங்களான ஸத்வ ரஜஸ் தமஸ்ஸுக்களால் செய்யப்படுகின்ற க்ரியைகளை யெல்லாம் ஜ்ஞானமிராதவர்கள் தாமே செய்வதாக எண்ணுவர். 27

१४७ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८ ॥

अथ विद्वान् यथाऽनुतिष्ठति तदाह । गुणकर्मविभागयोः । विभागशब्दो द्वन्द्वात्परत्वात् प्रत्येकमन्वीयते । गुणविभागः चतुर्दशाध्याये क्रियमाणः । कर्मविभागः सप्तदशेऽष्टादशे च । तयोः तत्त्ववित् तयोः यत् तत्त्वं याथार्थ्यं तद्वेत्तीति । एवं षष्ठीत्वे उपसर्जने तत्त्वेऽन्वयो वाच्यो भवति । अतः सप्तमीत्युचितम् । गुणविभागे कर्मविभागे च य तत्त्ववित् तद्विषयकयाथार्थ्यज्ञानवानित्यर्थः । एवंविधः पुरुषस्तु, गुणाः देहगतसत्त्वरजस्तमोरूपाः गुणेषु वर्तन्ते । अत्र अनन्वयात् 'गुणेषु इत्यस्य लक्षणया 'तत्कार्येषु' इत्यर्थो वाच्यः । 'सत्त्वं सुखे सञ्जयति' इत्यादिना चतुर्दशे गुणकार्याणि वक्ष्यन्ते । एवं गुणाः स्वकार्येषु वर्तन्त इति मत्वा न सज्जते । तेषु अहं कर्तेति मतिं न करोतीत्यर्थः । क्रियमाणेषु कर्मसु अहं कर्तेति मतिः अविदुषोऽस्ति । विदुषस्तु गुणकृतानि तानीति विवेकसत्त्वात् तथा मतिर्नास्तीति उभयोर्विशेषो द्वाभ्यां दर्शितः । एतेन विदुषः आत्मनि अकर्तृत्वस्य गुणेषु कर्तृत्वस्य चानुसन्धानमस्तीत्युक्तं भवति । इदं चानुसन्धानं 'आत्मन इदं कर्तृत्वं न स्वरूपप्रयुक्तम् । अपि तु गुणसम्पर्ककृतम् । अतो गुणा एव कर्तार इत्येवं रूपम् ।

குணங்களுடையவும் அவற்றின் கார்யங்களுடையவும் பாகுபாட்டின் உண்மையை அறிந்தவர்களோ வெனில் குணங்கள் அவற்றின் காரியங்களைச் செய்கின்றன வென்று எண்ணி அவற்றிற்குத் தாம் கர்த்தாக்கள் என்ற பற்றில்லாமலிருப்பார்கள். 28

१४८ प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥ २९ ॥

एवमनुसन्धानपुरस्सरं लोकसङ्ग्रहार्थं कर्मयोग एव ज्ञानयोगशक्तेनापि विदुषाऽनुष्ठेय इति पूर्वोक्तं स्मारयन्नाह–प्रकृतेर्गुणसम्मूढा इति । प्रकृतेर्ये गुणाः सत्त्वादयः तैः सम्मूढाः आत्मस्वरूपयाथात्म्यज्ञानरहिताः अविद्वांसः गुणकर्मसु उक्तरीत्या गुणैः क्रियमाणासु क्रियासु सज्जन्ते सक्ता भवन्ति, न तु प्रकृतिविविक्तात्मस्वरूपे । आत्मयाथात्म्यज्ञानविरहात् एषां ज्ञानयोगेऽधिकारो नास्तीति कर्मयोगाधिकारिण एव ते, इत्यभिप्रायः । एवंविधान् तान् अकृत्स्नविदः आत्मविषयककृत्स्नज्ञानरहितान् मन्दान् स्वयमाचारनिर्णयापाटवात् श्रेष्ठजनाचारानुवर्तिनः, कृत्स्नवित् आत्मविषयककृत्स्नज्ञानवान् विद्वान् न विचालयेत् स्वयं ज्ञानयोगानुष्ठानेन कर्मयोगात् प्रचलितमनसो न कुर्यात् । ते किल मन्दाः कर्मयोगपरित्यागिनं विद्वांसं दृष्ट्वा स्वयमपि तं परित्यजेयुः । अतः श्रेष्ठः स्वयमपि कर्मयोगे तिष्ठन् आत्मयाथात्म्यज्ञानेनात्मनोऽकर्तृत्वमनुसन्दधानः, कर्मयोग एवात्मावलोकने निरपेक्षसाधनमिति दर्शयित्वा तानकृत्स्नविदो जोषयेदित्यर्थः । ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगादस्यैव ज्यायस्त्वं पूर्वमेवोक्तम् । अतो व्यपदेश्यो लोकसङ्ग्रहायैतमेव कुर्यात् ।

*இப்படி ப்ரக்ருதியின் குணங்களால் தமது ஆத்மஸ்வரூபத்தைச் செவ்வையாக அறியாதவர்கள் கர்மாக்களையே பற்றி நிற்பார்களேயன்றி சுத்த ஆத்மஸ்வரூபத்தைப் பற்றமாட்டார்கள். ஆகையால் அவர்கள் ஜ்ஞானயோகத்தை அநுஷ்டிக்க முடியாது. கர்மயோகமே அவர்களுக்குரியது. ஆகையால் ஜ்ஞான யோகத்திற்குரிய அறிவாளி தான் ஜ்ஞானயோகத்தை அநுஷ்டிக்க முயன்று அவர்களுக்குக் கர்மயோகத்தில் அநாதரம் ஏற்படும்படிச் செய்யக்கூடாது. தானும் கர்மயோகத்தையே செய்து அவர்களுக்கும் அதில் பற்று உண்டாகும்படிச் செய்யவேண்டும்.* 29

१४९ मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

TIRUPATI. KENDRIYA SANSKRIT VIDYAPEETHA LIBRARY

एवं ज्ञानयोगाधिकारिणोऽपि लोकसङ्ग्रहार्थं कर्मयोगमनुतिष्ठतः केवलकर्मयोगाधिकारिणं तमेवानुतिष्ठन्तमपेक्ष्य विशेषमुक्त्वा कर्मयोगस्य लोकानुग्रहार्थतया कर्तव्यतोपदेशप्रकरणमुपसंहृतम् । अथाद्य विदुषः आत्मनोऽकर्तृत्वानुसन्धानेऽपरं विशिष्टं प्रकारमुपदिशति । मयि सर्वेश्वरे सर्वभूतान्तरात्मभूते । सर्वाणि कर्माणि । अध्यात्मचेतसा । आत्मनि अध्यात्मम् । अध्यात्मं चेतः अध्यात्मचेतः तेन । आत्मस्वरूपविषयेण श्रुतिशतसिद्धेन ज्ञानेनेत्यर्थः । सन्न्यस्य 'मयैव सर्वेश्वरेण तानि क्रियन्ते' अहमेव तेषां कर्ता' इत्यनुसन्धायेत्यर्थः । मच्छरीरतया मत्प्रवर्त्यो हि त्वम् । अतोऽहमेव मुख्यः कर्ता । निराशीः तानि कर्माणि मदाराधनानीति तेषां फले निरभिलाषः । अत एव हेतोः तेषु निर्ममः ममतारहितश्च भूत्वा प्राचीनानादिकालप्रवृत्तानन्तपापसञ्चयेन कथमहं भविष्यामीति एवंविधान्तर्ज्वरविमुक्तः युध्यस्व । इदं शास्त्रीयकर्मोपलक्षणम् । शास्त्रीयं सर्वं कर्म कुरु ।

एतेन "आत्मनां परमपुरुषशरीरतया तन्नियाम्यत्वस्वरूपनिरूपणेन भगवति पुरुषोत्तमे सर्वात्मभूते गुणकृतं च कर्तृत्वमारोप्य कर्म कर्तव्यमित्युक्तं भवति ।

பூர்ணமான ஆத்மஜ்ஞானத்தைப் பெற்று எல்லாக் கர்மாக்களையும் என்னிடத்தில் ஒப்படைத்து அதாவது நானே எல்லாக் கர்மாக்களுக்கும் கர்த்தா என்று எண்ணி பலத்தில் ஆசை வைக்காமலும் கர்மாக்கள் எனது என்று கருதாமலும் அநாதி காலமாக உண்டான பாபங்களால் இனி என்ன நேருமோ என்ற கவலையிராமலும் சாஸ்த்ரங்கள் விதித்த கர்மாக்களைச் செய்.

30

९५० ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

उक्तस्यार्थस्य प्राशस्त्यमाह । ये मानवाः शास्त्राधिकारिणः इदं मे मतं मयि सर्वाणि कर्माणि अध्यात्मचेतसा सन्न्यस्य निराशिषा निर्ममेन च पुंसा कर्म कर्तव्यमित्येतं मम सिद्धान्तं नित्यमनुतिष्ठन्ति । अयं भगवतः

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 5

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५५ जय - मकर [सं ५

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

JANUARY 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* **D.T. Tatacharya Siromani, M. O. L.**
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 कलिप्रादुर्भावम् ।
2 वरदाभ्युदयचम्पूः ।
3 मुकुन्दमाला ।
4 संस्कृतग्रन्थजातम् ।
5 वैदिका विशेषाः ।
6 यथाभिमतम् ।
7 प्रणयप्रवणौ ।
8 राष्ट्रभाषा ।
9 लोकनीतिः ।
10 पुस्तकपरामर्शः ।

॥ ॐ ॥

TIRUPATI

# कलिप्रादुर्भावम् ॥

निजकौटिल्यमहिमव्यत्यस्तक्षुण्णवर्त्मने ।
कालचक्राधराराय कलये बलिने नमः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः— विदितं वो यन्महालिङ्गकविः कलिप्रादुर्भावाख्यं लघ्वाख्यानकं विरच्य प्राचीकटत् । तदेवाद्य रूपकत्वेन परिवर्त्य स नः प्रयोजयति ।

सौन्दर्यसौष्ठववचःपरिशुद्धिभाञ्जि
प्रज्ञानुशीलितजगत्प्रतिसर्गवन्ति ।
यस्यादिकाव्यचरितप्रतिराजसूय-
श‍ृङ्गारनारदमुखान्यपि रूपकाणि ॥ २ ॥

[श्रुतिमभिनीय] आर्याः ! किं ब्रूथ—"कीदृशः कथोद्घातः" इति । ईदृशो ननु— पुरा द्वापरयुगस्यान्तिमे दिने विप्रः कश्चिदपेक्षकाय कस्मैचिद्वणिजे केदारखण्डमेकं विक्रीणीते स्म । स वैश्यो लाङ्गलेन क्षेत्रं विलिखन् महार्घं निधानमवाप । ब्रह्मस्वस्पर्शभीरुः सद्यो निधानकुम्भमादायोपेत्य सायं कृतानुष्ठानाय ब्राह्मणाय न्यवेदयत् ! ततश्च यदनुगतं तद्रूपके द्रक्ष्यथ । तेन हि इदानीम् ।

एतौ धर्मोर्जितं शीलं युगधर्मविशेषितम् ।
बिभ्रताविति कर्तव्यं विड्विप्रौ विचिकित्सतः ॥ ३ ॥

प्रस्तावना

(ततः प्रविशतः यथानिर्दिष्टौ विप्रवैश्यौ)

विप्रः— भद्र मा ते शङ्का भूत्। यदा मया क्षेत्रं विक्रीतं तदैव तदन्तर्गतं सर्वमपि त्वदायत्तीकृतम्। स्वयमङ्गी यदि गृह्येत का पुनरङ्गेषु विचिकित्सा। शिवं ते भूयात्। सपुत्रदारो यथेच्छमेतदुपभुङ्क्ष्व।

वैश्यः— ब्रह्मन्! इयं मनस्विता नाम। न तु धर्मोपन्यासः। क्षेत्रस्यैव मया मूल्यं दत्तम्। निधानमेतन्न भवता मम विक्रीतम्। नापि मया क्रीतम्। बहोः कालात् भवदुपभुक्ते क्षेत्रे भवतोऽप्यविदितं स्थितमेतद्दिष्ट्या चेन्मद्धस्ते लगति कुतो न स्वामिने निर्यातयामि। ब्रह्मस्वमेतदपजिहीर्षुरहं कीदृशीं दुर्गतिं नानुभोक्ष्ये। तत्सर्ववर्णानां गुरुर्भवान् मद्धितमनुसन्धातुमर्हति। अनुकम्पतां मामार्यः (इति ब्राह्मणस्य पादयोः पतति)।

विप्रः—(सप्रतिषेधम) भद्र! न युक्तं मामेवं निर्बन्धुम्। चिरान्मत्क्षेत्रे वर्तमानमप्येतन्निधानं न किल मे विधिना प्रतिपादितम्! त्वद्धस्तगते च स्वाम्ये तदुद्घाटितम् स्वहृदयमिव त्वयि प्रसन्नं दैवेन। तद्विरम वृथा निर्बन्धात्। सर्वथा तत्तवैव स्वम्। न मम नान्यस्य वा! सङ्क्रामिते मूल्यग्रहणात्परं क्षेत्रस्वाम्ये तदधिकृत्याहं यःकश्चिदुदासीन एव।

वैश्यः— स्वामिन्! न मे तुष्यत्यन्तरात्मा! अज्ञानेन दत्तं कथं दत्तं भवति! ब्रह्मस्वं मत्कुलं विनाशयेत्! नैव प्रत्याख्यातुमर्हति भवान्। अस्य निधानस्य स्वीकरणेन मामनुगृह्णातु।

विप्रः— भोः श्रद्धालो! अस्मिन्धर्मसङ्कटे महतः प्रतिभूकरिष्यामि। श्वः प्रभातमागम्यताम्। शिष्टानां वाचि तिष्ठावः।

वैश्यः— भवतु तावत्। यथा आर्यपादेभ्यो रोचते। किमपरं ब्रूतामयं जनः। (सकुम्भो निष्क्रान्तः)

विप्रः— अहो दैवगतिः। साधुरयं वैश्यश्चिरं सुखीभवतु। श्वः प्रातः शिष्टान् संमेल्य अस्य विस्रम्भं कारयिष्ये। (निष्क्रान्तः)

इति प्रथमोऽङ्कः।

## अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति आकाशे)

द्वापरः— अयं चार्धरात्रः । अवसितनियोगोऽस्मि । द्विपात् धर्मो मया चिराय निर्व्यूढः । पर्यन्ते तु विशीर्णप्राये मन्निर्वाहे दुःखमावासितोऽस्मि ।

दारुणं क्षत्रनिधनं प्रधने कुरुभूभुजाम् ।
अद्य च व्याधनिहतः कृष्णो रहयति क्षितिम् ॥ १ ॥

न क्षममतः परं त्रुटिमात्रमपि मे भुवनचक्रमावर्तयितुम् । (सहसा दृष्ट्वा) अहो मलीमसा दिशः । अकालमेघोन्नमनेन तिरोहितप्रकाशयोस्ताराचन्द्रमसोः व्योमान्धकारनिमीलितम् । पतन्त्युल्काः । वहन्ति पांसूत्किरा आवर्तमरुतः । विध्वस्तनीडाः प्रवेपन्ते शाखिनः । विक्रोशन्त्युलूकाः । भषन्ति श्वानः । विरुवन्ति फेरवाः । अहो प्रतिभयता अर्धरात्रस्य । तस्मादभिवर्तते कलिपुरुषः । अये स एव पुरतः ।

कलिपुरुषः— (साटोपं प्रविश्य)

प्रभूतभ्रमदुर्वारमर्थान्तर्नाभिवर्तनम् ।
आवर्तयामि मच्चक्रं द्वापरोपरतो भव ॥ २ ॥

द्वापरः— तथा ! (इति निष्क्रान्तः)

कलिपुरुषः—अहो नु भोः, एष द्वापरं प्रतिसमाप्य कलिपुरुषः कालदेशावाक्रामन् प्रविष्टोऽस्मि । तदितःप्रभृति मच्छासनात्—

अर्था निश्वसितं भवन्तु भविनां लुभ्यन्तु चेभ्याः परं
सन्तापं समुपाश्रितेषु ददतः कौटिल्यकुल्यायिताः ।
सङ्घेष्वात्तबलोदयाः प्रकृतयो द्रुह्यन्तु वृद्ध्यै मिथः
प्रत्येकं मतिविभ्रमैरगणितैर्धर्मो न निर्णीयताम् ॥ ३ ॥

क्षुभ्यन्तु वर्णाः स्वनियोगयोगात् परस्परोद्यद्धिनिकीर्णभावाः ।
समुन्मिषन्तु प्रमदा निहन्तुं कुलस्थितिं कूलरुजा इवापः ॥ ४ ॥

लोभेन प्रकृतिहिते नृपाः प्रतीपं वर्तन्तामवनिसुरा निकारभाजः ।
वर्णोनाः परिकलितप्रभावदृप्ता मात्सर्यप्रचुरफणाधराः स्फुरन्तु ॥ ५ ॥

(इति निष्क्रान्तः)

इति द्वितीयोऽङ्कः ।

---

## अथ तृतीयोऽङ्कः ।

[ततः प्रविशतः गृहान्तरगारे शयानौ वैश्यः तत्पत्नी च]

पत्नी— [प्रतिबुद्ध्य] हन्त किमेवमकस्मात् सवात्याफूत्कारो घनारवः। सर्वतो जलदवृन्दनिह्नुतप्रकाशमाकाशम् । अहो वृष्टिः। अहो वातः। नाथ उत्तिष्ठत। किं न पश्यथैतन्महावर्षम् ।

वैश्यः— [उत्थाय] अयि मातः कथं नु खलु सहसा प्रतिभयं जातम् । पावनं बत भोः । अस्मिन्नपि चैत्रे एवमपि नाम घनघटाटोपः। विद्युत्कशाभिहताविव वर्षवातौ गवाक्षद्वारादिकं प्रविविक्षू इव विघट्टयतः । इदमन्यदप्रतर्कितं दैवविक्रीडितम् यथाऽद्य मम निधानकुम्भोपलम्भः । प्रिये पश्य दिष्टस्य विचित्रताम् । कति संवत्सराणि विप्रकुटुम्बकेन केदारोऽयं नानुभूतफलः ? तथापि निधानं न तस्य हस्ते लग्नमासीत् । मुहूर्तमात्रस्वामिनोऽपि मम लघुचित्त इव रहस्यं तद्व्यवृणोत् ।

पत्नी— [सवैलक्ष्यं] एवं पक्षपातिनमपि विधिं विसंवदितुमिच्छत्यार्यः। तस्यानर्हमिति दैवेन प्रतिपाल्य दत्तं स्वं य एवं हातुं त्वरते । अहो विपरिणता आर्यस्य बुद्धिः य आकिञ्चिन्यधनस्य विप्रस्य वित्तोपबृंहणमिच्छन् आर्जनैकधर्मां निजवृत्तिं नापेक्षते । सर्वथा निधानलाभमेवं विप्रस्य प्रकाशयता आर्येण नानुमोदनक्षममाचरितम् ।

[1]त्वं यमुनाभेदनकृत्त्वदाश्रितो यस्त्वदीक्षणं धत्ते ।
तद्भ्रातृभेदकः स्यात्तत्पितृ[2]भेदनमपि क्षमः कर्तुम् ॥ ३९ ॥

[3]कृष्णोऽपि गोपीषु बहूपरक्तो भवांश्च तासां नयनैश्च पीतः ।
आपादयत्यर्जुनदीप्ति[4]मग्र्यामतो विदुस्त्वामिह विश्वरूपम् ॥ ४० ॥

[5]कृते त्वया कलिध्वंसे कृते च प्रकटीकृते ।
त्रेतां द्विजा ग्रहीष्यन्ति त्रियुग द्वापरोऽत्र न[6] ॥ ४१ ॥

एवं देवस्य चतुराननस्य स्तुत्या प्रसन्नः पन्नगपतिशयनो भगवान् स्वयं पुरस्सरसरस्वतीप्रवाहनिरोधाय तदभिमुखो मखपरिरिरक्षिषया जगदेकतुस्सेतुस्सेतूभूय शिश्ये ।

अम्भोवेगादध्वरविघ्नोदयभीत्या देवे खिन्ने पद्मभवे दीनदयालुः ।
सेतोर्बन्धे हन्त विलम्बो भवितेति क्षिप्रं सेतुस्सेतुकृदेव स्वयमासीत् ॥

धातुः क्रतुं त्रातुमभीतिहेतुस्सेतुर्यदासीत्पतगेन्द्रकेतुः ।
अतीव सा वेगवती सचिन्ता सती तदा[7]वेगवती बभूव ॥ ४३ ॥

---

1 हे बलरामरूप भगवन् ! त्वं यमुनाभेदनकृत् । त्वदाश्रितः त्वदीक्षणं यः धत्ते, सः तद्भ्रातृभेदकः, यमुनाभ्राता यमः, तद्भेदकः तद्बाधाभेदकः स्यात् । तथा तत्पितुरपि सूर्यस्यापि भेदनं कर्तुं समर्थः । ब्रह्मविदः निर्याणकाले सूर्यमण्डलभेदनस्य श्रुत्युक्तत्वात् । 2 पितुरपि भेदनं इति 'क' । 3 कृष्णः कृष्णवर्णः, कृष्णाख्यश्च । रक्तः रक्तवर्णः, अनुरागवांश्च । पीतः पीतवर्णः, सम्यक् वीक्षितश्च । अर्जुनकीर्तिं श्वेतकान्तिं, धनञ्जयस्य प्रसिद्धिं च । विश्वरूपं-अनेकवर्णं सर्वजगद्रूपं च । 4 दीप्तिपुष्टि इति 'क' । 5 हे त्रियुग ! त्वया कलिध्वंसे कलियुगध्वंसे कृते सति, कृते च कृतयुगे च प्रकटीकृते, द्विजाः त्रेतां अग्नित्रयं ग्रहीष्यन्ति । अत्र द्वापरः संशयः नास्ति । 6 नो इति 'क' । 7 तदोद्वेगवती, 'क' । तदावेगवती इति पाठे आवेगवतीति छेदः । आवेगः संभ्रमः ।

सन्दर्शनेनैव समस्तमंहस्संहर्तुमग्रे चतुरं स्फुरन्तम्।
दुरत्ययं सेतुमवेक्ष्य दिव्यं धुनीवरा दूरत एव तस्थौ ॥ ४४ ॥

तदानीं तु—

[1]अहरीशमण्डलकृतस्थितिमग्रावाप्तसत्कृतिं जगति।
अजलध्याकलितममुं त्वद्भुतसेतुं महर्षयो ददृशुः ॥ ४५ ॥

प्रणेमुश्चैवम्—

रमामुखाब्जभानवे समाश्रितद्युधेनवे
प्रकाशमानमूर्तये शुकादिगीतकीर्तये।
दयारसैकसिन्धवे भयार्तदीनबन्धवे
विमोहदोषहारिणे नमो यथोक्तकारिणे ॥ ४६ ॥

तुष्टुवुश्चैवम् —

अनुश्रवान्तचारिणे जनश्रमापहारिणे
[2]हिताहितावधीरिणे नताशयानुसारिणे।
रुचा घनानुकारिणे सुचारुरत्नधारिणे
तमोन्धयातुवैरिणे नमो यथोक्तकारिणे ॥ ४७ ॥

जय जय जगदीश जम्भवैरिप्रमुखमखाशनबृन्दवन्दिताङ्घ्रे।
हुतवहहुतदिव्यहव्यभागग्रहसफलीकृत[3]सप्तिसप्ततन्तो ॥ ४८ ॥

कोऽयं तवाश्रितजनेषु दयोदयो यत्
पाथस्विनीजनकपादपयोरुहोऽपि।
दासस्य धातुरवनौ सवनावनार्थं
दामोदर प्रतिरुणत्सि सरित्प्रवाहम् ॥ ४९ ॥

---

1 हरीशमण्डलेन-कपिश्रेष्ठसमूहेन, कृता स्थितिः यस्य, तद्भिन्नम्। अहरीशमण्डले-सूर्यमण्डले कृता स्थितिः येन तम्। ग्रावभिः-पाषाणैः आप्ता-सत्कृतिः-सम्यक्करणं यस्य तद्भिन्नम् अग्रे प्रथमतोवाप्ता सत्कृतिः-पूजा येन तं, सर्वोत्तमत्वेन अग्रपूजाविषयम्। जलधौ समुद्रे-आकलितः बद्धः तद्भिन्नम्। लडयोरभेदात् अजडधीभिः आकलितं ध्यातम्। प्रसिद्धसेतुवैलक्षण्याद्द्भुतसेतुमिति। 2 हितानां आश्रितानां अहितानि अवधीरयति-तिरस्करोतीत्यर्थः। 3 भक्त इति 'क'।

इह [1]बहुमुखवाहिनीमरौत्सीद्युवतिकृते सरसीरुहाक्ष पूर्वम् ।
प्रणतसुरतरो भवान् दयालुस्तनयकृते निरुणद्धि तामिदानीम् ॥ ५० ॥

[2]विधिरयमवितानस्यादविता न स्याद्भवान्यदि मुरारे ।
अध्वरहित एवासीदध्वरहितमैक्ष्य(मेत्य)[3] सैन्धवरयस्त्वाम् ॥ ५१ ॥

अत्यल्पहानिमधिकप्रतिलाभमिच्छ-
न्नङ्गीकरोतिविति नयोपदिदिक्षयेव ।
वेधोश्वमेधमखविघ्ननिरोधहेतो-
स्त्वं [4]सर्वतोमुखविघातमुरीकरोषि ॥

इत्यादिकया स्तुत्या वेगवत्यास्सेतुं नारायणमाराध्य तत आराद्धया-
यन्तं भगवन्तमरविन्दजं प्रत्युदन्तमेतं निवेदयन्तो मुनयः प्रशशंसुः ।

विष्णौ [5]भक्तिविपक्तिरुक्तिपदवीमत्येति सत्येश ते
यस्मात्त्वन्मखविघ्नसंभवपरीहाराय नारायणः ।
सेतूभूय दयारसैकनिलयस्सिन्धोस्स्वबन्धोः पुरः
पर्यङ्के फणिरत्नदिव्यसुषुमोपेते स शेते स्वयम् ॥ ५३ ॥

वचनमिदमृषीणां वल्गु सर्गाधिकारी
श्रुतिपथमुपनीय क्षिप्रमुत्थाय हृष्टः ।
नतिनुतिततिभिस्तं नागभोगे शयानं
मुनिविबुधसमेतो मोदयामास देवम् ॥ ५४ ॥

---

1 बहुमुखः रावणः । तस्य वाहिनी, सेना । युवतिकृते सीताकृते । तनयकृते चतुर्मुखकृते । 2 बहुमुखवाहिनीं, जलपूर्णां नदीम् । मुरारे! भवान् अविता रक्षकः यदि न स्यात्, अयं विधिः ब्रह्मा अवितानः-यागरहितः स्यात् अध्वरहितं यागानुकूलं त्वां ऐक्ष्य (एत्य) सैन्धवरयः वेगवतीवेगः अध्वरहित एवासीत् मार्गरहित एवासी-दित्यर्थः । 3 सिन्धुपूरस्त्वाम् इति 'क' । 4 सर्वतोमुखविघातं सर्वतोमुखस्य-तन्नाम्नः यागस्य जलस्य च । 5 विष्णोः इति मुद्रित-पाठः ।

तदनु तदनुमत्या तत्र[1]द्रूने विरिञ्चे
पुरुपद्दयतुष्ट्यै पूरणं कर्तुकामे ।
श्रुतिषु तुरगमेधे चोदितं यद्यदङ्गं
तदखिलमपि कर्तुं तापसास्ते प्रवृत्ताः ॥ ५५ ॥

इति श्रीवेङ्कटाचार्यदीक्षितकृते वरदाभ्युदये चम्पूप्रबन्धे
द्वितीयो विलासः ॥

---

## तृतीयो विलासः ।

हयमेधयज्ञनियमे दयालुना परमेण विघ्नविरमेण योजिते ।
मुदितं प्रतीदमुदितं महर्षयो जगदुर्विधिं त्रिजगदुत्सवैषिणः ॥ १ ॥

भगवन् अम्बुजसंभव ! भवतः पत्नी या नदीरूपा समुपागता तया याग: परिपूरणीयः । सेयं शुक्तिकापम्पादिरूपेण सप्तधा भूत्वा सरसीरुहाक्षानुमत्या सागरमुपगच्छतीति । ओमिति ब्रह्मणाऽनुज्ञाता वसिष्ठादयो मुनिवरिष्ठाः भगवन्तमनन्तशायिनं दक्षिणेन प्रवहन्तीं वेगवतीमधिगम्य सम्यक्प्रणम्य सरस्वतीमित्थमामन्त्रयामासुः ॥

देवि प्रोत्तिष्ठ नद्यास्सरभसमुदकाद्दुग्धसिन्धोरिव श्री-
रास्माकीरम्ब ! दृष्टीस्सफलय कलय स्वानुकम्पामकम्पाम् ।
वेधःपत्नि ! प्रसादं कुरु जहिहि रुषं विन्द वैतानशालां
दत्तं सिन्धुष्वशेषास्वपि नलिनभुवा तुभ्यमभ्यर्हितत्वम् ॥ २ ॥

एवं निवेदितवतामृषिपुङ्गवानां
प्रादुर्बभूव पुरतो झरतोऽथ नद्याः ।
अत्यद्भुतद्युतिभिराभरणप्रकाण्डै-
राभूषिता मणिमयैस्सुदृगब्जसूतेः ॥ ३ ॥

शैवालौघं दधाना चिकुरभरमयं चक्षुराख्यौ च मीनौ
राजी वै राजमाना पदवदनकरद्वन्द्वरूपैः प्रफुल्लैः ।
आवर्तं नाभिसंज्ञं पृथुलकुचमयं बिभ्रती कोकयुग्मं
धुन्यामन्या धुनीव द्रुहिणसहचरी दूरतस्तैर्लुलोके ॥ ४ ॥

---

1 मान्ये, इति 'क' ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २८] कलि ५०५५ जय - मकर साधारण [सं ५

# मुकुन्दमाला ॥

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तकप्रकामम् ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ॥ ६ ॥

अथ भगवानाह — प्रिय कुलशेखर, मोक्षफलाय भक्तिं न करिष्यसि चेत् अनादिकालसञ्चितं कर्म उत्तरोत्तरं स्वफलं ददद्देव भविष्यति। तत्र 'यद्यद् भव्यं तत्तत् पूर्वकर्मानुरूपं भवतु' इति भवान् ब्रवीति – एवं वदन् भवान् अस्मिन् भूलोके यज्जन्म यच्च सुखदुःखानुभवनं तन्मात्रं बुद्धौ करोतीति भाति। न हि कर्म भूलोकमात्रे फलजनकम्। लोकान्तराण्यपि हि सन्ति। तेष्वपि कर्मफलान्यनुभूयन्ते। तत्र नरकलोकप्राप्तौ का नाम भवतः स्थितिर्भवेत्। किं तत् सम्यगचिन्ति ?

एवं पृष्टः कुलशेखर आह— दिवि वा भुवि वा नरके वा मम वासः प्रकाममस्तु। यथा दुःखमिश्रसुखवति अस्मिन् भूलोके वासं प्रति अहं निश्चिन्तः ; दुःखसत्त्वेऽपि सुखसङ्गातिशयेन नान्तरीयकं दुःखं सह्यमिति हि तत्र नातीव चिन्ता भवति। यथा च केवलसुखवति स्वर्गलोके वासं प्रति कापि न चिन्ता, दुःखसामान्यविरहात्, तथैव नरकलोके वासं प्रत्यपि सर्वथा मे चिन्ता नास्ति। तत्रत्यं तीव्रतममपि दुःखमनुभवितुमहं सज्जः। तस्मात् तत्र वासो मे प्रकामं भवतु। परिपूर्णेन मनसा तदहं

अनुमन्ये। नरकान्तक नरकासुरवधकारिन् भगवन् त्वं सर्वलोकरक्षकः। त्वया क्रियमाणं रक्षणं बहुविधं भवति। प्रार्थितं दत्त्वा कांश्चिद्रक्षसि। आशीविषग्रहणोत्सुकस्य अर्भकस्य मातेव केषांश्चित् अभिमतमपूरयित्वा तान् रक्षसि। आर्तानां शस्त्रचिकित्साकारी भिषगिव केषांचिदतितीव्रं दुःखमुत्पाद्य रक्षणं करोषि। उत्कटापराधान् राजेव वधकरणेन रक्षसि। त्वं सर्वलोकरक्षकः। त्वया क्रियमाणं सर्वं रक्षणमेव। नरकस्य असुरस्य अन्तकस्त्वमभूः। तदन्तकरणं तस्य रक्षणमेव। तद्वत् मां नरके यदि पातयिष्यसि तन्मे रक्षणमेव। नरके वेदनाऽनुभवहेतोः कर्मणोऽनुभवेन विनाशे सति तदितरकर्मफलभूतसुखविशेषानुभवाय स्वर्गं नेष्यन् नरकस्यान्तं करिष्यस्येव। तस्मादिह भेतव्यं वा चिन्तापदं वा किमपि नास्ति।

पुनर्भगवानाह— नरकवेदना ईदृशीति इदानीं त्वं न जानासि। तेनैवं बालवत् किमपि भाषसे। अप्राप्तवृश्चिकदंशाः तद्वेदनां यथावन्न जानन्ति। का वेदना लोके असह्या इति गम्भीरं भाषन्ते। कदाचित् दंशे जाते तदा ते बुध्यन्ते।

कुलशेखरः— प्रत्याह— सत्यमेतद् यद् भगवान् ब्रवीति। किन्तु केषाञ्चन देहसंस्थानं तादृशं भवति यत्र तीव्रमपि वृश्चिकविषं निर्वीर्यं भवति। ते वृश्चिकदष्टाः केवलं हसन्ति।

भगवान्— तथा ते नरकवेदना अपीडाकारीति किं मन्यसे?

कुलशेखरः— आम्।

भगवान्— कथम्?

कुलशेखरः—'चरणौ ते चिन्तयामि। तच्चिन्तनमहिम्ना या काऽपि वेदना न मां बाधिष्यते।

भगवान्— दुःखे उत्पन्ने तदनुभवः मच्चरणचिन्तनात् कथं निवर्तेत?

कुलशेखरः—आः किं ब्रवीषि कथं निवर्तेतेति। भवच्चरणौ हि 'अवधीरितशारदारविन्दौ, परमभोग्यौ। तच्चिन्तनं सर्वाङ्गीणं परमं सुखं जनयति। तत्र विलीनं मनः अनुकूलं प्रतिकूलं वा कं नाम अन्यं विषयं ग्रहीतुं शक्नुयात्? प्रसिद्धं ह्येतत् तत्स्मृत्याह्लादसंस्थितः न विवेदात्मनो दुःखं दश्यमानो महोरगैः? इति प्रह्लादे।

भगवान्— प्रिय कुलशेखर, निपुणं भाषसे। इदमन्यत् पृच्छामि। इदानीं त्वं मां चिन्तयसि। तेन कथं नरकवेदनाऽनुभवस्य वारणं भविष्यति। तदानीं मच्चिन्तनं ते भवति न वा।

कुलशेखरः— न तथा भगवन्। तदानीमपि मे भवच्चरणचिन्तनं भवत्येव। तथा हि मे दृढः सङ्कल्पः— मरणेऽपि चिन्तयामि, इति। मरणे वृत्तेऽपि स्वर्गं वा नरकं वा गतोऽपि चिन्तयाम्येव। तेन मे दुःखवेदनं न भविष्यति।

---

# संस्कृतग्रन्थजातम् ॥

—:o:—

## अथर्ववेदीया उपनिषदः।

आसां सङ्ख्या न निश्चिता। प्रायः उपशताः उपनिषदस्सन्ति। तत्र तु प्रमाणत्वेन शास्त्रकारैस्सर्वैः अभ्युपगताः सप्तविंशतिः इत्याहुः। तत्रापि तिस्रो विना अन्यास्सर्वाः पुराणसमकाला इति विमर्शकानां मतिः। अल्लोपनिषत् इति तुरुष्कदैवतनाम्ना प्रसिद्धा काचिदुपनिषदत्र दृश्यमाना। आसां सर्वासामेवोपनिषदां प्रामाण्यं शिथिलयति। त्रयीसंबन्धिनीनां उपनिषदां प्रायेण तत्तच्छाखानुसारेण अभिधाने प्रसिद्धे अथर्ववेदीयानां प्रतिपाद्यविषयानुसारेण, एवमादिना प्रकारान्तरेण च अभिधानं भवतीत्यपि इह चिन्तनीयम्। उपनिषदन्तरेष्विव इह न कर्मकाण्डेन सहजसिद्धः कश्चन संबन्धो दृश्यते। किं तु वेदान्तरावलम्बिनां यथा उपनिषदस्सन्ति। तथा अस्माकमपि काभिश्चिद्भवितव्यमित्यभिप्रायेण एतद्वेदावलम्बिभिः कथञ्चित्संपादिताः इमा इति च वदन्ति।

उपनिषदन्तरेषु उपदिश्यमानं तत्त्वं इह भिन्नभिन्नप्रस्थानाश्रयेण विस्तीर्यते। एतदनुसारेण इमा उपनिषदः चतुर्धा विभक्तुं शक्यन्ते। तत्र प्रथमो राशिः उपनिषदन्तराणीव आत्मतत्त्वविवेचनपरः। द्वितीयः प्रणवाश्रयेण योगाभ्यासविधिपरः। अयं राशिः प्रायः छन्दोबद्धः। तृतीयो राशिः सन्न्यासविधिपरः। इमा अपि उपनिषदः अदीर्घाः। किन्तु पद्यमिश्रगद्यमय्यः। चतुर्थो राशिः तत्तद्देवताविशेषमात्रपरः। यथा

काश्चित् शिवप्राधान्यवादिन्यः । अपराः नृसिंहादिरूपेण विष्णुप्राधान्यवादिन्य इति । तत्र प्रथमराशौ अन्तर्भूता प्राचीनतमा च अथर्ववेदीया उपनिषत् मुण्डकाभिधाना । प्रश्नोपनिषदपि एवंविधैव । आभ्यः किञ्चिदवरं पदं माण्डूक्योपनिषदः नवीनाः ददति । मुण्डितशिरस्कैः अध्येयत्वात् मुण्डकमिति नामेति मन्यन्ते । अत्र छान्दोग्यबृहदारण्यकतैत्तिरीयकाठकोपनिषदां उपजीवनं दृश्यते । तथापि विषयाणामतिविशदं प्रतिपादनात् अत्र सर्वेषां महान् आदर इति नवीनाः लिखन्ति । त्रयोऽत्र भागाः । एषु ब्रह्मविद्याधिगमाय कर्तव्यं, ब्रह्मस्वरूपं, तत्प्राप्त्युपायश्च उपदिश्यते । प्रश्नोपनिषदि षण्णां ब्रह्मविद्यार्थिनां प्रश्नाः तत्समाधानरूपेण पिप्पलादेन आचार्येण कृता उपदेशाश्च निबध्यन्ते । एवं प्रश्नोत्तररूपत्वादेव तथा नाम ।

अथ माण्डूक्योपनिषत् । अत्यल्पग्रन्था विषयेषु बहुधा मैत्रायणीयोपनिषदा तुल्या । अत एव ततोऽर्वाचीना । अत्र प्राधान्येन प्रणवमाश्रित्य उपदेशः प्रवर्तते । अस्या उपनिषदः उदाहरणं अद्वैतभाष्ये क्वापि न दृश्यते, इत्येतदवधेयमित्याहुः । अथापि श्रीशङ्कराचार्यप्राचार्यगौडपादकृतायाः 'गौडपादकारिका' इति प्रसिद्धायाः द्विशतीश्लोकवत्याः कृतेः चतुर्षु भागेषु प्रथमे भागे इयमन्तर्भाविता । अद्वैतमार्गस्य बीजभूता अंशाः आसु गौडपादकारिकासु निबद्धाः । त एवांशाः पश्चात् अद्वैतभाष्यकारैः सुपरिष्कृताः, इति नवीना मन्यन्ते ।

समस्तसंसारक्लेशपरिहारोपायप्रदर्शकत्वात् उपनिषादयन्ति अत्यन्तं संसारक्लेशं नाशयन्ति इत्यनया व्युत्पत्त्या एषां ग्रन्थानां उपनिषदित्यभिधानमिति केचित् एतत्पदव्युत्पत्तिमाहुः । अपरे पुनः सर्वस्यापि वेदस्य "वेदैश्च सर्वैरहमेव वेद्यः" इत्यनया रीत्या ब्रह्मप्रतिपादकत्वेऽपि पूर्वकाण्डस्य अग्नीन्द्रादिदेवताद्वारा ब्रह्मप्रतिपादकत्वम् । एषां तु ग्रन्थानां साक्षादेव ब्रह्मप्रतिपादकत्वमस्तीति इदं वैलक्षण्यमभिप्रेत्य उपसाक्षात् निषीदति प्रतिपादकतया वर्तते इत्युपनिषदभिधानमित्याहुः । प्रकारान्तरं तु नवीनाः प्रदर्शयन्ति । गुरोः सकाशे एकान्ते निषण्णैः शिष्यैः ग्राह्यत्वादत्र उपदिश्यमानस्य तत्त्वस्य इमा उपनिषद इति ।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

## वरत्रयम् ।

काठकद्वितीयप्रपाठकाष्टमानुवाके विद्यमानानि 'उशन् ह वै वाजश्रवसस्सर्ववेदसं ददौ । .... अपपुनर्मृत्युं जयति । योऽग्निर्नाचिकेतं चिनुते । य उचैनमेवं वेद ।' इति वाक्यानि सायनाचार्यभाष्ये 'अष्टमे ब्रह्मलोकप्राप्तिलक्षणस्य तत्फलस्य मृत्युराहित्यमुपाख्यानेन दर्शयति ।' इत्यवतार्य व्याख्यायन्त । अत्रैवमुपाख्यानम् — 'फलं कामयमानो दानादिकर्मभूतान्न लब्धयशस्कतया वाजश्रवोऽभिधानस्य कस्यचिन्मुनेस्सूनुरुद्दालकाख्य ऋषिस्सर्वस्वदक्षिणेन विश्वजिता यजमानस्तस्मिन्क्रतौ सर्वस्वमृत्विग्भ्यो ददौ । तस्य नचिकेतोनामकः पुत्र आसीत् । तं बालमेव सन्तमृत्विग्भ्यो दक्षिणासु गोषु पित्रा दीयमानासु सतीषु जनकहितकामनाप्रयुक्ताऽऽस्तिक्यबुद्धिराविवेश । स कुमारः कर्मसाद्गुण्यार्थं पित्रा सर्वस्वं दातव्यमहं च पितुः स्वं तस्माद्दातव्योऽहमिति निश्चित्य पितरं प्रति 'हे तात' कस्मा ऋत्विजे दक्षिणात्वेन मान्दास्यसीत्युवाच । तदानीं बालोऽयं मुग्ध इति तद्वचनमुपेक्ष्य तूष्णीं स्थितं पितरं प्रति द्वितीयं तृतीयं वारं च कस्मै मान्दास्यसीत्याचख्यौ च । बहु निर्बध्यमानः पिता अयं तावन्मुग्धो न भवति किन्तु धूर्त इत्येवं कुपितस्सन् तदाभिमुख्येन पर्यावृत्तः कोपावेशात् मृत्यवे त्वा ददामीति तं कुमारं जगाद । अस्मिन्नवसरे कोपयुक्तं पितुः तद्वचनं श्रुत्वा पितुस्सकाशात्परतो गन्तुमुत्थितं कुमारमभिमुखीकृत्यादृश्यमानशरीराऽनुग्रहपरा दैवीवागेवं वदति स्म—"हे गौतमगोत्रोत्पन्न नचिकेतः स खलु तव पिता त्वां प्रति 'हे तनय मृत्योर्गृहान् गच्छ मृत्यवे त्वामहमदाम्' इति व्याजहार" इति ।

इत्थं तत्पितुरभिप्रायं विशदीकृत्य सा वाग्देवता कुमारमनुगृहीतुमेवमुपादिशत्— 'हे नचिकेतः यमो यदा गृहान्निर्गत्य यत्र क्वापि प्रवसति तदा तद्भवनं याहि । तस्य निकेतने तदीयात्मजभार्यादिभिः प्रार्थितोऽपि त्वं दिनत्रयमनाश्वान् वस । तावता समागत्य स यमस्त्वां प्रति 'हे कुमार कति रात्रीरिहावात्सीः' इति यदि पृच्छेत् तदानीं तिस्र इत्युत्तरं ब्रूहि ।

ततः प्रथमद्वितीयतृतीयदिनेषु किं किमाश्नाः इति पृष्टस्सन् 'त्वदीयाः प्रजा पशुसाधुकृत्यास्तेषु क्रमेणाभक्षयमिति प्रतिवद ।' इति । अत्र भाष्यकारः 'अतिथिर्गृहे समागत्य भोजनरहितो वसति चेत्तस्य गृहस्वामिन एकदिनभोजनराहित्यमात्रेण प्रजाक्षयो भवतीत्येतच्छास्त्ररहस्यं तेन वाक्येन सूचितं भवति। एवं द्वितीयतृतीयदिवसयोरुपवासेन पशुक्षयं सुकृतक्षयं चासूचयत्' इत्यभाषत । एवं वाग्देवतया शिक्षितो नचिकेतास्तथैव चकार । यम एतावता शास्त्रार्थरहस्याभिज्ञोऽयं कुमारो न तु मूर्खस्तस्मात्सत्कारार्हो न मारणीय इत्येवं निर्धार्य 'उत्पत्तिं प्रळयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥' इत्येतच्छास्त्रानुसारेण, नचिकेतसमभिज्ञं मत्वा भगवच्छब्देन सम्बोध्य ते नमोऽस्त्विवत्युदित्वा वरं वृणीष्वेत्यब्रवीत्। अत्र भाष्यकारः (यमः) 'दिनत्रयोपवासकृतं स्वापराधं परिहर्तुं वरत्रयं दत्तवान् । सोऽयमर्थः कठवल्लीष्वस्मिन्नेव नाचिकेतोपाख्याने विस्पष्टमाम्नातः, 'तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः। नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान् वृणीष्व ॥' इति।' प्रतिशब्देन प्रतिदिनोपवासनिमित्तापराधपरिहारायेत्ययमर्थ उच्यते ।' इत्याचष्ट । अथ नचिकेता यमे 'हे यम त्वयाहममारितो जीवन्नेव मदीयं पितरं प्राप्नवानि' इति प्रथमं वरमवृणीत। तदनुमृत्युना द्वितीयवरार्थं प्रार्थितोऽयं कुमारो मदीययोः श्रौतस्मार्तसुकृतयोरक्षयहेतुं भणेत्येतादृशं वरं वव्रे । ततो वैवस्वतस्तस्मै नचिकेतसे पूर्वानुवाकेष्वभिहितं चयनमुपास्यं च द्विविधं नाचिकेतनामाङ्कितमग्निमगदत्। अत्र भाष्यकारः "तन्नामाङ्कितत्वं कठवल्लीषु स्पष्टीकृतम् । 'एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण । एतमग्निं तवैव प्रवक्ष्यन्ति जनासः' इति" इत्यभ्यधत्त । उपासनोपसर्जनकान्नाचिकेताग्नेश्चयनान्नचिकेतसः श्रौतस्मार्तसुकृते अल्पफले न भवतः । नचिकेतसोऽन्यो यो नाचिकेताग्निश्चयनं मुख्यत्वेनोपासनमप्राधान्येन चानुतिष्ठति अस्यापि श्रौतस्मार्तसुकृते नाल्पफले भवतः । ततो मृत्युस्तृतीयं वरं वृणीष्वेति नचिकेतसमकथयत् । पश्चान्नचिकेतामृत्युमुद्दिश्य मे पुनर्मृत्योरपजयस्य कारणमभिधेहीत्युदैरयत् । अनन्तरमन्तक एवं वृणानाय नचिकेतसे पुनर्मृत्युजयहेतुत्वेनैतमेव द्विविधं नाचिकेताग्निमाह स्म। तस्मादेव चयनोपसर्जनकान्नाचिकेताग्नेरुपासनान्नचिकेताः पुनर्मृत्युं जिगाय । नचि-

केतसोऽन्यो यो नाचिकेताग्नेश्चयनमप्राधान्येनोपासनं मुख्यतया च करोति सोऽपि पुनर्मृत्युं जयति' इति ।

अत्र भाष्यकृत् 'वर्तमानस्य मनुष्यशरीरस्य सकृन्मृत्युरवश्यम्भावी। तदूर्ध्वं पुनरप्यर्वाचीनजन्मस्वीकारे सति पुनर्मृत्युर्भवति। जन्मस्वीकारं विना मुक्तौ सत्यां सोऽयं पुनर्मृत्युरपक्षीयते । मृत्योरपजयः पुरुषस्यैव जयः' इति वाक्यैः पुनर्मृत्योरपजयस्य स्वरूपं 'चयनोपासनयोर्मध्ये चयनस्य प्राधान्यमुपासनस्योपसर्जनत्वं यस्य पुंसः सम्पद्यते तस्येष्टापूर्तयोरक्षयत्वमात्रम् । चिरं पुण्यलोकमनुभूय पुनर्जन्मस्वीकारः । यस्य तूपासनं प्रधानं चयनमुपसर्जनं तस्य ब्रह्मलोकप्राप्तिद्वारा मुक्तिरेव न तु जन्मान्तरम् ।' इति वाक्यैर्द्वितीयतृतीयवरयोर्विभागं च प्रादर्शयत् । कठोपनिषदि प्रथमवल्ल्यां 'शान्तसङ्कल्पः ... ... प्रथमं वरं वृणे ॥' इति मन्त्रेण प्रथमवरः, 'स्वर्गे लोके न भयं ... ... स्वर्गलोके ॥ सत्वमग्निं ... ... एतद् द्वितीयेन वृणे वरेण ॥' इति मन्त्रद्वयेन द्वितीयवरः, 'येयं प्रेते विचिकित्सा ... ... वराणामेष वरस्तृतीयः ॥' इति मन्त्रेण तृतीयवरः, द्वितीयवरानुसारेणोपदिष्टेऽर्थे शिष्यस्य नचिकेतसो ग्रहणसामर्थ्यस्य दर्शनेन सन्तुष्टेन मृत्युना तस्य प्रार्थनां विनापि तस्मै दत्तः 'तमब्रवीत्प्रीयमाणो महात्मा ...... सृङ्कां चेमामनेकरूपां गृहाण ॥' इति मन्त्रेण चतुर्थो वरश्च प्रत्यपाद्यन्त। श्रीभाष्यकारैः 'त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ' इति ब्रह्मसूत्रस्य श्रीभाष्ये 'नचिकेता मुमुक्षुस्सन् मृत्युप्रत्ते वरत्रये प्रथमेन वरेणात्मनः पुरुषार्थयोग्यतापादिनीमात्मनि पितुस्सुमनस्कतां प्रतिलभ्य, द्वितीयेन वरेण (अपुनर्भवहेतुभूतब्रह्मोपासनद्वारा) मोक्षोपायभूतां नाचिकेताग्निविद्यां वव्रे। ... .... तृतीयेन वरेण मोक्षस्वरूपप्रश्नद्वारेणोपेयस्वरूपमुपेतृस्वरूपमुपायभूतकर्मानुगृहीतोपासनस्वरूपं च पृष्टम् । इत्यभाष्यत। काठकोक्तवरत्रयप्रश्नानां कठोपनिषदुदितवरत्रयप्रश्नानां च समानविषयत्वं तु काठके कठोपनिषदि च प्रथमवरयोर्नचिकेतसा पितुः प्राप्तेर्वृतत्वात् द्वितीयवरयोरर्वाचीनफलोपायस्य तृतीयवरयोर्मोक्षसाधनस्य च प्रश्नाच्च घटत एव ।

---

पेक्सपिअर् कृतम्

# यथाभिमतम् ॥ [V. 4 अनुवृत्तम्

प्रविशन्ति हैमेन्, रोसलिन्द्, सिलिआ च।

गीतम्

हैमेन् — अर्थेषु भौमेषु समीकृतेषु
सुस्थेषु दिव्यस्ति महान् प्रमोदः।
प्रतीच्छ राजन् तनयां त्वदीयां
*हैमन्त्रिमामानयति स्म नाकात् ॥
यस्येयमास्ते हृदि पाणिमस्या-
स्तत्पाणिना सङ्गमयिष्यसीति ॥

रोसलिन्द् — (राजानं प्रति) तुभ्यमहमात्मानमर्पयामि, यतोऽहं त्वदीया।

(आर्लण्डो-इमं प्रति) तुभ्यमहमात्मानमर्पयामि, यतोऽहं त्वदीया।

राजा — आकृतिर्यदि विश्वसनीया, त्वं मम पुत्री।

आर्लण्डो — आकृतिर्यदि विश्वसनीया, त्वं मदीया रोसलिन्द्।

पीबी — यदि आकृतिः लिङ्गं च विश्वसनीयं तर्हि मम मनोरथ, सुखी भव। आपृच्छस्व माम्।

रोसलिन्द्— (राजानं प्रति) न मे अन्यः पिता भवति, यदि त्वं न सः।

(आर्लण्डो-इमं प्रति) न मेऽन्यः पतिर्भवति यदि त्वं न सः।

(पीबी—इमां प्रति) न च स्त्रियं परिणेष्यामि यदि त्वं न सा।

हैमेन् — शान्तिर्भोः, आकुलतामहमपनेष्यामि निश्शेषाम्।
एषु विचित्रेष्वर्थेष्ववधारणमञ्जसा मया कार्यम् ॥
अत्रामी सन्त्यष्टौ यैः पाणिग्रहणमद्य कर्तव्यम्।
परमार्थो यदि परमार्थो हैमेन् गोष्ठी प्रवेशलाभाय ॥
(आर्लण्डो-रोसलिन्द्-इमौ प्रति)
त्वं च त्वं च प्राप्तं नो विभेदम्।

---

* अयं विवाहसम्बन्धी देव इत्याहुः।

(आलिवर-सिलिआ-इमौ प्रति)
त्वं च त्वं च प्रेमसम्पृक्तचित्तौ ॥

(पीवी-इमां प्रति)
वर्तस्व त्वं तस्य कामानुरूपं
यद्वा नारीं कान्तभावे वृणीष्व ।

(निकषोफल-आद्री-इमौ प्रति)
त्वं च त्वं च प्रस्फुटान्योन्यबन्धौ
यद्वत् प्रावृट् निष्प्रभं दुर्दिनं च ॥

अस्मासु गायत्सु विवाहमङ्गलं
परस्परालापरसोऽनुभूयताम् ।
सञ्जापतो ह्रासमुपैति विस्मयो
यत्सङ्गमोऽसौ चरितार्थता च नः ॥

गीतम्

§ जूनो-किरीटो हि मतो विवाह
आहारशय्या विषयः सुबन्धः ।
हैमन् पुरीः पूरयति प्रजाभि-
स्ततो विवाहो बहुमाननार्हः ॥
जय हैमन् पुरां देव
जय त्वं विजयी भव ॥

राजा— वत्से भ्रातृपुत्रि, प्रीतोऽस्मि ते मदभ्यागमनात् । साक्षात् पुत्र्येव त्वम् । त्वदागमनात् तावती मे प्रीतिः, न मनागप्यल्पा ।

पीवी— नाहं मिथ्याप्रतिज्ञा भविष्यामि । अद्य त्वं मदीयोऽसि । (सिल्विअस् इमं प्रति) त्वदीयो भावबन्धः मम मनोरथान् त्वयि सम्बध्नाति ।

---

§ विवाहेषु स्त्रीणां पालयित्री देवता ।

॥ श्रीः ॥

# प्रणयप्रवणौ ॥

भासः।

सायङ्काले व्यावृत्तलौकिकव्यापारोऽहं यत्र कुत्रापि बहिर्गन्तुकामः कान्तां मे किञ्चिदिव उच्चैराह्वयम् – "अयि कान्ते... ! कान्ते... !"

पाककोष्ठात् स्वहस्तधृतेन भक्ष्येण सह द्रुतपदं आपतन्त्या मे दयिताया मुखभावं वीक्ष्याहं मदीक्षणं तदीक्षणादन्यत्र चालयन्नासम्।

"कथमेवं कान्ते कान्त इति तारमाह्वयथ ?"

अतिकुपितेव सा मामिदमुक्त्वा मदुत्तरं प्रतीक्षमाणा स्थिता।

"अयि कोपने ! तव कान्तः स्वकान्तां तारमाह्वयति, भृशमनुधावति, प्रसह्य समाकर्षतीत्यत्र किमिव लोके चित्रम् ?"

"अलमुपहासेन। परश्रुतिविषयादालापात् परोक्षप्रियकरणमेव सरसम्"

"युज्यते। परोक्षप्रियं ते प्रत्यक्षीकर्तुं सद्य एवाहं सन्नद्धः" इति वदन्नेवाहं भूमौ भक्ष्यं निधाय पाणिना तस्याः हस्तमवलम्ब्य आकृष्टवान्। झटिति सा स्वहस्तमाकृष्य द्रुतं पलायिता। यदा सा पुनरुपचाराय भक्ष्यहस्ता मत्सकाशमागता तदा, स्वदयितमृदिता नवोढेव स्मेरानना अपाङ्गेन मां अनङ्गसुखे मज्जयति स्म।

बहिर्गमनाय प्रसाधनादिकं परिसमाप्य सा मत्समीपमागता। तदानीमेवाहं आत्मप्रसाधनध्यानपरायण आसम्।

"एतावन्तं कालं भवद्भिरत्र किं कृतम् ? तूष्णीं स्थित्वा अस्तमयानन्तरं बहिर्गमने को नाम लाभः ?"

नाहमधुना लाभनष्टादिकं गणयितुं बहिर्गन्तुकामः। अस्ति मे गणनीयं वस्त्वन्तरम्"।

'किं नाम तत् ?'

'तत् त्वया नावगन्तुं शक्येत।'

'सत्यं, यावत् भवद्भिस्तन्नाविष्क्रियेत।'

'तदापि त्वया तन्न शक्यम्।'

'तर्हि केनापि गणितगणनसाध्येन व्यक्ताव्यक्तस्वरूपेण वस्तुना

भाव्यम्' 'न खलु। साधारणोऽयं विषयः। परमत्र युक्तिरपेक्षिता।'
'सुयुक्तिः उत कुयुक्तिः ?'
'काप्यपूर्वा शोभना चेयं युक्तिः। परं तु त्वां प्रति सा कुयुक्तिरेवेति मे वितर्कः'
'कुतर्क इति कथ्यताम्। न कदापि काचन सुयुक्तिः मत्कृते कुयुक्तिर्भवितुमर्हति। तदुच्यतां मनोगतम्'
'केनचित् कुत्रापि लिखितं, एकं एकेन मिलितं सत् त्रिकं भवतीति। कथमेवं भवितुमर्हतीति मया एतावन्तं कालं चिन्तितम्। अन्ते तस्य समुचिता निष्कृतिरपि मया समासादिता।'
'केयं निष्कृतिः ?'
'सेयमतिगहना गणितविशेषगणनीया च'
नाहमधुना गणितविशेषगवेषणेन शिरोवेदनां क्रेतुमुद्युक्ता। यदि भवतां बहिर्गमने मतिः तर्हि त्वर्यताम्।'

एवं विवदमान एवाहं वस्त्रवेष्टनादिकं समाप्य बहिः प्रस्थितः। सापि मद्विलम्बनेन नातिप्रमनाः प्रस्थिता। किञ्चिद्दूरं यावत् न तया किमपि पृष्टम्। नापि मया संलापः समारब्धः।

पादानुसरणक्रमेण इतस्ततः चलन्तावास्व। मध्येमार्गं काचन स्त्री द्विवैः शिशुभिः साकं समीपस्थां वाटिकां प्रति गच्छन्त्यासीत्। तद्दृष्ट्वा मद्दयितया कथितम्— 'वाटिकामिमां दृष्ट्वा, तत्र किञ्चिदिव विश्रम्य, पुनः यथोचितं कुर्वः।'
'यद्देवी आज्ञापयति !'
'नायं परिहासस्य अवसरः'
"प्रायेण प्रणयप्रहरणस्य प्रारम्भावसरः"

तया मौनमवलम्बितम्। नाप्यहं तस्या मौनविमोचने बद्धश्रद्धः। आवां विविक्ते प्रदेशे उपविश्य उन्मत्ताविव उन्मिषितलोचनौ तत्र गतागतानां व्यक्तिविशेषाणां साध्वसाधुत्वविचारणेन आत्मगतविचारं विस्मर्तुमुद्यतौ। या स्त्री मध्येमार्गं आवाभ्यां दृष्टा सापि नातिदूर एव उपविष्टा स्वशिशुभिः सह सोत्सुकं विहरन्त्यासीत्। तदा तेष्वन्यतमः शिशुः विहरन्नेव अस्मत्समीपमागतः। प्रायेण स बालकः द्विहायनः स्यात्। स निश्शङ्कं आवयोरन्तरे स्थित्वा खेलितुं प्रवृत्तः। सुवदने तस्मिन् बालके निमग्नापि आवयोर्दृष्टिः मध्येमध्ये परस्परस्योपरि पतति स्म।

सोऽपि सोत्सुकं आवयोर्द्वैविध्यमनादृत्यैव मृदुलाभ्यां स्वपाणिपल्लवाभ्यां अस्मदंसौ अवलम्ब्य लम्बितुं प्रवृत्तः। आवां तु तेन सह पृथक् पृथक् सँल्लपन्तौ स्ववाग्विलासदर्शनेन तं तोषयन्तावास्व। सहसा स चपलो बालः एकेन पाणिना मदीयमंसं अपरेण तदीयं चावलम्ब्य लम्बितुं तस्याः दुकूलचेले प्रवृत्तः दत्तहस्तः सपद्येव गलित्वा अधः पतति स्म। झटिति तं ग्रहीतुं युगपत् प्रवृत्तयोरावयोः अंसौ परस्परसङ्घर्षणेन आत्मैकमत्यमापादितवन्तौ। पाणिभिर्धृतस्य तस्य बालकस्य मिथः अङ्कारोपणसम्भावनया आवां निजाङ्गसङ्गसम्भावितौ च संवृत्तौ। यद्यपि तस्य प्रदेशस्य शाद्वलाच्छादितत्वेन न कदापि बालकस्य आपत्तिलेशप्रसक्तिः तथापि अतिश्रद्धाच्छादितेन आवयोः स्वार्थेन जितमहो जितम्! (अनुवर्ति)

---

# राष्ट्रभाषा॥

## 1

मेल् कोट् संस्कृतमहाकलाशालाध्यक्षाः श्रीतिरुनारायणय्यङ्गार्-इमे लिखन्ति—

संस्कृतमेव राष्ट्रभाषा भवितुमर्हति। खण्डान्तरेष्वपि प्रचारवत्त्वात् विविधविज्ञानशाखासम्बन्धिग्रन्थभूयिष्ठत्वात्, सकलभाषान्तरपोषसमर्थत्वाच्चेति।

## 2

पण्डित वे. अनन्ताचार्या लिखन्ति— सर्वाः प्रजाः नास्तिकाः भवन्ति, प्रायेण नास्तिकाः कृताः इत्यपि वक्तव्यं भवति, एवंविधायां दुरवस्थाविस्फूर्तौ, भारतीयाः पण्डिताः सर्वात्मना मूकीभावं भजन्त इतीदम् महत् विषादस्थानम्। लोके प्रजासु आचारवैपरीत्यप्रसरणस्य पण्डितानामनवेक्षणमेव कारणमिति मन्वादयः स्मृतिकाराः प्राहुः। इदमनवेक्षणम् महापापकोटौ निविष्टमित्यपि जानन्तु पण्डिताः। तदेवम् सर्वात्मना अपरिहार्येषु अनुपेक्षणीयेषु परिष्कारकरणेषु राष्ट्रभाषानिर्णयमधिकृत्य किञ्चित् वदामः। राष्ट्रभाषाविषये संस्कृतत्यागः द्वेषकृतः सर्वज्ञंमन्यनामूलः, अज्ञानकृतश्च। तस्मात् सर्वेपि संस्कृतप्रणयिनः संस्कृतभाषायाः महिमानं तत्र तत्र उद्घुष्य, अज्ञानां चक्षुः उन्मील्य कृत्स्नस्य भरतखण्डस्य स्वतन्त्रराज्यनिर्वहणम् सार्थम् अन्वर्थञ्च कुर्युः इति आशासे।

---

# लोकनीतिः ॥

—·o—

गतानुगतिको लोको न लोकः पारमार्थिकः ।
सेतौ सैकतलिङ्गेन नष्टं मे ताम्रभाजनम् ॥

कुटुम्बभरणेन खिन्नः कश्चित् अग्रजन्मा, झटिति सन्न्यासाश्रमं परिजग्राह । 'आपदर्थं धनं रक्षेत्' इति न्यायम् अनुसृत्य भिक्षाया अलाभे उदरपोषणार्थं तत्र तत्र याचित्वा धनसञ्चयं सम्पादितवान् । तच्च धनं गूढं ररक्ष । एवं स्थिते अर्धोदयपुण्यकालः समाजगाम । बहवो जनाः सेतुस्नानाय सङ्घशः प्रतस्थिरे । अयमपि सन्न्यासी तान् अनुप्रातिष्ठत । सेतुस्नानं कथं कर्तव्यम् ? इति जना न जानन्ति स्म । 'अयं सन्न्यासी यथा करिष्यति तथा करिष्यामः' इति ते सममन्त्रयन । यतिस्तु सेतुमुपसृत्य धनसञ्चयं कस्मिंश्चित् ताम्रभाजने निक्षिप्य भूमिं खात्वा तत् निक्षिप्य तदुपरि सिकताभिः शिवलिङ्गं निर्माय बिल्वदळादिभिः पूजयित्वा स्नातुं जगाम । आनुयात्रिकाः सर्वेऽपि 'अयमेव सेतुस्नानक्रमः' इति जानन्तः प्रत्येकं शिवलिङ्गमेकैकं सिकताभिः निर्माय सम्पूज्य स्नातुं जग्मुः । सन्न्यासी स्नानानन्तरं निवृत्य यदा पश्यति तदा कृत्स्नं समुद्रतीरं शिवलिङ्गमयम् अदृश्यत । आत्मीयं शिवलिङ्गं परिज्ञातुम् अपारयन् इमं श्लोकं पपाठ– 'गतानुगतिकः' इति ।

---

# पुस्तकपरामर्शः ॥

—:o:—

## पारिभाषिकाभिनवशब्दनिर्माण-विमर्शः

### मेजर नारायणभट्ट गद्रे-महोदयानामाङ्ग्लभाषीयप्रबन्धस्य तञ्जापुरीतः श्रीमन्नावल्पाकदेवनाथाचार्यकृतोऽनुवादः ।

न परं राज्यनिर्वाहं अपि तु सर्वमेव अभिनवं निर्मातुमिदानीं नेतारः प्रवर्तन्ते । प्राचीनं सर्वमत्यन्तमुपेक्षन्ते । तत् सर्वमविद्यमानप्रायमेव

TIRUPATI.

एषाम् । तत्र पाश्चात्यप्रक्रिया वासनाया रूढमूलत्वात् बुद्धिप्रसरः सर्वः तदीयामेव सरणिमनुसरति । भौतिकशास्त्राणि अद्य अतिप्रधानानि संवृत्तानि । एषां शिक्षा सर्वा पाश्चात्यपद्धत्यवलम्बिनी । भाषां तु अस्मद्देशीयां उपयोक्तुं प्रयस्यन्ति । इयन्तं कालं आङ्गल्यैव प्रवृत्तं तत्सम्बन्धिनं सर्वं व्यवहारं विपर्यस्य अस्मद्देशभाषया तस्मिन् निर्वाह्ये अभिनवानां तत्तद्वस्तूनां संज्ञाकल्पनं न सुकरं भवति । बुद्धिमद्भिः अभिज्ञैः कर्तव्यमिदं सुमहत्कार्यम् । अतः तादृशान् बहून् प्रार्थ्य समितीकृत्य समुचितसंविधानभरस्तेष्वर्पितो वर्तते । ते पुनः संस्कृतमनादृत्य पाश्चात्यभाषामेवोपजीव्य संज्ञाविधानं कुर्वन्तीति, तत् सर्वथा न शोभनमिति च मेजर् नारायणभट्ट-गाद्रे-महाशयेन आङ्गल्यां निरूपितं वर्तते । तस्यायमनुवादः पण्डितदेवनाथाचार्येण शिरोमणिना कृतः । तस्य आद्यमन्त्यं च पर्वणी परमिह प्रकाश्येते ।

1 सुविदितमेवैतत् सर्वेषां यदस्मद्देशीयशिल्पकलापरिज्ञानाय, भारतीयशिल्पशास्त्रस्य पुनर्नवीकरणाय च, व्यतीतेषु पञ्चविंशतिसंवत्सरेषु "मानसार" नाम्नी ग्रन्थमाला बहुतरमुपकृतवतीति । अस्मदीये भारतवर्षे सर्वेष्वपि प्रदेशेषु प्राथमिकमध्यमप्रौढपर्वसु विद्यार्थिनामध्ययनौपयिकतया "हिन्दी" भाषया तत्तत्प्रादेशिकभाषाभिर्वा व्यवहर्तव्यमिति योऽयमुपक्रमः प्रादुर्भवति, स एवं विधानां दार्शनिक-ग्रन्थजातानां प्रयोजनवत्तासम्पादने नूनं कञ्चन समुन्मेषमिदानीं सञ्जनयति ।

## विवेकनिष्ठा

१५ अतः पारिभाषिकपदजातोद्धारणे व्यापृताः पाश्चात्यसांप्रदायिका अपि भारतीय-विद्वांसः सार्वलौकिकव्यवहारविषयभूतानि पदान्यादृत्य "विश्व-सम्बन्धं" साधयन्त एव, हंसक्षीरन्यायेन तत्तदुचितरीत्या भारतीयविज्ञानपरिभाषामप्यविच्छेदेन परिपालयितुं यदि प्रयतेरंस्तदेव साधीयः । अयमेव सम्प्राप्तोऽस्माकं कृतपकालो यदा व्यक्तिविशेषसौकर्यं प्रादेशिकविपरिवर्तं वा विस्मृत्य, सर्वस्यापि वस्तुनो गुणैकपक्षपातेन "सन्तः परीक्ष्यान्यतरद्भजन्ते" इति न्यायेन समुद्धरणं कर्तव्यम् ।

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५५ जय - कुम्भ [सं ६

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

FEBRUARY 1935

For the rate of subscription please see inside

# UDYANA PATRIKA.


Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,* *Panditaraja* D.T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


## विषयः ॥


शास्त्रानुबन्धः—श्रीगीतार्थदीपः १०५— ११२

शासितुरभिमतोऽर्थः अत एवायमेव शास्त्रार्थ इति निश्चित्य तथैव कर्माणि येऽनुतिष्ठन्तीति विवक्षितम् । ते सर्वकर्मभिर्मुच्यन्ते । मुक्ता भवन्तीत्यर्थः । श्रद्धावन्तः अननुतिष्ठन्तोऽपि अस्मिन् शास्त्रार्थे श्रद्दधानाः ये तेऽपि सर्वकर्मभिर्मुच्यन्ते । अनसूयन्तः अश्रद्दधाना अपि अस्मिन् शास्त्रार्थे नाभ्यसूयन्ति ये, अस्मिन् महागुणे शास्त्रार्थे दोषं नाविष्कुर्वन्तीत्यर्थः तेऽपि सर्वकर्मभिर्मुच्यन्ते । तेऽपीति अपिकारश्रवणात् एवं वाक्यभेदेन व्याख्येयं भवतीत्यवधेयम् । इदानीमननुतिष्ठन्तोऽपि अस्मिन् शास्त्रार्थे श्रद्दधाना अनसूयवश्च तया श्रद्धयाऽनसूयया च क्षीणपापा अचिरेण इममेव शास्त्रार्थमनुष्ठाय मुच्यन्त इति भावः ।

*இது எனது கருத்து— உபநிஷத்துக்கள் சொல்லும் பொருள் இதுவே. இதை இப்படி அறிந்து யார் அநுஷ்டிக்கின்றார்களோ, அநுஷ்டிக்காவிட்டாலும் யார் அதில் ச்ரத்தையோடு இருக்கின்றார்களோ, ச்ரத்தையிராவிட்டாலும் யார் அதில் குற்றம் கூறாமல் இருக்கின்றார்களோ, அவர்கள் எல்லோரும் முக்தி பெறுவார்கள்.* 31

१५१ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२ ॥

व्यतिरेकनिन्दयाऽप्युक्तार्थप्राशस्त्यातिरेक उच्यते । पूर्वोक्तव्यतिरेकरूपत्वादत्रापि वाक्यभेदेन योजना कार्या । अभ्यसूयोक्तिश्च अश्रद्धोपलक्षणार्था वाच्या । ये तु एतन्मे मतं नानुतिष्ठन्ति ; उक्तरीत्या सर्वमात्मवस्तु मच्छरीरतया मदाधारं मच्छेषभूतं मदेकप्रवर्त्यम् ; अतो मुख्यं कर्तृत्वं ममैव नात्मनः ; तस्मात् आत्मनः कर्तृत्वं नास्ति किन्तु ममैवेत्यनुसन्धाय सर्वाणि कर्माणि मुमुक्षुणा कर्तव्यानीति एवं रूपं मदीयं सिद्धान्तं सम्यक् न जानन्ति, अत एव एवमनुसन्धाय तदनुष्ठानं न कुर्वन्ति ; ये च न श्रद्दधते, ये चाभ्यसूयन्तो वर्तन्ते ; तान् । अचेतसः चेतोरहितान् । कथं चेतोराहित्यम् ? तेषामपि हि अन्तःकरणं विद्यत एवेत्यत्राह— सर्वज्ञानविमूढानिति । 'सर्वेषु ज्ञानेषु विशेषेण मूढान्' ।

'यथावस्थितात्मस्वरूपानभिज्ञतया अहं ममेत्यादिषु सर्वेषु ज्ञानेषु यथावस्थितस्वरूपप्रकारानभिज्ञानित्यर्थः'। तत्त्वज्ञानस्य कार्यस्यादर्शनात् कारणमन्तःकरणं नास्तीत्युपचर्यत इति भावः। नष्टान् तत्त्वज्ञानाभावेन पुरुषार्थायोग्यानित्यर्थः। एवंविधान् विद्धि।

अस्य ज्ञानेन श्रद्धया अनसूयया च निःश्रेयसप्राप्तिर्ध्रुवा। अज्ञानेन अश्रद्धयाऽसूयया च नाशो नियतः। ईदृशोऽयमर्थ इति प्रशंसा कृता वेदितव्या।

नन्वेवं सर्वेश्वरस्यैव कर्तृत्वेन आत्मनः कर्तृत्वं नास्तीत्यनुसन्धानं विना कर्मकरणं यदि नाशहेतुः कथं तर्हि 'सक्ताः कर्मण्यविद्वांसः' 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताहमिति मन्यते।' इति यथावस्थितात्मज्ञानरहितस्याविदुषोऽपि कर्मयोगानुष्ठानमुक्तम्। न हि तत् अयोगिनः केवलकर्मानुष्ठानविषयम्। कर्मयोगपरतयैव व्याख्यातत्वात्। वस्तुतस्तु तत्र तथा व्याख्यानमप्ययुक्तमेव। 'व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन' इत्यत्र हि मुमुक्षुणाऽनुष्ठेये कर्मणि बुद्धिर्व्यवसायात्मिका बुद्धिः। व्यवसायो निश्चयः। सा हि बुद्धिरात्मयाथात्म्यनिश्चयपूर्विका।" इति भाषितम्। अनेन कर्मयोगिनः आत्मयथात्म्यनिश्चय आवश्यक इति स्पष्टम्। तथा सति आत्मन्यकृत्स्नविदः कथं कर्मयोगेऽधिकारः। अधिकारविरहे अनुष्ठानस्याप्रसक्तेः 'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते' इत्युक्तस्य स्वकर्तृत्वाभिमानस्य क प्रसङ्गः? तदिह पूर्वापरवैघट्टयं महद् दृश्यते। स्वारसिकी च एवं योजना भाति। विदुषः कृत्स्नविद एव कर्मयोगेऽधिकारः। वैदुष्ये समानेऽपि मनोमालिन्यभूयस्तया ज्ञानयोगे येऽसमर्थाः तेषां कर्मयोगेऽधिकारः। अन्येषां ज्ञानयोगे। 'लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि' इत्यत्र लोकः न कर्मयोगाधिकारिलोकः, अपि तु सांसारिककर्मसक्तः। ज्ञानयोगाधिकारिणो विशिष्टाः यदि कर्म परित्यजेयुः सोऽपि तद्दर्शनेन वर्णाश्रमनियतं स्वधर्मं परित्यज्य विनश्येत्। तन्मा भूदिति तैः कर्मैवानुष्ठेयमित्यभिप्रायः। सक्ताः कर्मण्यविद्वांस इत्यत्रापि सक्ताः अवर्जनीयसम्बन्धाः ज्ञानयोगेऽनधिकारात् कर्मयोगाधिकारिण इति क्लेशेनार्थो न वर्णनीयः। अविद्वांसः केवलवर्णाश्रमिणः तदुचितकर्मसु सक्ताः सन्तः

तानि यथा कुर्वन्ति तथैव योगिनोऽपि कुर्युः । किन्तु असक्ताः । वैदुष्यात् । कः सङ्गो नाम । 'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते' । स सङ्गः । तत्त्ववित्तु योगी न सज्जते । किं तु गुणान् कर्तॄन्मन्यते । तत्रापि विशेषः 'मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा' इत्यनेनोच्यते । अयमपि विशेषः ज्ञानयोगाधिकारे सति चासति च कर्मयोगमनुतिष्ठतामुभयेषां साधारणः । 'ये त्वेतदभ्यसूयन्तः' इति निन्दार्थवादे 'ये नानुतिष्ठन्ति' इत्येतत् आत्मयाथात्म्यज्ञानरहितकेवलकर्मसङ्गिविषयमेव । तदेवं सर्वसामञ्जस्येन विवरणे सुकरे द्वितीयायोक्तार्थविरोधेन अविदुषोऽपि कर्मयोगानुष्ठानं तत्र तस्य स्वकर्तृत्वाभिमानं चाभ्युपेत्य पुनस्तस्य 'नेहाभिक्रमनाशोऽस्ति' इति पूर्वोक्तविरुद्धतया 'सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः' इति नाशाभिधानं च कथमुपपद्यत इति चेत् । उच्यते । 'लोकेऽस्मिन् द्विविधा निष्ठा' इति कर्मयोगज्ञानयोगावेव प्रस्तुत्य तयोर्मध्ये ज्ञानयोगापेक्षया कर्मयोगस्य श्रेयस्त्वप्रतिपादनपरत्वात् प्रकरणस्य 'लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि' इत्यत्र उपस्थितकर्मयोगाधिकारिलोकपरत्वं तावत् स्वरसम् । 'सक्ताः कर्माण्यविद्वांसः' इत्यत्र केवलकर्मिपरत्वे तु ।

> 'अविद्वांसः, कर्मणि सक्ताः, इत्युभयं न सांसारिकर्मतत्परपुरुषविषयम् । तथा सति कर्मयोगमपि परित्यज्य सांसारिककर्माण्येव विदुषाऽप्यनुष्ठेयानि स्युः ।'

इत्याचार्यपादैरनुपपत्तिरुक्ता । यद्युच्येत- इयमापत्तिर्निरवकाशा । कर्मकरणमात्रे दृष्टान्तप्रदर्शनात् ; अविद्वल्लोकसङ्ग्रहाय ते यथा कर्म कुर्वन्ति तथा विद्वानपि कुर्यादिति । तज्जन्यपुत्रपश्वाद्यर्वाचीनफलसङ्गात् तेषां कर्म सांसारिकं भवति । विदुषस्तु तत्र सङ्गविरहात् योगरूपं सत् मोक्षसाधनं भवति । इदं हि 'कुर्याद्विद्वांस्तथाऽसक्तः' इत्यसक्तपदेनाभिप्रेतम् । एवं सति 'सांसारिककर्माण्येव विदुषाऽप्यनुष्टेयानि स्युः' इत्यापादनं कथं घटेत । नैतदेवम् । फलसङ्गासङ्गयोरिह कथमपि प्रसक्तिविरहेण तत्कृतविशेषाभिधानायोगात् । उत्तरश्लोकानुरोधेन कर्तृत्वसङ्गतदभावयोरेव प्रतिपत्तेः । तथा च नाहं कर्तेति मन्यमानेनापि विदुषा लोकसङ्ग्रहार्थं पुत्रपश्वाद्यर्थतयैव कर्माणि कर्तव्यानीत्येव श्लोकार्थः प्रतिपत्तव्यः

स्यात् । न चैतदिष्यते । तस्माद् ज्ञानयोगानधिकृतकर्मयोगाधिकारिपरतयैव योजनं कार्यमित्यभिप्रायः । तत्र यदुक्तं आत्मयाथात्म्यज्ञानवत एव कर्मयोगेऽधिकारात् कथं तस्य अविद्वत्त्वमिति । तत्रेदं बोध्यम् । देहातिरिक्त आत्मा, स च नित्यः, इत्येतावन्मात्रज्ञानं तत्र विवक्षितम् । अत एव हि 'नित्यात्मासङ्गकर्मेहागोचरा साङ्ख्ययोगधीः' इति द्वितीयाध्यायार्थः सङ्गृहीतः । तावता सम्पन्नकर्मयोगाधिकारस्यापि, 'पुण्यपापरूपकर्मकर्तृत्वमात्मनो न स्वाभाविकम् । अपि तु प्रकृतिसंसृष्टतया गुणकृत'मित्यजानतः आत्मनि अकृत्स्नवित्त्वेन अविद्वत्त्वं भवत्येव । अत एव तेन क्रियमाणेषु कर्मसु तस्य अहं कर्तेत्यभिमानश्च । यत्तु 'विद्धि नष्टानचेतसः' इति निन्दा एनमपि स्पृशति । न हि योगिनि इदं घटते' इति, तत्र ब्रूमः । आरम्भे तज्ज्ञानरहितोऽपि 'क्षिप्रं भवति धर्मात्मा' इत्यनेन न्यायेन क्रमेण अनुष्ठीयमानयोगमहिमोल्लसितेन भगवत्प्रसादेन ज्ञानकार्त्स्न्यं लभत इति नास्य तत्र विषयता । अपि तु केवलकर्मिणामेव । अत एव 'नेहाभिक्रमनाशोऽस्ति' न हि कल्याणकृत् कश्चित्' इत्यादि निरपवादमिति ।

எனது இந்தக் கருத்தை அனுஸரித்து யார் கர்மாக்களை அனுஷ்டிக்கவில்லையோ, யாருக்கு அதில் ச்ரத்தையில்லையோ, யார் அதில் குற்றம் கூறுகின்றார்களோ அவர்கள் எவ்வித அறிவுமில்லாதவர்கள், சித்தம் என்கிற அந்தக்கரணமே இல்லாதவர்கள், ஒரு பேற்றையும் பெறுவதற்குரியரல்லாதவர்கள். 33

१५२ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

"एवं प्रकृतिसंसर्गिणः तद्गुणोद्रेककृतं कर्तृत्वम् ; तच्च परमपुरुषायत्तमित्यनुसन्धाय कर्मयोगयोग्येन ज्ञानयोगयोग्येन च, कर्मयोगस्य सुशकत्वात् अप्रमादत्वात् अन्तर्गतात्मज्ञानतया निरपेक्षत्वात् , इतरस्य दुःशकत्वात् सप्रमादत्वात् शरीरधारणाद्यर्थतया कर्मापेक्षत्वात्, कर्मयोग एव कर्तव्यः । व्यपदेश्यस्य तु विशेषतः स एव कर्तव्य इत्युक्तम् । अतःपरमध्याय-

शेषेण ज्ञानयोगस्य दुश्शकतया सप्रमादतोच्यते"। "ज्ञानयोगानादरहेतु-भूतदुःशकत्वादिसमर्थनपरं अनन्तरप्रकरणमित्यभिप्रायः।"

ज्ञानवानपि ज्ञानं शास्त्रजन्यं यथावस्थितात्मतत्त्वज्ञानम्; तद्वानपि स्वस्याः स्वकीयायाः प्रकृतेः स्वभावव्यपदेशार्हप्राचीनवासनायाः, सदृशं अनुरूपं यथा तथा चेष्टते प्राकृतविषयेष्वेव प्रवर्तते। शब्दादिविषय-वासनया पुनरपि तत्रैव प्रवर्तत इति यावत्। ननु ज्ञानवांश्चेत् ज्ञानानुरूपं चेष्टताम्। कुतः प्रकृत्यनुरूपं चेष्टत इति चेत् अत्रोत्तरं 'प्रकृतिं यान्ति भूतानि' इति। भूतानि अचित्संसृष्टा जन्तवः प्रकृतिं अनादिकाल-प्रवृत्तां वासनां यान्ति अनुयान्ति। सा वासना यद्विषया तद्विषयैव प्रवृत्तिर्भवतीत्यर्थः। निग्रहः शास्त्रकृतं नियमनं किं करिष्यति प्रकृतिविविक्तात्मस्वरूपमेव सर्वदाऽनुसन्धेयम्, न विषयान्तरं इति शास्त्रकृत आदेशः अनादिकालप्रवृत्तस्ववासनानुसारीणि भूतानि किं करि-ष्यति। निरोद्धुं न प्रभवतीत्यर्थः। अनादिकालप्रवृत्ताचित्संसर्गकृता-परोक्षदेहात्मभ्रमजनितामत्यन्तप्रचितां वासनां अद्यतनपरोक्षशास्त्रजन्य-ज्ञानं न सहसा निरोद्धुं क्षममित्यभिप्रायः।

இப்படிப் பல காரணங்களால் ஜ்ஞானயோகத்திற்குத் தகுதியுள்ளவர்களும் கர்மயோகத்தையே அநுஷ்டிக்கவேண்டு மென்றும் அநுஷ்டிக்கும்போது "தனக்குள்ள கர்த்ருத்வம் சரீரஸம்பந்தத்தினால் உண்டானது. அதுவும் பகவானுக்கு அதீன"மென்று கருத வேண்டுமென்றும் கூறப்பட்டது. இனி ஜ்ஞானயோகம் அநுஷ்டிப்பது வெகு கடினமென்பது நிரூபிக்கப்படுகின்றது.

ஆத்மஸ்வரூபத்தை உள்ளபடி அறிந்தவனும் தன் பூர்வ வாஸனைக்குத் தக்கபடியே நடக்கின்றான். எல்லா ப்ராணி களும் தம் பூர்வவாஸனையையே பின்பற்றுகின்றன. 'அப்படிச் செய்யக்கூடாது' என்கிற சாஸ்திரத்தின் கட்டளை என்ன செய்யும்? 33

१५३ इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

भूतानां प्रकृत्यनुयायित्वप्रकारमाह। इन्द्रियस्येन्द्रियस्येति वीप्सा। अर्थशब्दोऽत्र विषयपरः। एकैकस्यापि इन्द्रियस्य यो विषयः तस्मिन् सर्वस्मिन् रागः प्राचीनवासनाजनिताऽनुबुभूषा, द्वेषः तदनुभवे प्रतिहते सति तत्प्रतिघातहेतौ विघ्ने अप्रीतिः तज्जिहासा वा, एवंरूपौ रागद्वेषौ व्यवस्थितौ अपरिहार्यतया वर्तेते। तौ ज्ञानयोगाय यतमानं बलात् नियमितेन्द्रियं स्ववशे कृत्वा प्रसह्य स्वकार्येषु संयोजयतः। ततश्चायमात्मस्वरूपानुभवविमुखो विनष्टो भवति। अतः सहसा ज्ञानयोगमारभ्य तयोः रागद्वेषयोः वशं वश्यतां नागच्छेत् न प्राप्नुयात्। तद्वशगमने ह्यस्य विनाशो भवति। आत्मावलोकनरूपस्य उद्दिष्टस्य फलस्यालाभेन पुनरपि संसारबन्ध एव भवतीति। कथमेतत् उच्यते। तौ ह्यस्य परिपन्थिनौ। दुर्जयौ शत्रू। कर्तव्यं ज्ञानाभ्यासं वारयतः।

பூர்வவாஸனையை அனுஸரித்து அந்த அந்த இந்திரியத்தினால் அதன் அதன் விஷயத்தை அனுபவிப்பதில் ஆசையும் அதற்குத் தடை உண்டானபோது த்வேஷமும் மனிதருக்கு ஸ்திரமாய் இருக்கின்றன. ஆகையால் மனஸ்ஸு பரிபக்வமாவதற்கு முன் ஜ்ஞானயோகத்தை ஆரம்பித்தால் ஆசையும் பகையும் இவனைத் தம் வசமாக்கித் தம் கார்யங்களையே செய்விக்கும். அதனால் ஆத்மஸாக்ஷாத்காரத்தில் பராங்முகனாய் நசித்துப் போவான். ஆகையால் முதலிலேயே ஜ்ஞானயோகத்திலிறங்கி
அவற்றுக்கு வசமாகக்கூடாது. அவை இவனுக்குப் பெரும் 34
பகைவர்கள். ஜ்ஞானயோகத்தைச் செய்ய விடமாட்டா.

१५४ श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

उक्तरीत्या पूर्ववासनानुवर्तित्वावश्यम्भावात् ज्ञानयोगो दुष्करः। सुकरस्तु कर्मयोगः। तस्मादयमेवानुष्ठेय इत्यभिप्रेत्याह श्रेयानिति। स्वधर्मः सुशकतया स्वधर्मभूतः कर्मयोगः विगुणः अङ्गवैकल्ययुक्तोऽपि श्रेयान् प्रशस्यतरः। कस्मात् कमपेक्ष्य श्रेयान्? परधर्मात् प्रकृति-

संसृष्टस्य दुःशकतया परधर्मभूतात् ज्ञानयोगात् स्वनुष्ठितात् अविकलाङ्गादपि। कोऽत्र हेतुरिति चेत् उच्यते। कर्मयोगो हि सुशकत्वात् अप्रमादगर्भः, विच्छेदशङ्कारहितः; अविच्छेदेनानुष्ठातुं शक्यः। ज्ञानयोगस्तु दुश्शकत्वात् सप्रमादः। निश्चितविच्छेदः। बहु प्रयतमानेनापि कञ्चिदेव कालमनुष्ठातुं शक्यः। ततः परं विच्छेदो ध्रुवः। तथा च वैगुण्यमात्रं स्वरूपविच्छेदाद्वरमिति भावः। ननु वैगुण्ये सति फलं न भविष्यति। तथा च कथं तस्य श्रेयस्त्वमित्यत्राह— स्वधर्मे निधनं श्रेय इति स्वधर्मे स्थितस्य अप्राप्तफलस्य निधनं मरणं श्रेयः। विगुणत्वात् तस्मिन् जन्मनि फलाप्राप्तावपि अनन्तरजन्मनि समग्रगुणं तमनुष्ठाय फलं लप्स्यते। सर्वथा वैयर्थ्यं नास्ति। ज्ञानयोगमारभ्य प्रच्युतस्य तु, योगस्यैव नष्टत्वात् न तस्मिन् जन्मनि फलम्; नाप्यनन्तरजन्मनि; इति स योगस्तस्य भयावहः। "जन्मान्तरेऽपि फलं न भवतीत्यभिप्रायेण भयावह इत्युच्यते। स्वरूपेण विच्छिन्नस्य कथं जन्मान्तरेऽपि फलम्। अविच्छिन्नस्य विगुणस्य फलं विलम्बितमिति भावः।"

प्रकरणे असङ्गतत्वात् वर्णाश्रमधर्मपरतया अस्य श्लोकस्य योजनं न युक्तम्। परधर्मात् प्रशस्यतर इत्युक्ते परधर्मः प्रशस्य इत्युक्तं भवेत्। न च एकस्य वर्णस्य वर्णान्तरधर्मानुष्ठानं प्रशस्यम्। निषिद्धत्वेनाधर्मत्वात्। प्रशस्यत्वस्य सर्वथा दुर्वचत्वात्।

எல்லா அங்கங்களுடனும் செவ்வையாகச் சிறிதுகாலம் அனுஷ்டித்துப் பிறகு முடியாமையினால் கைவிடப்படும் பரதர்மமாகிய ஜ்ஞானயோகத்தைக்காட்டிலும் தான் அனுஷ்டிக்கக் கூடியதாயிருப்பதினால் ஸ்வதர்மம் எனத் தக்க கர்மயோகம் அங்கங்களில் குறைவு இருந்தாலும் மேலானது. அங்கக்குறைவினால் இந்த ஜன்மத்தில் இதன் பலம் பெறப்படாதாயினும் அடுத்த ஜன்மத்தில் இது பூர்ணமாக அனுஷ்டிக்கப்பட்டுப் பலத்தைத் தருமாகையால் இதை அனுஷ்டித்துக்கொண்டு மரிப்பது மேல். பரதர்மமான ஜ்ஞானயோகம் அனுஷ்டிக்கப் படாமலே போகுமாகையால் இந்த ஜன்மத்திலும் பலன் தராது, மறுஜன்மத்திலும் பலன் தராது. ஆகையால் அது பயத்தைத் தருவதொன்று.

KENDRIYA SANSKRIT VIDYAPEETHA TIRUPATI.

अर्जुन उवाच—

१५२ अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

"ननु 'सदृशं चेष्टते' इत्यादिना वासनानुवर्तित्वमुक्तम्। वासना च चेतनस्येच्छाद्वारेण प्रवर्तिका। एवं च ज्ञानयोगमिच्छतः तद्विरोधित्वया विषयानुभवमनिच्छतोऽपि कथं वासना विषयानुभवप्रवृत्तिहेतुरिति पृच्छति। अथशब्दोऽत्र प्रश्नार्थकः । अथ वा केनेति प्रश्नवाचकस्य पृथगुपात्तत्वात् कार्त्स्न्यपरः । अयं पूर्वं ज्ञानवानपीति निर्दिष्टः । कार्त्स्न्येनात्मविषयकज्ञानवान् अत एव ज्ञानयोगाय प्रवृत्तः पुरुषः । अनिच्छन्नपि । विषयाननुभवितुमित्यर्थाल्लभ्यते । बलान्नियोजित इव केन प्रयुक्तः प्रेरितः पापं विषयानुभवरूपं चरति। अनिच्छन्तोऽपि वायूदकादिप्रेरिताः प्रवर्तन्ते तद्वदत्रापि केनचित् प्रेरकेण बलवता भवितव्यमित्यभिप्रायः । वार्ष्णेय लोकानुग्रहार्थमवतीर्ण भगवन्। भवान् हि सर्वं वेद। अतः इदं मे कथय।

அர்ஜுனன் சொன்னான்—

ஓ க்ருஷ்ணா, அவன் விரும்பாமலிருந்தும் பலாத்காரம் செய்யப்பட்டவன்போல் உலக ஸுகங்களைப் புசிக்கப் புகுகிறது எதனால்? எது அவனை அப்படிச் செய்விக்கின்றது? 36

श्रीभगवानुवाच—

१५६ काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

अथ 'इन्द्रियस्य' इत्यादिना सङ्ग्रहेणोक्तमेवार्थं प्रश्नस्योत्तरतया प्रपञ्चयन् भगवानुवाच । एषः 'विषयानुभवो माभूत् ज्ञानयोगमेवाहमनुष्ठास्यामि' इति मत्वा ज्ञानयोगे प्रवृत्तस्य पुरुषस्य पश्चात् विषयानुभवप्रवृत्तिप्रयोजकः, रजोगुणसमुद्भवः महाशनः कामः। एषः पूर्ववत् 'विषयानुभवप्रवृत्तिप्रयोजकः रजोगुणसमुद्भवः महापाप्मा क्रोधः ।

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 7

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५५ जय - मीन [सं ७

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

MARCH 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription **Rs. Two only.**

Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेख ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः ।
(संस्कृतेन आङ्गलया द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* **D.T. Tatacharya Siromani,** M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 कलिप्रादुर्भावम् ।
2 वरदाभ्युदयचम्पूः ।
3 मुकुन्दमाला ।
4 संस्कृतग्रन्थजातम् ।
5 वैदिका विशेषाः ।
6 यथाभिमतम् ।
7 प्रणयप्रवणौ ।

वैश्यः— (ससमर्थनम्) भामिनि, नेदानीमपि किञ्चिद्धीयते। निधानकुम्भोऽस्मन्निकट एव किल वर्तते। अपि च तपस्वी स ब्राह्मणः प्रागेव तन्नाङ्गीकर्तुमियेष।

पत्नी— (सचमत्कारम्) चला हि प्राणिनां मतिः। विशेषतो विप्राणाम्। को जानातु स विप्रो न लुभ्येदिति। अपि च प्रतिभूकृताः शिष्टाः सवर्णत्वात्तस्य पक्षे एव स्थास्यन्ति। कष्टा खलु सा वेला यस्यां दीर्घदर्शिनोऽप्यार्यस्य अविचारितकारिणी मतिर्जाता। वित्तवत्सु दृप्यत्सु ते भ्रातुष्पुत्रेषु परिभवभागिन्या मया जीवान्तिकमस्मिन् कुटुम्बे दारिद्र्यमनुभवितव्यमिव, यद्दैवानुकम्पाप्येवमार्येण तिरस्क्रियते। (इति रोदितुमारभते)

वैश्यः— (ससंभ्रमम्) समाश्वसिहि कान्ते समाश्वसिहि। यत्सत्यं प्रमुग्धोऽभवम्। लज्जे चिन्तयन्नपि मे तदुत्कूलं मौढ्यम्। किन्तु हस्तगतो मे प्रतीकारः। प्रगे पश्य, भर्तुस्तव मतिकौशलम्। सर्वथा न दास्यामि कुम्भम्। द्रक्ष्यामि किमेष जरठो विप्रः प्रतिपत्स्यत इति।

पत्नी— (सोत्साहम्) नाथ! कुम्भस्थान्यमूल्यानि रत्नानि किमप्यवालोकयम्। एष कुबेरकोशादेव नूनं परिच्युतः। नेदृशं धनं समन्तादन्विष्टमपि भूतले सुलभदर्शनम्। अस्मिन्नकस्यापि मणेर्नार्घमर्हन्ति धनगर्वितानां ते दायादानां सम्पत्तयः। कतिपयैरेव कलशान्तर्गतै रत्नैः सुविहितसुवर्णसंयोगैः क्लृप्ताभरणभासुरा ह्यहमारात् कर्णयो रत्नताटङ्कं, कण्ठे नवरत्नमालिकां रत्नकण्ठकं च, चरणयोर्मणिमञ्जीरं, हस्तयो रत्नवलयानि, अङ्गुलीषूर्मिकाः, नासाबिन्दुकं, शिरसश्चन्द्ररेखां, मध्यस्य मणिमेखलाम्, अन्यदन्यच्चाभरणजातं कारयित्वा तेषां प्रबलेर्ष्याहेतिततीरुज्ज्वलयितुमलम् (इत्यर्धोक्ते) नाथ! किं प्रागेव निद्रया परामृष्टोऽसि।

वैश्यः— (उत्स्वप्नायमानः) कुतो निधानकुम्भः। कीदृशो निधानकुम्भः। निधानलाभ एव नासीत्! गच्छ गच्छ। न यावद्गलहस्तः प्रयोज्यते। (इति हसति)

पत्नी— सुष्ठु खलु व्यवसितमतिः आर्यः। तन्निश्चिन्ता स्वप्स्यामि।

(उभौ निष्क्रान्तौ)

इति तृतीयोऽङ्कः।

---

## अथ चतुर्थोऽङ्कः ।

(ततः प्रविशति महत्येव प्रत्यूषे गृहान्निष्क्रामन्)

विप्रः— (विलोक्य) अहो वातवृष्टिनिर्धूतसिक्तायाः शर्वर्याश्चरमे यामे विह्वलविभ्रान्तदर्शनता ! या किल

नोन्मीलत्यविशङ्कमङ्कुरितया तारानिमेषत्विषा
व्याकीर्णाम्बुदखण्डकर्बुरतया धत्ते परिध्वस्तताम् ।
ग्रस्तोन्मुक्तशिखैः खरैर्विटपिभिर्निस्पन्दरूक्षस्थितिः
सद्यः सान्द्रजलावसेकजडिमग्रस्ता कथं वर्तते ॥ १ ॥

[सस्मितम्]

मलीमसाम्बरा मूर्त्या ह्यसंयोजितशोभया ।
शोच्याऽसद्ब्राह्मणीवेयं दशापर्यन्तवर्तिनी ॥ २ ॥

(सचिन्तानिश्वासम्) धिक् ! कष्टः खल्वस्माकं कौटुम्बिको वृत्तान्तः । कुतो नु भारतीमेवं विवर्जयति द्विषतीव कमलालया । अहो शाठ्यं दैवस्य ! नूनं निधानमेतन्मत्पूर्वैरुपार्जितं स्वम् । मत्पैतृकं मत्तो निगूह्य मयि प्रतीपं तत् तेनागन्तुकमूरुजं कमपि कृतार्थीकरोति । अहं ताव-मयि प्रतीपं तत् तेनागन्तुकमूरुजं कमपि कृतार्थीकरोति । अहं ताव-दृणेन परिबाध्ये । स त्वदत्तमूल्यमश्रमोपार्जितमनायासविवर्धितम-प्रार्थितमपि मनोरथेन पूरप्लावं प्लवमानं लक्ष्मीकटाक्षमनुभविष्यति । अथवा किं दैवनिन्दया । साधुरयं वैश्यो यदा मम चरणौ गृहीत्वा सर्पादिवास्मात्सन्निधानात् परित्रस्यन् मां निरबध्नात्, तदा मूढेन मया किल मिथ्या धर्मोपन्यासशौण्डेन चिरान्मदाकिञ्चिन्यमुत्सादयितुं प्रसन्ना श्रीः अङ्घ्रिणा समुदस्ता । सर्वथा भगवान्निरन्तरमाराधितो मया महेश्वरो मतिभेदात् तं रजनीमिमामेकां रक्षतु । प्रभात एव तमासाद्य तस्मै प्रमाणोत्तरं ब्राह्मणस्वापहरणे दोषानुपपादयिष्यामि । किन्तु यदि पारलौकिकं श्रेयः श्रुतिभिः प्रतिश्रुतं स पृष्ठतः कृत्वा "हस्त-गतं परित्यज्य किं सन्दिग्धरूपेण फलेनेति" ऐहिकं बहु मनुते तदानीं छलधर्मा नरपतिरेव मे शरणं भवितुमर्हति । यथाऽहं पश्यामि स

ऊरुजः इतःपरं मद्दर्शनपथमपि परिहरिष्यति। दृष्टोऽपि नाभ्युपपत्स्यते। स्थाने खलु लोकप्रवादोऽयम्। गतानुशोचिनो विप्राः इति! भवतु। जातं जातं समाधास्ये विषमम्। किमनुत्पन्नचिन्तायासेन। स्नानवेला अतिक्रामति। तल्लघु स्नात्वा तमृणिनमवस्कन्त्स्यामि।

(इति सत्वरं निष्क्रान्तः)

इति चतुर्थोऽङ्कः।

---

## अथ पञ्चमोऽङ्कः।

[ततः प्रविशति राजकुले मन्त्रसभायां नरपतिः छलधर्मा, मन्त्रिपुरोहितादयश्च यथाप्रकारमासीनाः]

छलधर्मा—अयि भोः सभासदः! वयं खलु महाराजदुर्योधनानुव्यवसायिनः कालकौटिल्येन स्वामिनि पराजिते हते च, यौधिष्ठिरं युगं स्कन्धासञ्जितं कृच्छ्रेणोद्वहामः। उपपन्नं च खलु एतद्राजतन्त्रिणाम्, यदसम्पूर्णे बले विधेयवत्स्थीयते। उपचिते च तस्मिन् सहसोत्थीयते। सम्प्रति सुपरिष्कृतराष्ट्रकर्मणां प्रकृतिषु रूढमूलानां सुनिविष्टसुहृत्कोशादिसाधनानां समुपार्जितविविधबलसन्नाहानां अस्माकमस्मात् करार्पणकार्पण्यादुन्मज्जनायाभ्युदयोदर्कः कालः समुपस्थित इति चिन्तयितुमुत्सहे। परपक्षस्यापि महानवसादोऽद्य समजनि। यत्कुहनागहनाखण्डमण्डलाहिण्डनोत्सुकः स यादवानां दायदः श्रूयते व्याधमारितः। तद्विरहिताः पाण्डवाः पलालप्रायाः विजेष्यन्ते इति न दुष्करमनुमन्तुम्। अथवा कथं नु भवन्तः प्रतिपद्यन्ते! स्वैरं मन्त्रयित्वा वक्तुमर्हथ।

प्रधानमन्त्री—(उत्थाय) महाराज, अस्मिन्नर्थ एव चिरान्निवेदनावसरं प्रतीक्षमाणैरस्माभिः स्थितम्। चतुरङ्गमप्यस्मद्बलं पूर्वस्थित्यपेक्षया द्विगुणमुपबृंहितं युद्धदुर्मदं तिष्ठति। महाराजश्चैवमाह। उद्योजयितुमिवास्मान् युद्धायाद्यैव दैवमतिभीमं संरम्भमन्तरिक्षेऽप्युपचिक्षेपेति

चोत्प्रेक्षे। अद्येमां सभामलङ्कुर्वाणोऽस्मत्सेनापतिः सिंहविक्रमः सहस्राक्षमपि ससुरानीकं समरे भेत्तुमलम्। सर्वथा विजयाय विजृम्भतां महाराजः।

(सर्वेऽपि प्रमोदोत्साहेङ्गितैरनुमोदन्ते)

पुरोहितः— मृदुर्युधिष्ठिरः करविच्छेदे कृतेऽपि सहसा नाभियानमभिमन्येत।

सेनापतिः— तथापि रणदुर्ललितास्तस्य भ्रातरः किमपि प्रस्फुरेयुः भारतयुद्ध एव प्रायः प्रशान्तेनापि निजविक्रमस्फुलिङ्गेन। अतः सर्वावस्थासमुचितं सन्नद्धैरस्माभिर्भाव्यम्।

सभ्याः— अवितथम्। अवितथम्। बाढम्। अनवद्यम्।

राजा— तेन हि—

दुर्गाणां प्रतियोजनाय विविधोपस्कारयोगाय च
व्यापारैर्विकटोत्कटैरधिकृता जातत्वरा जाग्रतु।
उत्सर्पन्त्वथ दंशिताः करवलन्निस्त्रिंशभीमा भटाः
सर्वत्राहितलोचनश्रुतिविधां निर्वर्तयन्तु स्पशाः॥ १॥

सेनापतिः— यथाऽनुशास्ति महाराजः।

प्रधानामात्यः— अथ च सर्वकार्यसिद्धीनां मूलमन्त्र इव साधनतमो धनप्रभाव इति न खलु सपरिकरमुपपादयितव्यं निखिलमन्त्रनिष्णातानामस्मत्पारिषदानाम्। न च न समृद्धोऽस्माकं कोशविभवः। संपूर्णस्यापि कोशस्य संग्रामसन्नाहिभिः सुबहुकालसन्धारणपर्याप्तसंभारोपलम्भाभिनिवेशेन सर्वोपलभ्यमानविधया समुपचितिः निध्यातव्यैव। आयत्युपबृंहणनिमित्तं बहवो नया अनुष्ठानगोचराः। राज्ञां बहुष्वायतिमार्गेषु विद्यमानेष्वपि प्रजाभ्यः करसंग्रह इत्येष मधुकरवृत्त्या इतस्ततः स्तोकं स्तोकमुपादानरूपः ऊर्जितो निरुपप्लवः सुकरोपबृंहणश्च वर्तते। करो हि नाम प्रजोपलब्धानामायतीनां पालनकर्तुर्भूपस्योचितोंऽशः। स च षड्भागो धर्मशास्त्रसिद्धः।

ततश्च

मुनितिलकैरनुनीता मुदिता नीता च [1]सावनीमवनीम्।
सागरमिव शैवलिनी सरस्वती साऽगमत्सरोजभुवम्॥ ५॥

कविराडिव कांक्षितां चिरात् सरसामेत्य सरस्वतीं मुदा।
कृतिमम्बुजभूश्चिकीर्षितां स तु निर्वर्तयितुं समैहत॥ ६॥

अथ पुनराश्रमोद्देश इव[2] महाच्छविप्रवर्ग्यशुचिः, जामदग्न्य इव[3] सवृद्धिकोपसत्त्वेन श्रुतः, वेश्मन्तराळदेशविशेषेणेव[4] सशुभोच्चययूपशोभितेन यूपेन च विराजमानः, होत्रादिभिरिव[5] साधुमनोहृद्याज्योज्ज्वलमुखैरग्निभिश्च विद्योतमानः, सभयेव [6]सदधिकया पात्रावल्या च विरोचमानः, [7]स्वामिक्षयोपयुक्तोऽपि स्वामिवृद्धिहेतुः [8]वाजिनाऽन्वितोऽपि न वाजिना-

1 सावनीं अवनीं यज्ञभूमिमित्यर्थः। 2 आश्रमपक्षे— महान्तः ज्ञानानुष्ठानादिभिः अच्छाः बाह्याभ्यन्तरशुद्धाः ये विप्राः ब्राह्मणाः तेषां वर्गे भवैः वर्ग्यैः शुचिः शुद्धः इत्यर्थः। तुरङ्गमेधपक्षे महती छविः यस्य तादृशेन प्रवर्ग्याख्येन कर्मणा शुचिरित्यत्यर्थः।
3 जामदग्न्यपक्षे— सवृद्धेः प्रवृद्धस्य कोपस्य सत्वेन स्थित्या श्रुतः प्रसिद्ध इत्यर्थः। यागपक्षे— सवृद्धिकाः उपसदः यास्मिन् तत्वेनेत्यर्थः। दीक्षादिनादूर्ध्वं सोमाभिषवात्पूर्वं कर्तव्याः होमविशेषाः उपसद इत्युच्यन्ते। 4 देशविशेषपक्षे शुभं दार्ढ्यादिगुणः उच्चयः औन्नत्यं तत्सहितेन यूपस्तम्भेन शोभितेनेत्यर्थः। अश्वमेधं यागपक्षे— शुभावर्तादिसहितेन उच्चेन उन्नतेन ययुना यागीयाश्वेन उपशोभितेन यूपेन चेत्यर्थः। 5 होत्रादिपक्षे— साधूनां मनोहृतः मनोहारिण्यः याः याज्याः होत्रा पठ्यमनाः मन्त्राः तैः उज्ज्वलानि मुखानि आस्यानि येषां ते इत्यर्थः। हयमेधपक्षे— साधु सम्यक् मनसो हृद्येन रम्येण आज्येन घृतेन उज्ज्वलं दीप्तं मुखं ज्वाला येषां तैः अग्निभिरित्यर्थः।
6 सद्भिरधिकया, दधिसहितया चेत्यर्थः। 7 स्वामिनो यजमानस्य क्षये नाशे उपयुक्तोऽपीति विरोधः। सु-समीचीनया आमिक्षया आमिक्षाख्यद्रव्येण उपयुक्तोऽपीति परिहारः। तप्ते क्षीरे दध्यातञ्चने कृते तत्र जायमानः घनीभूतभागः आमिक्षेति व्यवह्रियते। तत्रैव जलवत् द्रवीभूतः यो भागः जायते स वाजिनमिति च व्यवह्रियते।
8 वाजिनान्वितोऽपि-पूर्वोक्तवाजिनद्रव्यविशिष्टोऽपि न वाजिनान्वितः

न्वितः, सपशुक्रमो[1]ऽप्यपशुक्रमः, तुरङ्गमेध[2]स्स भारती केनाऽप्यन्त-र्मुखेन[3] ब्रह्मणाऽपि यजमानेन सभक्तिप्रकर्षं प्रवर्तितोऽभूत् ।

अध्वर्युणा यद्यदहूयताग्नौ तत्तद्धविस्तत्र मखे विधाता ।
ध्यायन्नजस्रं कमलासहायं समर्पयामास समस्तमस्मै ॥ ७ ॥

चित्तं समाबध्य चिरान्मुरारौ दत्तं हविस्तत्र पितामहेन ।
उद्देश्यभूतैर्हयमेधशालामुपाश्रितैरप्यमरैर्न लेभे ॥ ८ ॥

ततश्च

हवनहविरलाभात्साग्रहास्ते निराशा
बलरिपुवसुरुद्रादित्यमुख्या मखाशाः ।
अजमथ यजमानं शौरिमन्तर्दधानं
निजगदुरवमानात्तत्कृताल्लज्जमानाः ॥ ९ ॥

हव्यं वितीर्णमपि हा भवता विधातर्न प्राप्नुमो वयमभाग्यनिरुद्धमेतत् ।
चन्द्रेण दत्तमपि चारुतरं चकोरा मेघोपरुद्धमिव मेदुरमंशुजालम् ॥ १० ॥

एवं देवताभिरावेदितां गिरमाकर्ण्य लोकस्रष्टा हृष्टस्सन्निदमाचष्ट—

यजन्ते युष्मांस्ते य इह तनयायुर्धनपशु-
स्वरादिक्षोदीयःफलचपलचित्तास्तनुभृतः ।
स्फुरन्मोक्षापेक्षाः पुनरनघचर्यास्सुमनसः
शुभप्रेक्षास्साक्षान्मधुमथनमिच्छन्ति सवनैः ॥ ११ ॥

ततश्च

संसारसिन्धुतरणं ननु सारसाक्षा-
त्साक्षात्कृतात्सपदि लब्धुमहं यजेत्तम् ।
गृह्णाति हव्यमखिलं कृपया स एव
देवास्तदुज्झत मखेऽत्र हविर्जिघृक्षाम् ॥ १२ ॥

---

वाजिनद्रव्यरहित इति विरोधः । नवाजिनेन नूतनकृष्णाजिनेन अन्वित इति परिहारः । 1 शुचः शोकस्य क्रमः अपगतः यस्मिन् यागे इति परिहारः । 2 भारत्या, वाचेति निरोधः, सरस्वती-देव्येति परिहारः। अन्तर्मुखेन, मौनिनेत्यर्थः । 3 ब्रह्मणा—ब्रह्मा-ख्येन ऋत्विजा इति विरोधः । चतुर्मुखेनेति परिहारः ।

इदञ्चावधेयम्—

मोक्षापेक्षिभिरच्युतार्चनपरैर्मोदेन दत्तं क्रतौ
दिव्यं हव्यमवाप्यते तदितरैर्देवैर्न जातु स्वयम् ।
राजान्तःपुरनिष्कुटे कृतपदैः रम्यैरगैरर्पितः
पुष्पाणां निचयः किमद्भुतगुणो भूपेतरैर्धार्यते ॥ १३ ॥

इत्यादिभिः प्रजापत्यारब्धैस्तत्वार्थोपदेशैर्निवृत्ताहङ्कारेषु निखिलेषु लेखेषु ;

मेधासिन्धुर्वाजिमेधाभिधाने कर्मण्यस्मिन् कल्पसूत्रोक्तरीत्या ।
अप्रत्यूहं यागहोमादिरूपाण्यङ्गान्युच्चैरन्वतिष्ठद्वसिष्ठः ॥ १४ ॥

दध्यावुदध्यात्मजया समेतं वेतण्डशैलात्मकवेदिमध्ये ।
अध्यग्नि सुध्यग्रसराभिर्निन्ध्यकर्मा विधिर्माधवमेकभक्तिः ॥ १५ ॥

यूपे तेऽथ ययूपेते त्वेकविंशत्यरत्निके ।
शाखाध्वना प्रशाखाद्याः स्वं स्वं कर्म प्रतेनिरे ॥ १६ ॥

अथ शाखाधिष्ठितमेव पन्थानमनुरुन्धानेन शमितृसंज्ञपितस्य सप्तेरध्वर्युणा वपायामुपात्तायां सामोदं दामोदरमेव चिन्तयन्तं भगवन्तमरविन्दजन्मानं सबहुमानं निशामयत्सु सर्वेषु सुपर्वेश्वरेष्वहंपूर्विकया दुर्वारविशालकोलाहलेषु वपाहोमावलोकनबद्धकुतूहलेषु

[1]याज्यां वक्तरि होतरि श्रुतिनिधावुच्चैर्वषट्कुर्वति
त्यागं कुर्वति धातरि स्थिरहरिध्यानावधानादरे ।
अग्नेरौत्तरवेदिकस्य सविधे तिष्ठन्वसिष्ठःस्वयं
जुह्वाऽस्मिन् जुहवाम्बभूव घृतसंसिक्तामुपात्तां वपाम् ॥ १७ ॥

विरचिते तु वपाहवने तदा विधिवदब्जभुवा भगवन्मुदे ।
उदजिहीत विमानमुपर्बुधादरुणबिम्बमिवाच्युतचक्षुषः ॥ १८ ॥

---

1 याज्या—अध्वर्युणा यजेति प्रेषे कृते होत्रा पठ्यमानो मन्त्रः ।

तदानीम्—

प्रकृतक्रतुरिव [1]ससुमनोराजीवासनः पवमानो ववौ। निपुणनृपरक्षितनगर्य इव [2]नवप्रसादा दिशो ऽव्यशोभन्त। भटपटलमिव सुरयौवतं [3]संपन्नबहुलास्याडम्बरं बभूव विद्वत्प्रभुसभेव विबुधनगरी[4]विजृम्भितवाद्यारवा जज्ञे। प्रावृडिव पद्मजयज्ञभूमिरभ्रच्युताभिर्घन[5]पुष्पवृष्टिभिस्सुरभिरभूत्।

ततश्च।

अन्तर्विमानमसिताम्बुधरोपमानमानन्दमानतजनेषु घनं दुहानम्।
भूमानमुज्ज्वलितमानसमीक्षमाणो वैमानिकैश्शतधृतिस्सममाननन्द॥

वरदं वरदन्तिभूधरे हरदम्भोळिधरादयस्सुराः।
शरदम्बुजनेत्र[6]मन्तिकस्फुरदम्भोधिभुवं ववन्दिरे[7]॥ २०॥

कलशार्णवशायितादशाविलगत्फेनलवभ्रमावहैः।
अनघैर्नखदिव्यमौक्तिकैस्सततालङ्कृतपादपङ्कजम्॥ २१॥

[8]द्युनिम्नगातत्पतिमेखले ये यदुद्भवे यत्र तयोस्तु मध्ये।
आद्या मरंदत्यपरा परागत्यनेन पादाम्बुरुहेण भान्तम्॥ २२॥

---

1 ससुमनाः—सामरः, राजीवासनः ब्रह्मा यस्मिन् क्रतौ। सुमनसां पुष्पाणां राज्याः पंक्तेः वासनया सहितः वायुः। 2 वप्राणां प्राकाराणां सादः-कार्श्यं, तन्नास्ति यासु ताः नगर्यः। नवः प्रसादः नैर्मल्यं, यासां ताः, (दिशः)। 3 सम्पन्नः बहुलानां असीनां आडम्बरः यस्मिन् तत् (भटपटलं)। सम्पन्नः बहूनां लास्यानां नर्तनानां आडम्बरः यस्मिन् तत् (सुरयौवतं)। 4 विजृम्भितः वादिनां वाद्यानां च आरवः यस्यां सा। 5 अभ्रात् आकाशात् च्युताभिः घनपुष्पाणां जलानां घनानां सान्द्राणां पुष्पाणां कुसुमानां च वृष्टिभिः। 6 अन्तिके समीपे, स्फुरन्ती अम्भोधिभूः लक्ष्मीः यस्य तम्। 7 इत आरभ्य पञ्चदशश्लोकानामेकान्वयात् कुलकम्। 8 द्युनिम्नगा- देवगङ्गा। तत्पतिः समुद्रः, मेखला यस्याः सा भूमिश्च ; ते यदुद्भवे यत्पादाम्बुजोत्पन्ने। तयोः गङ्गा भूम्योर्मध्ये आद्या गङ्गा मरन्दति मकरन्दवदाचरति। द्वितीया भूमिः। परागति परागवदाचरति।

′# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २८] कलि ५०५५ जय - मीन साधारण [सं ७

## मुकुन्दमाला ॥

—o—

'मरणेऽपि चिन्तयामि' । मरणे सत्यपि, तदनन्तरं यत्र यत्र गत्वा यद्यत् सुखं वा दुःखं वाऽनुभाव्यं तत्र तत्र तत्तदनुभवकालेऽपि, त्वच्चरणारविन्दयुगलमहं चिन्तयिष्यामि । तन्महिम्ना तीव्रा नरकवेदनाऽपि मां न पीडयिष्यति । अतः कर्मानुरूपं फलं तावत् यत् किमपि जायताम् । तत्र मे चिन्ता वा भयं वा नास्ति । तस्मात् फलविशेषमुद्दिश्य तत्साधनतया भक्तिमहं नापेक्षे । अपि तु स्वयं प्रयोजनतयाऽपेक्षे । इति कुलशेखरेणोक्तमाकर्ण्य पुनर्भगवनाह– "सौम्य कुलशेखर, अहङ्काराध्मात इव लक्ष्यसे । नरकवासे प्राप्तेऽपि मच्चरणारविन्दस्मरणरसपरिवाहपरवशतां गच्छन् त्वं स्वयं नरकवेदनापरिहरणशक्त इति मन्यसे । अस्मिन् शरीरे पतिते, कर्मानुगुणे शरीरान्तरे उत्पन्ने च कीदृशं ते मनो भविष्यति कीदृशी बुद्धिर्भविष्यतीति को वेद । सर्वस्वतन्त्र इव 'तदानीमप्यहं एवं करिष्यामि' इति सङ्कल्पमिदानीं करोषि । केवलाहङ्कारविजृम्भणं ह्येतत् । क्रूरकर्मविपाकेन विविधेषु नरकेषु पात्यमानो नूनं त्वं 'अविध अविध । हा अम्ब, हा तात' इत्यवशात् उच्चावचान् आक्रोशान् करिष्यसि । मच्चिन्तने बुद्धिर्नैव प्रवर्त्स्यति । उत्तमोत्तमयोगावस्थालभ्यस्य आह्लादविशेषस्य तदा कः प्रसङ्गः ?" इति ।

इदमाकर्ण्य महाराजः पुनर्विज्ञापयामास— भगवन्, क्षमां कुरु । यदि किञ्चिदविनीतमुक्तं तत् त्वं तथाविधमनुग्रहं करिष्यसीति विश्वासदार्ढ्यादेव । त्वदनुग्रहं विना लोकेषु कः किं कर्तुं समर्थः ।

भगवान्— भवतु। उक्तरीत्या मरणानन्तरं अतितीव्रा नरकवेदना अपरिहार्या किल सम्भाव्यते। बुद्धिमद्भिः तत्परिहाराय अवश्यं हि किमपि कर्तव्यम्। तस्मात् तत्फलं कृत्वा तदर्थतया मयि भक्तिमपेक्षस्व।

कुलशेखरः— भक्तवत्सल, भगवन्, यदिदानीं पठितं पद्यं तदेवास्यापि प्रश्नस्य प्रतिवचनतया पठितुमिच्छामि—

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तकप्रकामम्।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि॥

इह अद्य अनुभाव्यं इदं त्वच्चरणारविन्दचिन्तनसुखं मम तथा आदरास्पदं, तथा उत्तमोत्तमं भवति। यथा वर्तमानं वा भविष्यद् वा अन्यत् किमपि फलतया उद्देष्टुं मम बुद्धिः न क्षमते। तेन दिवि वा भुवि वा लभ्यः सुखविशेषानुभवो यथा मम नोद्देश्यः तथैव नरकयातनापरिहारोऽपि। यद्यद्भावि तत्तद्भवतु। तद्विषयो विमर्शः एव मम नास्ति। अवधीरितशारदारविन्दत्वच्चरणारविन्दचिन्तनं मे तथा हृदयावर्जकम्। तत्र फलान्तरसाधनताकल्पनसाहसे मे अन्तरात्मा न धृष्णोति। किमहं कुर्याम्। प्राप्तां नरकवेदनां तीव्रामपि पश्चादनुभविष्यामि। अद्य तु त्वं तथाऽनुग्रहं कुरु यथा भवच्चरणारविन्दभजनं मरणेऽपि सम्पद्यते। मनुष्याणां जाग्रत्स्वप्नसुषुप्तिमूर्छामरणानि पञ्चावस्थाः। तत्र सुषुप्तिमूर्छयोः अचेतनप्रायतैव। अतस्तद्वर्जं अन्यासु सर्वास्ववस्थासु तच्चिन्तनं मे अविच्छिन्नं भवतु। यद्वा मरणतुल्येषु अतिसङ्कटेषु विद्यमानेष्वपि चिन्तयामि। अतस्तथाविधमनुग्रहं कुरु। बालाः भविष्यत्कालं न चिन्तयन्ति। तत्कालसुखे सज्जन्ते। तथाऽहमपि। अद्यतने त्वद्भजनसुखे मनो मे अभिनिविष्टम्। तदेव लोकोत्तरं मन्यते।

नरकान्तक। नरकासुरं हतवानसि। यदि मम मनसि विपरीतग्रहः कश्चिदस्ति तं त्वमेव निवर्तयितुमर्हसि।

---

# संस्कृतग्रन्थजातम् ॥

——:o:——

## वेदकालः ।

क्रिस्तोः प्राक् षट्शतीतः द्विशतीपर्यन्तं सूत्रकालं अवधारयन् माक्स् मुल्लर् (Maxmuller) ततः पूर्वं ब्राह्मणमन्त्रछन्दोरूपस्य ग्रन्थजातत्रयस्य प्रत्येकं द्वे शते वर्षाणि दत्वा क्रिस्तोः प्राक् द्विशतीसहस्रं ऋक्संहिताया उत्तरकालावधिरिति प्रत्यपादयत्। द्विशतीस्थाने पञ्चशती चेत् कल्प्येत शतोत्तरद्विसहस्री 2100 तत्काल इति वक्तुं शक्यते । डाक्टर हाग् (Doctor Haug) एवमेवाङ्गीकरोति । प्रोफसर् विट्नि... क्रिस्तोः प्राक् द्विसहस्री ऋग्वेदीयसूक्तानां काल इत्याह । मेग्डानल् (Macdonell) पुनः एतावत्प्राचीनत्वमसहमानः B.C. 1500 तत्काल इत्यङ्गीकरोति । कीत् (Keith) द्विशतीसहस्रमित्येव । सर्वमिदं अभ्यूहमात्रं केवलमाभिमानिकम् ।

ज्योतिर्विषयपरिशीलनेन बालगङ्गाधरतिलकप्रभृतिभिः परिकल्प्यमानस्तु वेदकालः क्षोदक्षमः। तेषामयमाशयः। एकस्य संवत्सरस्य द्वे अयने, षट् ऋतवः, द्वादश मासाः सन्ति । सूर्यस्य गतिमनुरुद्ध्य एवं कालविभागः क्रियते। अह्नो रात्रेश्च प्रायः न साम्यमास्ते। क्वचित् अधिका नाड्यः स्युः। क्वचिन्न्यूनाः । तथापि उत्तरायणे एकस्मिन् दिने दक्षिणायने च एकस्मिन् दिने अहोरात्रयोस्समं परिमाणं भवति। एवं अहोरात्रसाम्यवान् कालः विषुव इति विषुवान् इति च कथ्यते। Equinox इति भाषान्तरे । तत्र उत्तरायणविषुवस्य वसन्तसम्पात (vernal) इति इतरस्य च शारदसंपातः (autumnal.) इति व्यवहारः।

एकेन संवत्सरेण सूर्यस्य यावान् अध्वा गन्तव्यः सः सप्तविंशतिधा (27) विभक्तः । तत्र एकैकस्य भागस्य एकैकनक्षत्रात्मना व्यवहारः । अद्य सूर्यः यदा उत्तरभाद्रपदामधिवसति तदानीं चैत्रविषुवान् भवति। एवमेव न पूर्वमासीत् । तैत्तिरीयसंहितापर्यालोचने कृत्तिकास्थे सूर्ये विषुवान् असीदिति ज्ञायते । एवं चेत् विषुवतः चलनं सिद्धम् ।

कालक्रमेण सर्वेषु नक्षत्रेषु विषुवान् संभवितुमर्हति । सोऽयं विषुवत्सञ्चारः उत्तरोत्तरनक्षत्रात् पूर्वपूर्वस्मिन् भवति । तत्र एकं नक्षत्रं विहाय नक्षत्रान्तरगमनाय षष्टिनवशती (960) वर्षाणि अपेक्षितानीति गणयित्वा निर्धारयन्ति। एतदनुसारेण प्रकृते गणने क्रियमाणे (960 × 4½ = 4320 – 1930 = 2390 B. C) चतुश्शतीद्विसहस्री वर्षेभ्यः पूर्वं कृत्तिकायां वसन्तसम्पात इति कल्पनीयम् । यश्च ग्रन्थः एतं एवं प्रतिपादयति स ग्रन्थः तत्कालभव इति ग्रहणे न कश्चित् क्लेशः । अतः तैत्तिरीयसंहितायास्तावत्कालः असन्दिग्धं निर्धारितो भवति।

एवं ऋक्संहितापर्यालोचने मृगशीर्षमपि कदाचित् विषुवत्स्थानमासीदिति ज्ञायते । तदनुरोधेन 960 × 2 = 1920 एषां वर्षाणां संकलने मार्कि B. C. चतुश्शतीचतुस्सहस्रीवर्षेभ्यः पूर्वं तत्काल इति निश्चीयते। न परं एतावत्। तैत्तिरीयसंहितायामेव स्थितं विषयविशेषं विमृशतां पुनर्वसुनक्षत्रेऽपि वसन्तविषुवान् आसीदिति निश्चिता मतिर्भवति । ऋक्संहितायामपि एतत्सूचकाः विषयास्सन्तीति निरूपयन्ति। एतदपि चेत् तात्विकं स्यात् तर्हि पुनरपि वर्षसहस्रद्वयं पूर्वसङ्ख्यया सङ्कलनीयम् । तथा च चतुश्शतीषट्सहस्री 6400 प्रभृति चतुश्शती द्विसहस्री (2400) पर्यन्तं संहिताकाल इति पर्यवस्यति ।

शतपथब्राह्मणे कृत्तिकानक्षत्रविषये एवमुच्यते 'प्राच्यै दिशो न च्यवन्ते' इति। ईषदपि उत्तरतः दक्षिणतो वा अनपक्रम्य साक्षात्प्राच्यां उद्यन्तीत्यर्थः। ऋषिषु स्वकाले दृष्टां स्थितिमेवं वदत्स्वपि, अद्य कृत्तिकाः किञ्चिदुत्तरत एव उद्यन्ति । एवमपक्रमणाय अपेक्षितस्य कालस्य गणने पञ्चसहस्राणि वर्षाणीति सिद्ध्यति । तथा च शतपथब्राह्मणकालः उद्देशतः क्रिस्तोः प्राक् त्रिसहस्री ।

अयमेव निर्धारणप्रकारः मैत्रायणीयोपनिषदः कालः B. C. क्रिस्तोः नवशतीसहस्रं (1900) इत्यत्रापि ।

इत्थं वैदिकग्रन्थजातस्य अतिप्राचीनं कालं सिद्धान्तयन्त एते तिलकप्रभृतयः सर्वे पाश्चात्यानां वेदविषये अर्वाचीनकालकल्पनाग्रहः अतिमहानिति मुक्तकण्ठं वदन्ति। तत्त्वमपि तथैव । किन्तु तिलकादीनपि प्रति अस्मत्संप्रदायानुसारिभिः वैदिकपण्डितैः एवमेवोच्येत ।

वसन्तसम्पातस्य कृत्स्ने नक्षत्रमण्डले सकृत्प्रचाराय षड्विंशतिसहस्री वर्षाण्यपेक्षितानि। अनादौ संसारे कियन्तः प्रचाराः भूताः स्युः। तत्र अद्यतनं प्रचारं आदाय उक्तरीत्या तिलकप्रभृतयः वेदकालं निर्धारयन्ति। इतः प्राक्तने प्रचारे यदा कृत्तिकायां वसन्तसंपातः आसीत्, सः तत्प्रतिपादकवेदकाल इति कुतो न निर्धार्येत इति यदि अनुयुज्येत, तत्र "तावत्प्राचीनेन नैव केनचिन् ग्रन्थेन भवितुं शक्यम्" इत्येवं स्वबुद्धिकृतमाक्षेपमन्तरा न किञ्चिदन्यत् तैर्वक्तुं शक्यम्।

इति वेदकालः

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

## दक्षिणाप्रशंसा।

काठकद्वितीयप्रपाठकाष्टमानुवाके वरत्रयमाम्नाय प्रजापतेर्महर्षीणां च वृत्तान्तेन दक्षिणा प्राशस्यत। तत्रैवं प्रजापतेरुदन्तेन दक्षिणायाः प्रशंसा— 'पुरा कदाचित् प्रजापतिः प्रजा उत्पादयिष्यामीति कामयित्वा तपोऽतप्यत। तदा स स्वाभीष्टफलत्वेन किञ्चिद्धिरण्यमुदपादयत्। तत्स्वकार्यसिद्ध्यर्थमग्नौ प्रास्यत्। अग्नौ प्रक्षिप्तं हिरण्यं प्रजापत्यर्थं कार्यप्रतिबन्धस्यापवारणं नाकरोत्। अथैवं हिरण्यमग्नौ द्विः प्रास्तमपि तदर्थं कार्यप्रतिबन्धस्यापवारणं नाकलयदेव। ततः स प्रजापतिर्हिरण्यस्य बाह्यवह्नौ प्रक्षेपं परित्यज्य स्वशरीरमध्य एव हृदयपुण्डरीकसमीपवर्तिनि सर्वपुरुषहिते जाठराग्नौ तत्प्राक्षिपत्। जाठराग्नौ प्रक्षिप्तं हिरण्यं प्रजापतये कार्यप्रतिबन्धस्यापवारणं व्यदधात्। यस्माद्बाह्येऽग्नौ प्रक्षिप्तमकिञ्चित्करं जाठराग्नौ प्रक्षिप्तं कार्यकरञ्चासीत् तस्माल्लोके हिरण्यं बाह्यदेशे भूमिमज्जूपादौ प्रक्षिप्तं सत् भोगानुपयुक्तत्वात् धनानाम्मध्ये कनिष्ठमुच्यते। यद्धनमाभरणादिरूपेणान्नादिरूपेण वा भोगोपयोगि भवति तदेव सर्वेषां प्राणिनां प्रियतमम्। यस्मात्प्रजापतेरिव भोक्तृणां हृदयसम्बन्धि तस्मादस्य

प्रियतमत्वं युक्तम् । प्रजापतिरुक्तरीत्या चेतने प्रक्षिप्तस्य हिरण्यस्य प्रियतमत्वं पर्यालोच्य यस्मै चेतनाय पुरुषाय हिरण्यरूपां दक्षिणां स्वयमनेष्यत्तमेव चेतनं पुरुषं प्रतिग्रहीतारमन्विष्य तदानीं नाविन्दत् । पुरुषान्तरमलब्ध्वा स्वकीयायैव दक्षिणहस्ताय हिरण्यरूपां दक्षिणामनयत् । नीत्वा च हे हिरण्य, त्वद्रूपां दक्षिणां कार्यसमर्थाय प्रतिगृह्णामीति वदन् स्वयमेव तां दक्षिणां प्रत्यगृह्णात् । ततः प्रजापतिर्दक्षिणां प्रतिगृह्य कार्यसमर्थोऽभवत् । अन्योऽपि यः पुमान् हिरण्यवृत्तान्तं वेद सोऽपि दक्षिणां प्रतिगृह्य कार्यसमर्थो भवत्येव' इति ।

महर्षिवृत्तान्तेन दक्षिणायाः प्रशंसा त्वित्थम्— 'अन्नदाननिमित्तकीर्तियुक्तत्वेन वाजश्रवोनामधेयस्य कस्यचिन्महर्षेस्सुता गौतमगोत्रोत्पन्ना महर्षयो दक्षिणामाहात्म्यं विद्वांसोऽनूदेश्यामपि दक्षिणां प्रतिगृह्णन्ति । दक्षिणा द्विविधा प्रत्यक्षमेव दत्ता अनुदिष्टा चेति । दानार्थधातुनैव विहिता प्रत्यक्षदत्ता । देवताभ्यस्समर्पिताऽनुदिष्टा । ते देवतार्थमनूदेश्यामसुख्यामपि दक्षिणां प्रतिगृह्णन्ति यदि किं वक्तव्यं प्रत्यक्षदत्तां मुख्यां दक्षिणां प्रतिगृह्णन्तीति । ते मुख्यामुख्यदक्षिणाप्रतिग्रहेण वयं दक्षिष्यामह एवेत्याशेरत । ते तथैव दक्षिणां प्रतिगृह्यादक्षन्त । योऽप्यन्यो महर्षिवार्तां वेद सोऽपि दक्षिणां प्रतिगृह्य दक्षत एव । द्रव्यरहितं स्वविरोधिनं हविश्शीर्णं करोत्येव' इति । अत्रायमाम्नायाशयः— दक्षिणा स्वस्य प्रतिग्रहीतुः कार्यसामर्थ्यस्याधानात्प्रशस्ता । दक्षिणाहीनो यागो गर्हितः । विश्वजिदध्वरस्य सर्वस्वं दक्षिणा । नचिकेताश्च पितुः स्वम् । ऋत्विजे तस्यादाने सर्वस्वदक्षिणाकत्वाभावात् क्रतोर्वैगुण्यं भवेत् । अत आस्तिको नचिकेता एतत्परिजिहीर्षुस्सन् 'तत कस्मै मान्दास्यसि' इति त्रिः पितरमुवाचेति ।

अत्रत्ये 'तदात्मन्नेव हृदय्येऽग्नौ वैश्वानरे प्रास्यत्' इति वाक्ये वर्तमानावग्निवैश्वानरशब्दौ परमात्मपराविति वैश्वानराधिकरणे श्रीभाष्यकारा अभाषन्त ।

---

शेक्स्पिअर् कृतम्

# यथाभिमतम्॥

[V. 4 (अनुवृत्तम्)]

---

ततः प्रविशति जाक्विस् डि बायस्।

जा. डि. बा.— दर्शनं देहि मे देव मम वाचमिमां शृणु।
अहं द्वितीय आर्यस्य रोलन्द्-अस्य तनूभवः।
यो वार्तामाहरत्यस्मै महते सदसे त्विमाम्।
इदं महान्तः पुरुषा आश्रयन्ति दिनेदिने।
अरण्यं यत् तदाकर्ण्य विमनाः फ्रेडरिक् नृपः।
आयोजयति सेनां स्म महतीं यामसौ स्वयम्।
नेतृभावं समालम्ब्य समाकर्षत, सहोदरम्।
वसन्तमिह संरुध्य छेत्तुमस्य शिरोऽसिना।
अरण्यस्य यदा चास्य पर्यन्तमयमागतः।
समागमस्तदा तस्य केनाप्यासीत् तपस्विना।
तेन सम्भाषणे वृत्ते बिभिदे तस्य सा मतिः।
संन्यासी च स संवृत्तो राज्यं भ्रात्रे प्रवासिने।
प्रकल्प्य तत्सहायेभ्यस्तेषां स्वं च दिशन् पुनः।
इदं हि सकलं सत्यं जीवितेनापि मे शपे।

राजा— स्वागतं तेऽस्तु हे सौम्य त्वद्भ्रातुः शुभकर्मणः।
उचितं यत् तदेव त्वमद्य ह्यानीतवानसि।
एकस्य क्षेत्रमाक्रान्तं राज्यमन्यस्य ऋद्धिमत्।
आदौ तावदरण्येऽस्मिन् य उपक्रम्य सम्भृताः।
उद्देशास्त इमे सर्वे निर्वर्त्यन्तां निरर्गलम्।
ततःपरमिहास्माभिः सहवासे कृतादराः।
ये दिवानिशमत्यन्तमभवन् क्लेशभागिनः।
अद्योत्पन्ने नवे भाग्ये सर्वे ते सन्तु भागिनः।
एकैकोऽपि यथार्हं स्वं भागमाप्नोतु निर्वृतः।
साम्प्रतं तु समस्तं तत् विस्मृत्य ननु गौरवम्।

ग्रामोत्सवनयेनेदं कल्याणं वर्तयेम नः।
आरभ्यतां तु सङ्गीतं हन्त यूयं वधूवराः।
आनन्दकाष्ठां भजत पूरयन्तो मनोरथान्।

जाकिस्— शृणु राजन्, किमात्थ त्वं स राजा किल साम्प्रतम्
आधिराज्यं निजं त्यक्त्वा निवृत्तिनिरतोऽभवत्?

जा. डि. बाय्स्— आम्। अभवत्।

जाकिस्— उपसर्पामि तमहं श्रोतव्यं वर्तते यतः।
तादृग्भ्यः प्रतिबुद्धेभ्यो बोद्धव्यमपि भूरिशः॥

(राजानं प्रति)
प्राक्तनं वैभवं सर्वं स भवान् प्रतिपद्यताम्।
क्षमावान् धर्मशीलश्च तद्भवान् सर्वथाऽर्हति।

(आर्लण्डो-इमं प्रति)
अव्याजरागजितया कान्तया सङ्गमोऽस्तु ते।

(आलिवर्-इमं प्रति)
त्वं विभूतिं च कान्तां च सुहृदश्च समेधय।

(सिल्विअस्-इमं प्रति)
अनया कान्तया साकं रतिमर्हन् चिरं भज।

(निकषोपलं प्रति)
दिशामि कलहेभ्यस्त्वां त्वदीया कामनौर्यतः।
मासद्वयैकपर्याप्तभुक्तिसम्भारसम्भृता॥

(सर्वान् प्रति)
यात भोगेषु पतत सर्वे यूयमहं पुनः।
नृत्तलीलारसादन्यद् यत्तत्र विनिविष्टधीः।

राजा— तिष्ठ, जाकिस्, तिष्ठ।

जाकिस्— विनोदप्रेक्षको नाहं ज्ञेयं त्वत्तो यदस्ति मे।
त्वद्विसृष्टगुहावासात् ज्ञास्यामि तदहं नृप॥
[निष्क्रान्तः]

राजा— एतैत कर्माणि शुभान्येतानि प्रारभेमहि।
नियतं हि भविष्यन्ति महानन्तफलानि नः।
(नृत्तम्)

—

## भरतवाक्यम्

रोसलिन्द् — नेयं पद्धतिः यत् स्त्री उपसंहारवाचं भाषमाणा दृश्यत इति। किन्तु यत् प्रभुः* उपक्रमवाक्यं भाषमाणो दृश्यते तत इदं अरमणीयं न भवति। समीचीनं मधु ख्यापनं नापेक्षत इत्ययं यदि परमार्थः तर्हि समीचीनं नाटकं उपसंहारे प्रशंसावाचं नापेक्षत इत्ययमपि परमार्थ एव। अथापि समीचीनस्य मधुनः ख्यापनं कुर्वन्ति। समीचीनानि च नाटकानि समीचीनाभिरुपसंहारवाग्भिरुपकृतानि रम्यतराणि भवन्ति। एवं सति किं नाम मां प्रति वक्तव्यमस्ति, या समीचीनोपसंहारवाग्भाषणे न प्रगल्भा नापि नाटकसामीचीन्याभिप्रायोत्पादनौपयिकं भवतां हृदयावर्जनं कर्तुं क्षमा। नाहं याचकवेषं धारयामि। तस्माद् याचनं मेऽनुचितम्। विषयस्य अभ्यर्हिततत्वप्रदर्शनेन भवतां तत्र प्रावण्यसम्पादनं पुनरद्य मया कर्तव्यम्। प्रथमं स्त्रियः सम्बोधयामि। हे स्त्रियः इदं भवतीर्विज्ञापयामि, यो भवतीनां पुरुषेषु कामः तस्य कृते अस्मिन्नाटके तानंशानाद्रियध्वम्, ये युष्माकं आदरणीयाभान्ति। अथ च हे पुमांसः, इदं भवतो विज्ञापयामि, यो भवतां स्त्रीषु कामः (भवतां हि स्मितेन जानामि न कोऽपि युष्मासु ता द्वेष्टि) तस्य कृते युष्माकं स्त्रीणां च मध्ये इदं नाटकं रम्यं भवतु। यद्यहं काचन स्त्री अभविष्यम्, अहं तेभ्यः सर्वेभ्यःचुम्बितं दद्याम्, येषां मनोहरं श्मश्रु, मनोहरा आकृतिः अजुगुप्सावहः श्वासश्च भवति। अपि च अस्ति मे निश्चयः ते सर्वे, येषां मनोहरं श्मश्रु, मनोहरा मुखच्छाया, मधुरःश्वासश्च भवति, मया कृतस्य विज्ञापनस्य कृते, प्रणमन्त्या मे शुभाशिषं प्रयोक्ष्यन्ते।

---

कार्पण्येन यशः क्रुधा गुणचयो दम्भेन सत्यं क्षुधा
मर्यादा व्यसनैर्धनानि विपदा स्थैर्यं प्रमादैर्द्विजः।
पैशुन्येन कुलं मदेन विनयो दुश्चेष्टया पौरुषं
दारिद्र्येण जनादरो ममतया चात्मप्रकाशो हतः ॥ ५ ॥

[नवरत्नमाला]

---

* प्रभुवेषधारी नटः।

# प्रणयप्रवणौ

(अनुवृत्तम्)

---

अतिचपलं स्वबालकं नेतुं तत्र समागता तज्जननी सस्मितं नौ वीक्ष्य स्वशिशुमादाय प्रतिवृत्ता। ततः कलङ्कितहृदयेव मे कान्ता मामपृच्छत्—

"मन्ये, न किमपि शिशोर्जननी स्वमनसि कुर्यात्"।

"सुष्ठु तर्कयसि। किमस्त्यत्र विशेषेण मनसि कर्तुम्? भूपतनमेव प्रायेण शिशूनां देहबलावहम्।"

इत्थं सँल्लपन्तावेव उपवनात् बहिरागत्य गृहाभिमुखं प्रस्थितौ प्रकृतिमापन्नां मे प्रेयसीं स्ववशीकर्तुं मयोपक्रान्तम्—

"हन्त, न मया सुकुमारं तत्कुमारमुखं विस्मर्तुं पार्यते"

सत्यं, अतिमात्रमाकर्षकं तद्वक्त्रम्"

"न केवलमाकर्षकमेव, उत्कण्ठाजनकमपीति मे मतिः"

"भवदुत्कण्ठया अहमप्युत्कण्ठितेव संवृत्ता"

"सैषा मे प्रियाया उत्कण्ठा प्रियतरा फलदायिका च भूयात्।"

"अस्ति फलप्रदायित्वहेतुर्भवदाशीर्वचसः"

कोयं हेतुः?"

"फलितप्रायमिव भवतां मनोगतमित्येव हेतुः"

"कथमिव?"

"तत्तु न वक्तुं शक्यम्।

"तेन ह्यलं वृथाकण्ठक्षोभेण। मनोगतं मे वक्तुं यदि न ते मनःप्रवृत्तिः तर्हि किमर्थमेवं मायिकं प्रलपसि"

"यदा मन्मनोगतं न निवेद्यते तर्हि सः मायिकप्रलापः। भवतां मनोगतगूहनं तु मायामोहविवर्जितं मनीषित्वं नाम।"

तयाहं मूकीभावं प्रापितः। नाहमुपरि तथा सह सँल्लपितुमुत्सुकः; नापि मे मनस्तापपातेन तां सन्तापयितुमुद्युक्तः।

गृहमागत्य मौनिनैव मया भुक्तम्। तयापि स्वकार्येषु तूष्णींमेव प्रसृतम्। भृशमहं उद्विग्नमना आसम। अतः स्वप्तुं स्वकोष्ठं गतः, तत्र शय्यायामुपविष्टश्च। दयितागमनात् पूर्वमेव निद्रातुं कृतनिश्चयः हस्तगतं किञ्चन पुस्तकमादाय यदृच्छयाऽऽगतं किमपि पुटं दृष्टवान्। तत्रेदं पद्यमुपलब्धम्—

प्रणयप्रवणा दयिता मुदिता
मृदिता पतिमाक्रमितुं प्रसृता ।
प्रणयप्रवणो रमणो रमणीं
किमुवा किमुवा किमुवा कृतवान् ॥

अतिमात्रमुद्दीपकं पद्यम् । परं कथमधुना प्रियाया व्यङ्ग्यवचनेन अधिक्षिप्ता मे मतिः स्वसपत्नी भावं शिथिलीकृत्य राजदारिकादासीव तत्प्रणये प्रसरेत् ? अतो नैतच्छक्यम् । निद्रादेवीमेवाद्य शरणं गच्छामीति मत्वा तदर्थं प्रयतमान आसम् । परं न निद्रादेवी मामनुग्रहीतुमुत्सुकेव । तस्मात् मार्गान्तरमन्विष्यन् पूर्वोक्तमेव पद्यं प्रकारान्तरेण विरचयितुं प्रवृत्तः—

प्रणयप्रवणौ दयितौ मृदितौ
मृदितौ मिथ आक्रमितुं प्रसृतौ ।
रमणी रमणं रमणो रमणीं
किमुवा किमुवा किमुवाऽकुरुत ॥

"किमुवा भवद्भिः क्रियते ?"

मत्पृष्ठतः प्रियालापः श्रुतः । किमुवाशब्दश्रवणेन मे मनः चकितमभूत् । तया मत्प्रणीतं पद्यं सुष्ठु दृष्टमिति मया सम्यगवगतम् । शनैः प्रियामुखं वीक्ष्य मया तूष्णीम्भावः अवलम्बितः । दयमानेव सा मत्पुरत आगत्य मदभिमुखं उपविष्टा । नागवल्लीपल्लवैर्विरचितं ताम्बूलं मद्धस्ते अर्पयितुं स्वपाणिपल्लवं प्रसारितवती । स्वयमागस्य ताम्बूलस्य ग्रहणाय परवशीभूतेन मे करेण तस्याः करं सोत्कण्ठमाकृष्य स्ववदनाभिमुखमनयम् । सा तु अनाकृष्यैव स्वकरं मच्चेष्टितं अनभिलषमाणेव मां मृदुना स्वरेण पुनरवोचत्—

'किमुवा भवद्भिः क्रियते ?'

तस्याः पाणिपल्लवेन सह मया ताम्बूलं च चर्वितम् । प्रत्युत्तरमपि दत्तम्— 'यत् स्वकान्तया कर्तव्यं तदेव'

"कान्तेनेत्युच्यताम्"

"कान्ताभ्यामित्येव वक्तव्यं"

"कुतः ?"

"परस्परभेदाभावात्"

"वाच्येव भेदाभावः, मनसि तु महानेव भेदः"

TIRUPATI

"कथमिव ?"

"यथा स्वमनोगतं मनस्येव निगूह्यते"

"अतिनिपुणासि। स्वमनोगतं तु प्रायेण वात्यया नीतमिव।"

"भवद्भिरेवाधुना अतिनैपुण्यं प्रदर्श्यते। न मया प्रथमं मे मनोगतं गूहितम्।

"भवन्त एव तत्र पथः प्रदर्शयितारः"

"किं तथा प्रथमं मया कृतम् ?"

"गणितगणनच्छलेन किमपि मन्त्रयित्वा अनाविष्कृतमेव"

"हन्त स्मर्यते। तत्तु अतिसाधारणमेव। एकं एकेन मिलितं सत् द्वयं सम्पद्यते। परं तत्र लिङ्गभेदेकृते तदेव त्रिकं भवितुमर्हति।"

"अतिगहनेयं गणनशैली। कथमिव ?"

"तथाहि, एकः एकया सङ्गतः त्रिको भवति।"

इदमुक्त्वा तामहं सकौतुकमपश्यम्। सा तु स्मेरस्मितं विधाय प्रत्युत्तरं दत्तवती—

"अतिमनोज्ञेयं मनःकल्पना"

"अस्तु तावत्। कीदृशी ते मनःकल्पना ?"

"मयि न कस्या अपि मनःकल्पनाया आवश्यकता"

"कस्तेऽभिप्रायः ?"

क्लृप्तस्योपरि कल्पनारोपणं अन्याय्यमिति"

"त्वयि किं वस्तु क्लृप्तमस्ति ?"

'भवद्भिर्गदितस्य गणितस्य त्रिकरूपं फलं मय्यस्ति।'

ससाध्वसमिदमुक्त्वा सा मां द्रष्टुमधीरेव स्वयमधोमुखी जाता। सहसा अहं तस्याः कमलवदनं उन्नमय्य निर्निमेषं तां नेत्राभ्यां पिबन्नासम्। स्मेरमुखी सा अतितीक्ष्णेन अपाङ्गवीक्षणेन मे हृदयधृतिं मुष्णाति स्म। मन्दमन्दं मे करः मृदुलशीतलं प्रियायाः करकमलं स्थगयति स्म। अधरमधुपानेन मदघूर्णिता सा, वनानिलोद्धता वल्लरी वृक्षकमिव मां आक्रमितुं प्रसृता। वेपथुमतीं तां दृढोपगूहनेन विनोदयिष्यन्नहं मत्प्रणीतं पद्यमेवास्मरम्—

"प्रणयप्रवणौ दयितौ ... ...." इत्यादि।

(भासः)

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५६ मन्मथ - मेष [सं ८

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

APRIL 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्ध-सञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D.T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः—श्रीगीतार्थदीपः ११७— १२०

TIRUPATI

केन प्रयुक्तः, कः प्रयोजकः, इति प्रश्नस्य 'कामः प्रयोजकः', क्रोधः प्रयोजकः', इत्युत्तरम् । एतेन द्वौ प्रयोजकावुक्ताविति न मन्तव्यम् । उत्तरत्र सर्वत्र कामस्यैकस्यैव प्रतिपादनात् । कामस्यैव हि परिणामविशेषः क्रोध इत्युच्यते । कामः अनेकरूपः सन् विरोधमाचरतीति प्रदर्शनाय तु वाक्यभेदेन क्रोधस्यापि प्रयोजकत्वमुक्तम् । तत्र कामस्योत्पादकमुक्तम्— रजोगुणसमुद्भव इति । 'विषयानुभववासनाबीजानां कामक्रोधाद्यङ्कुरोत्पादने रजोगुणः सलिलसेकः । ननु कामादिर्हि अस्मन्मते ज्ञानविशेषरूप आत्मधर्मः । रजस्तु प्रकृतिगुणः । अन्यधर्मस्य कथमन्यत्र कार्यकरत्वम्, इति चेन्न । औष्ण्याश्रयदहनसंयोगाद् यथा करतलादौ स्फोटादिः तथा गुणाश्रयप्रकृतिसंसर्गादात्मनि कामादिरित्युपपत्तेः' । शरीररूपतया परिणतत्रिगुणप्रकृतिसंसृष्टो हि पुरुषः । तत्र त्रिषु गुणेषु सत्त्वस्योद्भवावस्थायां विषयानुभवविमुखः आत्मावलोकनमिच्छन् ज्ञानयोगे प्रवर्तते । अथ यदा सत्त्वमभिभूय रज उद्भवति तदा कामो जायते । रागस्य उत्कटावस्था कामः । तेन प्रयुक्तः पापं चरतीत्युक्तं भवति ।

कामस्य गर्हणीयत्वोपयुक्तमाकारमाह— महाशन इति । 'महदशनं भोग्यं यस्य स महाशनः' । क्रोधस्य तथाविधाकारः महापाप्मेति । 'महान् पाप्मा पापं कार्यतया यस्यास्ति स महापाप्मा । 'क्रुद्धो हन्याद्गुरूनपि' इति हि प्रसिद्धम्' । एवं प्रश्नस्योत्तरमुक्तम् । अथ प्रस्तुतं ज्ञानयोगस्य दुष्करत्वं एतत्कृतमिति 'तौ ह्यस्य परिपन्थिनौ' इत्यनेन यत् पूर्वं ज्ञापितं तत् पुनरत्राह— 'विद्ध्येनमिह वैरिण'मिति । एनं रजोगुणसमुद्भवं प्रकृतिसिद्धं च कामं इह ज्ञानयोगे वैरिणं विरोधिनं विद्धि ।

அர்ஜுனன் சொன்னான்—

ஓ க்ருஷ்ணா, மனிதன் விரும்பாமலிருந்தும் பலாத்காரம் செய்யப்பட்டவன் போல் உலகஸுகங்களைப் புசிக்கப் புகுகிறது எதனால்? எது அவனை அப்படிச் செய்விக்கின்றது?

ஸ்ரீ பகவான் சொன்னார்—

ரஜோகுணத்தினால் உண்டாகி பெருந்தீனி கொள்கின்ற காமம் அது. அதுவே மிகக் கொடிய பாவத்தைச் செய்யக் கூடிய கோபமாகிறது. அது ஜ்ஞானயோக விஷயத்தில் பெரும் சத்ரு 37
என வறியவேண்டும்.

१५७ धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च।
यथोल्बेनाऽऽवृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

वैरित्वप्रकारमाह। तेन कामेन इदं लोकप्रतीतं जन्तुजातं आवृतम्। परीतमित्यर्थः। अत्र दृष्टान्ताः। यथा धूमेन वह्निराव्रियते, यथा मलेन आदर्शः दर्पणः आव्रियते, यथा च उल्बेन गर्भ आवृतः तथेति। 'अनादिवासनानुबन्धित्वेन सहजत्वं, निवृत्तस्यापि पुनः पुनरुपाधिवशादागमं, स्वेच्छया निवारयितुमशक्यत्वं च दर्शयितुं दृष्टान्तत्रयोपादानम्।'

காமம் பெரும் வைரி எனப்பட்டது. எப்படி வைரி என்பது இங்குக் கூறப்படுகின்றது. புகையினால் அக்னி போலவும், அழுக்கினால் கண்ணாடிபோலவும், உல்பம் என்கிற பையினால் கர்ப்பம்போலவும் அக் காமத்தினால் ஆத்மா மூடப்பட்டிருக்கின்றது. 38

१५८ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

आवृतमित्युक्तम्। आवरणप्रकारमाह। पूर्वश्लोके इदमिति सामान्ये नपुंसकमिति ज्ञापनाय जन्तुजातमित्यर्थ उक्तः। शरीरसंसृष्ट आत्मा तत्र विवक्षितोऽर्थः। स आत्मा इह ज्ञानिन इति ज्ञानस्वभावतया उपादीयते। ज्ञानं तस्य स्वाभाविको धर्मः। तथाभूतस्य तस्य यद् ज्ञानम्; ज्ञानमिति सामान्यतः श्रवणेऽपि आत्मविषयं ज्ञानं विवक्षितम्। इदं आवृतम्। एवं च पूर्वश्लोकोक्तमावरणं विषयव्यामोहजननमुखेन आत्मविषयज्ञानावरणद्वारा विवक्षितमिति ज्ञेयम्। एतेन आत्मसाक्षात्कारसाधनतया परमहितं यत् आत्मध्यानरूपं ज्ञानं तद्विरोधितया कामस्य वैरित्वमित्यपि दर्शितं भवति।

केनावृतम्? एतेन कामरूपेण नित्यवैरिणा अनादिवैरिणा, सहजशत्रुणा। कथम्भूतेन? दुष्पूरेण प्राप्त्यनर्हविषयेण। प्राप्तुमनर्हे अशक्ये-

ऽप्यर्थे कामो भवति । तस्मात् स दुष्पूरः । अनलेन पर्याप्तिरहितेन च । 'योग्यैर्लब्धैरलम्भावराहित्यमनलशब्दार्थः ।' 'यद्वाऽनलशब्दोऽग्निपर्यायः कामे गौणः । न ह्यग्नेर्विषयविश्रामः पर्याप्तिर्वा स्यात् । तद्वदिति । कौन्तेय कुन्तीपुत्र, शरीरभाजा भवता स्वानुभवेन इदमवधारणीय'मिति भावः ।

கிடைத்ததனால் த்ருப்தியடையாததும் கிடைக்கக் கூடாத பொருள்களைப் பற்றி நின்று நிறைவேற்ற முடியாததாயுமிருக்கின்ற இந்தக் காமம் என்கிற அநாதி சத்ருவினால் ஆத்மாவைப் பற்றிய ஜ்ஞானம் மறைக்கப்பட்டிருக்கிறது. இப்படி ஆத்ம ஜ்ஞானம் உண்டாகாதபடி செய்வதினாலேயே இதனால் ஆத்மா மூடப்பட்டிருக்கின்றது என்று முன் சொல்லப்பட்டது. இதனாலேயே இது வைரி என்பது விளக்கப்பட்டது. அநுகூலத்தைத் தடை செய்பவன் வைரி. காமம் நமக்கு ஹிதமான ஆத்ம ஜ்ஞானத்தை உண்டாகவொட்டாமல் தடை செய்கின்றது. 39

१५९ इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

'कैरुपकरणैरयं काम आत्मानमधितिष्ठतीत्यत्राह ।' 'आवरणप्रकार उक्तः । अथावरणोपकरणानि अनन्तरं नियन्तव्यत्वोपदेशायोच्यन्त इत्यभिप्रायः ।' इन्द्रियाणि, मनः, बुद्धिः, इदं सर्वं अस्य कामस्य अधिष्ठानमुच्यते । अधितिष्ठत्येभिः अयं कामः आत्मानमिति अधिष्ठानम् । अधितिष्ठति स्वतन्त्रं सन्तमाक्रम्य परतन्त्रं करोति । तत्र यदुपकरणं तदधिष्ठानम् । एतैः बाह्येन्द्रियमनोबुद्धिभिः स्वोपकरणभूतैः एष कामः ज्ञानं आत्मविषयज्ञानाभ्यासं आवृत्य निरुध्य देहिनं प्रकृतिसंसृष्टं पुरुषं विमोहयति विविधं मोहयति । आत्मज्ञानविमुखं विषयानुभवपरं करोतीत्यर्थः ।

எவற்றைக் கொண்டு காமம் ஆத்மாவை தன் வசப்படுத்திக் கொள்கின்றது என்பது சொல்லப்படுகின்றது. கண் முதலிய வெளி இந்திரியங்கள், மனஸ்ஸு, புத்தி, இவை காமத்திற்கு

அதிஷ்டானம் அதாவது ஆத்மாவைத் தன் வசப்படுத்திக் கொள்வதற்குரிய கருவி எனப்படுகின்றன. இக்காமம் இவற்றைக்கொண்டு ஆத்மஜ்ஞானத்தை மறைத்து புருஷனைப் பல விதமாக மோஹமடையச் செய்கின்றது. (ஆத்மஜ்ஞானத்தை விட்டு உலகவிஷயங்களில் ஈடுபடச் செய்கின்றது.) 40

१६० तस्मात् त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

'अथ कामस्यात्माधिष्ठानोपकरणेषु इन्द्रियमनोबुद्धिषु प्रथममिन्द्रियाणां नियमनं कामविजयोपायतयोपदिश्यते'। 'तस्मादित्येतत् प्रकृतस्य ज्ञानयोगस्य उक्तप्रकारदुष्करत्वपरामर्शि'। 'यस्मात् सर्वेन्द्रियव्यापारोपरतिरूपे ज्ञानयोगे प्रवृत्तस्य अयं कामरूपः शत्रुः विषयाभिमुख्यकरणेन आत्मनि वैमुख्यं करोति तस्मादित्यर्थः'। हे भरतर्षभ, सत्त्वोत्तरकुलप्रसूततया योगाधिकारिन्। त्वं प्रकृतिसंसृष्टतया इन्द्रियव्यापारप्रवणः। आदौ मोक्षोपायारम्भसमय एव। इन्द्रियाणि, नियम्य इन्द्रियव्यापारानुरूपे कर्मयोगे अवस्थाप्य। ज्ञानविज्ञाननाशनं ज्ञानस्य आत्मस्वरूपविषयस्य, विज्ञानस्य तद्विवेकविषयस्य ज्ञानस्य च नाशनं नाशकं एनं कामरूपं पाप्मानं वैरिणं प्रजहि नाशम्।

''ज्ञानविज्ञानयोर्द्वयोरपि आत्मविषयत्व प्रकरणात् सिद्धम। तत्र च 'ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः इतिवत् स्वरूपतद्विवेकविषयत्वादपौनरुक्त्यम। विज्ञानं विविच्य ज्ञानम्। व्यावृत्ततया ज्ञानमित्यर्थः। प्रत्यग्ज्ञानानन्दत्वादिविशिष्टमात्मनः स्वरूपम् ; अणुत्वनित्यत्वज्ञातृत्वभोक्तृत्वकर्तृत्वादिर्भेदको धर्मवर्गोऽत्र विवेकः। यद्वा देहातिरिक्तः कश्चिदात्माऽस्तीत्येतावत् स्वरूपमिह विवक्षितम्। प्रत्यक्त्वादयोऽप्यणुत्वादिवत् विवेकतया विवक्षिताः। अथ वा तत् सर्वं स्वरूपम् ; विवेको विवेककरणं शास्त्रम्। ततः प्रमेय प्रमाणं चोक्तं भवति।

ஓ அர்ஜுநா, இப்படி ஜ்ஞானயோகத்தை அநுஷ்டிப்பது வெகு கடினமாகையினால் நீ முதலில் இந்த்ரியங்களை கர்மயோகம் அநுஷ்டிப்பதிலேயே செலுத்தி ஆத்மா இன்னது இவ்விதமானது என்கிற இவ்வறிவை யெல்லாம் நாசம் செய்கின்ற இக் கொடிய காமத்தை ஒழி.

१६१ इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥

'ज्ञानविरोधिषु प्रधानमाह'। "एवं विरोधिमात्राणामिन्द्रियाणां नियन्तव्यत्वमुक्तम्। अथ मनोबुद्धिकामाः नियन्तव्यतरतमत्वादिसिद्ध्यर्थं उत्तरोत्तरं विरोधितमत्वेन निर्दिश्यन्त" इति यावत् । ज्ञानविरोधे इन्द्रियाणि पराणि प्रधानानि आहुः, यतः इन्द्रियेषु व्यापृतेषु आत्मनि ज्ञानं न प्रवर्तते । मनः इन्द्रियेभ्यः परम् । इन्द्रियेषूपरतेष्वपि हि मनसि विषयप्रवणे आत्मज्ञानं न सम्भवति। मनसस्तु परा बुद्धिः। मनसि वृत्त्यन्तरविमुखेऽपि विपरीताध्यवसायप्रवृत्तौ सत्यां ज्ञान न प्रवर्तते। सर्वेषु बुद्धिपर्यन्तेषूपरतेष्वपि कामो रजस्समुद्भवो वर्तते चेत् स एव एतानि इन्द्रियादीन्यपि स्वविषये वर्तयित्वा आत्मज्ञानं निरुणद्धि। तदिदमुच्यते 'यो बुद्धेः परतस्तु सः' इति। सः कामः बुद्धेस्तु बुद्धेरपि यः परतः परः सः। श्रुतस्तच्छब्दः कामपरः । यच्छब्दप्रतियोगी तु अध्याहर्तव्यः। परत इति सार्वविभक्तिकस्तसिः प्रथमार्थे ।

ஆத்மஜ்ஞானத்தைத் தடுப்பதில் இந்த்ரியங்கள் ப்ரதானமானவை. ஏனெனில், இந்திரியங்கள் அவற்றின் விஷயங்களில் சென்றபோது ஆத்மஜ்ஞானம் உண்டாவதில்லை. இந்திரியங்களைக் காட்டிலும் மனஸ்ஸு ப்ரதானம். ஏனெனில் இந்திரியங்கள் அடங்கி இருந்தபோதிலும் மனஸ்ஸு விஷயங்களைப் பற்றிநின்றால் ஜ்ஞானம் உண்டாவதில்லை. மனதைக் காட்டிலும் புத்தி ப்ரதானம். ஏனெனில், மனஸ்ஸு வேறு விஷயங்களில் செல்லாவிட்டாலும் மற்றொன்றைச் செய்தே தீருவது என்ற த்ருடமான புத்தி உண்டாயிற்றாயின் ஜ்ஞானம் பிறவாது. புத்தியைக் காட்டிலும் கூட ப்ரதானமானது காமம். ஏனெனில், அவை எல்லாம் அடங்கிவிட்டாலும் கூட ரஜோகுணத்தினால் உண்டாகும் காமம் என்கிற விஞ்சிய ஆசையிருந்தால் இது அவற்றை யெல்லாம் விஷயங்களில் செல்லும்படி செய்து ஆத்மஜ்ஞானம் உண்டாகாதபடி செய்யும். 42

१६२ एवं बुद्धेः परं बुध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

ओं तत् सत् ।

इति

श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम
तृतीयोऽध्यायः ।

---

'सदृशं चेष्टते' इत्यादिना उपक्रान्ता या ज्ञानयोगस्य सप्रमादता तदुपसंहारद्वारा मनसः कर्मयोगेऽवस्थापनमभिधाय अध्यायार्थ उपसंह्रियते। एवं उक्तरीत्या कामं बुद्धेः परं बुद्ध्यपेक्षयाऽपि प्रधानभूतं ज्ञानयोगविरोधिनं बुध्वा ज्ञात्वा आत्मानं मनः आत्मना बुद्ध्या आत्मावलोकनविषयदृढाध्यवासयेनेति यावत् ; संस्तभ्य कर्मयोगे स्थापयित्वा ; 'कामविजयात् पूर्वं मनसः संस्तम्भनं नाम कर्मयोगे स्थापनमेव । न पुनरत्यन्तवशीकृतत्वम्। सति हि कामे मनसोऽपि क्षोभः स्यात् । दुरासदं 'अननुष्ठितकर्मयोगैः अनिरस्तपापैः अपाकर्तुमशक्यमित्यर्थः कामरूपं शत्रुं जहि नाशय । 'अचेतनस्य कामस्य शत्रुत्वारोपेण हिंसनीयत्वोक्त्या फलितं नाशनमेव'।

महाबाहो । भवतो बलपराक्रमादिः एवं सत्येव सफलः स्यादिति भावः ।

இப்படிக் காமம் ஜ்ஞானத்தைத் தடை செய்யும் விரோதிகளில் புத்தியைக் காட்டிலும் ப்ரதானமானது என்பதை உணர்ந்து மனஸ்ஸை கர்மயோகத்திலேயே நிலை நிறுத்தி காமம் 43
என்கிற இந்த ப்ரபல சத்ருவை ஒழி.

इति गीतार्थदीपे तृतीयोऽध्यायः ।

---

## अथ चतुर्थोऽध्यायः ।

श्री भगवानुवाच—

१६३ इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

१६४ एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥

१६५ स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

तृतीयेऽध्याये प्रकृतिसंसृष्टस्य मुमुक्षोर्ज्ञानयोगेऽशक्तस्य शक्तत्वेऽप्यप्रसिद्धस्य च स्वार्थनिपुणस्य कर्मयोग एव कार्यः ; प्रसिद्धस्य त्वशक्तस्य, शक्तस्य वा स्वार्थं लोकरक्षार्थं च स एव कार्य इत्यधिकारिचिन्तनं कृतम् । यथा *'ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्' इत्यादिना ज्ञानयोगाशक्तानां विषयव्याकुलबुद्धियुक्तानां कर्मयोगेऽधिकार उक्तः । † 'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः' इत्यारभ्य ज्ञाननिष्ठायां शक्तस्यापि कर्मयोगेऽधिकार उक्तः । 'कर्मणो ज्ञाननिष्ठाया ज्यायस्त्ववचनं ज्ञाननिष्ठायामधिकारे सत्येवोपपद्यते' §'लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि' इत्यादिना शिष्टतया व्यपदेश्यस्य सर्वथा कर्मयोग एव कार्य इत्युक्तम् । अतोऽधिकारिचिन्तनं तृतीयाध्याये । 'अथाधिकर्तव्यतयोक्तस्य कर्मयोगस्य प्रामाणिकत्वं, ज्ञानमिश्रत्वं, स्वरूपं, तद्द्वैविध्यं, ज्ञानांशप्राधान्यं, प्रासङ्गिको भगवदवतार इति पदार्था इहोच्यन्ते ।' 'प्रसङ्गात्स्वस्वभावोक्तिः कर्मणोऽकर्मतास्य च । भेदा ज्ञानस्य माहात्म्यं चतुर्थाध्याय उच्यते' इति गीतार्थसङ्ग्रहेऽपि प्रसङ्गः- प्रामाणिकत्वप्रसङ्गः, अस्य च भेदाः इत्यत्र स्वरूपमन्तरेण तद्भेदस्य दुर्ज्ञानत्वात् स्वरूपमपि विवक्षितम् ; चकारेण वा तत्समुच्चय इति पदार्था एव विवक्षिताः ।'

---

* गी– ३–३ † गी– ३–८ § गी– ३–२०

KENDRIYA SANSKRIT VIDYAPEETHA TIRUPATI LIBRARY



इयम्— तवोदितं मोक्षसाधनभूतं अव्ययम्, नित्यसर्वज्ञे भगवति स्थितत्वात्, फलद्वारा वा व्ययरहितम्, योगं कर्मयोगं, अहमेव विवस्वते प्रोक्तवान्, विवस्वांश्च मनवे, मनुरिक्ष्वाकवे, 'इत्येवं प्रसिद्धमर्यादाप्रवर्तनाधिकृतकोटिनिविष्टपित्रादिक्रमेण ह्युपदेशपरंपरा प्राप्ता, न तु सम्भवद्विप्रलम्भकुहकपाषण्ड्यादिसंसर्गप्राप्ता।' एवं सम्प्रदायपरम्परया इक्ष्वाकोरर्वाचीनानामप्यविच्छेदेन प्राप्तमिमं योगं विस्तीर्णागाधमनसो राजानः, तत्रापि ऋषित्वादतीन्द्रियार्थदर्शनक्षमाः अश्वपतिजनकाम्बरीषप्रभृतयो विदुः। स योगः इह विचित्राधिकारिपूर्णे जगति, कृतत्रेतादिषु युगेषु कालक्रमेण बुद्धिशक्त्यनुष्ठानादयोऽपचीयमाना दृष्टाः श्रुताश्च। महता कालेन तत्तच्छ्रोतृबुद्धिमान्द्यात् नष्टः विनष्टप्रायोऽभूत्। व्यासभीष्माक्रूरादेरिदानीमपि विद्यमानत्वान्नात्यन्तं विच्छिन्नः। हे परंतप, शत्रुतापन, कर्मयोगविरोधिनिरासकस्त्वम्। भक्तोऽसि मे शास्त्रदृष्टमहत्त्वानुसन्धानेन प्रीतिमानसि। सखा चासि अवतारदृष्टसौलभ्यविशेषेण प्रणयविस्रम्भवानसि इति हेतोः। स एवायं पुरातनो योगः ते मया अद्य प्रोक्तः— कालभेदमात्रेणापि न स्वरूपे वा प्रकारे वा भेदः, स एवायमस्खलितस्वरूपो योगः। *'शाधि मां त्वां प्रपन्नम्' इति प्रपन्नाय ते प्रपत्तव्येन मया सपरिकरस्सविस्तरमुक्तः। पूर्वमहमेव प्रोक्तवान्. अद्य मयैव प्रोक्तो योगः, प्रलयेन वा युगादिस्वभावेन वा सम्प्रदायविच्छेदे सति पुनरहमेव सम्प्रदायप्रवर्तकस्स्याम्; करणायत्तज्ञानेन मदन्येन मदुपदेशमन्तरेण ज्ञातुं वक्तुं चाशक्यम्; हि यतः, इदं वेदान्तोदितमुत्तमं रहस्यं ज्ञानम्; अतो मदन्येन ज्ञातुं वक्तुं चाशक्यम्। रहस्यायोग्याय तुभ्यमुपदेश्यम्; उत्तमरहस्यत्वादन्येन ज्ञातुं वक्तुं चाशक्यमिति विभागः।

ஸ்ரீ பகவான் சொன்னார்—

இந்த கர்மயோகமானது மோக்ஷபர்யந்தமானதினால் அழிவில்லாதது. இதை ஆதியில் நானே விவஸ்வானுக்கு உபதேசம் செய்தேன். அவர் தமது புத்ரனை வைவஸ்வத மனுவிற்கு உபதேசித்தார். மனு தம் புத்ரன் இக்ஷ்வாகுவிற்குச் சொன்னார். பிறகும் ஸம்ப்ரதாயக்ரமத்தில் தொடர்ந்துவந்த இதை ஜனகர் முதலிய ராஜர்ஷிகள் அநுஷ்டானம் செய்துவந்தார்கள். காலக்ரமத்தில் ஜ்ஞானசக்த்யாதிகளின் குறைவினால் யோகம்

* गी— २—६

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 9

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५६ मन्मथ - वृषभ [सं ९

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

MAY 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।
२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३ ग्राहकीबुभूर्षद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः ।
(संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* **D.T. Tatacharya Siromani, M. O. L.**
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

# विषयाः ॥

1 कलिप्रादुर्भावम् ।
2 परमाभ्युदयचम्पूः ।
3 मुकुन्दमाला ।
4 वैदिका विशेषाः ।
5 महद्भयम् ।
6 संस्कृतस्य पुनरुज्जीवनम् ।
7 प्रकृतिभेदः ।

KENDRIYA ... LIBRARY

एवं कृषिवाणिज्यादंशः कोशोपबृंहणं कुरुते ।
राज्ञामाकरजादि च वन्यं वा विपुलमर्थदायि फलम् ॥ २ ॥

शुल्कस्थानैर्दण्डैः प्रसादमूल्यैस्तथा विविधैः ।
अप्यर्थशास्त्रकाराः राज्ञां लाभं विवृण्वन्ति ॥ ३ ॥

सति चैवंप्राये आयतिमार्गे विशेषविधयोपबृंहणहेतोः ये पर्यालोचिता मया करनिपातप्रकाराः ते क्रमेण भवतामभ्युपपत्त्यनुग्रहार्थमावेदयिष्यन्ते। अस्मिन्नन्तरे, मदनन्तरोऽमात्यः प्रज्ञावाचस्पतिः कमपि भवतामनुमोदनार्हं कोशोपबृंहणनयमुपक्षेप्स्यति । स एष सुकरः सद्यःफलश्चेति प्रथमपर्यालोचनामर्हति ।

(इति विरमति)

अवरामात्यः—अमात्यवर्याणां निदेशेन महाराजानुमत्या चेत्थं प्राप्तावसरः सप्रश्रयमिदं विज्ञापयामि । श्रूयते किलास्मन्नगरे नेदीयसा कालेन बहवः किंपचाना निधिलाभेन सहसा ऋद्धिमन्तः समपद्यन्तेति । तच्च समन्तादुपलभ्यमानं निधिजातं सदयमुपभुज्यमानया रत्नगर्भया धर्मधुरन्धरस्य महाराजस्यैवोपदाहेतोरुपस्थाप्यत इति विशदो मे प्रत्ययः ।

सभ्याः— कः संशयः । अवितथम् । साधु दृष्टम् ।

अवरामात्यः— स एष कल्याणो विधिः इदानीमनुष्ठेयः यन्निधानेषु राजस्वाम्यनिर्धारणम् ।

पुरोहितः— अत्र च मनुरब्रवीत् ।

निधीनां तु पुराणानां धातूनामेव च क्षितौ ।
अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ॥ ४ ॥

किन्तु

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वा ॥ ५ ॥

अनेन हि विधिना स भगवान् धर्मशास्त्रविधाता पुराणादन्येषां निधानानामुपलभ्यमानस्वामिस्वामिसम्बन्धिनां परमेण षड्भागहरमेव राजानमाह। पुराणानां त्वर्धभाजम्। श्रुत्वा भवन्तः प्रमाणम्।

अवरामात्यः— प्रस्तुतोपयोगि प्रतिपादितं महाभागैः। अत्रैतदवधार्यम् निधिलाभो नाम प्रजानामनायासेन सम्पदः प्रगुणीभावः। न तु कृषिवाणिज्यादिवत् प्रयासैर्मूलधनव्यवहारैर्वा अधिगतः। कश्चिद्भूमौ धनं निधाय म्रियते। कालान्तरे तत्केनचिदासाद्यते। आसादयितुस्तस्य प्रथमदर्शनमन्तरा नास्त्यन्यत स्वत्वसंपादकं निदानम्। न तत्तेन कथमप्युपार्जितम्। इदं च अर्थशास्त्राभिमतं दर्शनम्। यत्किञ्चिदपि स्वं न क्षणमप्यस्वामिकं तिष्ठति इति। तेन च यदा किमपि स्वं स्वामिना त्यज्यते तत्तदैव पालनकर्तुः राज्ञः स्वं भवति। यतः यद्यत् कस्यचित्पुरुषविशेषस्य परिच्छन्नं स्वं न भवति तत्तत् राजस्वामिकं संपद्यते। एवं च भूमौ निखातं स्वं प्रनष्टस्वामिकं स्वं निसर्गादेव राजकीयं भवति। तस्मात् सकृदस्वामिकं स्वं निधानलक्षणोपलक्षितं स्वामिना स्वामिसम्बन्धिना वा पश्चादन्विष्टमपि राजस्वमेव तिष्ठति। अनेन नयेन पुरातनानामनुपलभ्यमानस्वामिस्वामिसंबन्धिनां निधीनां द्रष्टारमतिक्रम्य राजा एक एव भागी भवितुमर्हतीति कैमुतिकन्यायेन सिद्ध्यति।

महात्मनोऽपि मनोर्विधेरस्मिन्नंशे संस्कारमनुष्ठेयं कालानन्तर्यवशात् समाधेयं नूनमभिमन्ये। अत्र मनुरेखाव्यतिक्रमकातराणां मनोनरन्तराः वसिष्ठगौतमयाज्ञवल्क्यादय एव धृत्यवष्टम्भकाः। यत्ते मनुमनुसरन्तः पुराणनिधिप्राप्तौ राजानं भागपञ्चकहारिणं वदन्ति। तेन सत्यावश्यकत्वे मनुविधिव्यतिक्रमः धर्मप्रसक्तमनसां लोकक्षेमकृतव्यवसायानां निरवद्य इति स्फुटमवगम्यते। अतः प्रसक्तदेशकालोऽयं नयो राष्ट्रक्षेमङ्कराणामलोभवशङ्कतानां समाजिकानामभ्युपपत्त्या वर्धतामिति प्रार्थये।

सर्वे— अहो समीचीनमुपन्यस्तम्।

राजा— तेन हि समादिश्यतामियमुद्घोषणा "यो यः पश्यति निधानं तेन राजद्रव्यं तन्निर्यातयितव्यम्। निर्यातयिता वार्तोपहर्ता च प्रसादभाक्

भविष्यति । यस्तु आच्छादयति दृष्टश्रुतनिधानः स राजद्रव्यापहार-निर्दिष्टेन दण्डेन योजयिष्यते" इति

प्रधानामात्यः— यथा देवः आज्ञापयति । अथ च अभूत्प्रभातप्राया शर्वरी । श्वः कार्यशेषं समालोचयामः ।

राजा—तथा ।

[ सर्वे उत्थाय क्रमेण निष्क्रान्ताः ]

इति पञ्चमोऽङ्कः ।

---

## अथ षष्ठोऽङ्कः ।

[ ततः प्रविशन्ति नदीतीरमठे ब्राह्मणाः ]

प्रथमः— चिरयति तपस्वी कात्यायनमिश्रः ।

द्वितीयः— एवं प्रतिभाति मे । स वैश्यः दुरासदो भविष्यतीति । कुतः खल्वेवं विषीदति विप्रः ? क्षिप्रकारी पश्चात्तापशीलः । सर्वथा धर्मो वा अधर्मो वा प्रणयिनी श्रीः विच्छर्दितमानेव वधूः कृतोपसर्पणा नोपेक्षणीया ऋद्धिकामेन ; अयं च पाशमुत्सृज्य लाङ्गूलावलम्बं चिकीर्षति मूढो ब्राह्मणः ।

तृतीयः— इदमेवाश्चर्यं यद्वैश्यः प्रथमं निधानकुम्भमुपादायोपासीदत्कात्यायनमिश्रं 'गृहाणैतत्तव स्वम्' इत्यनुवर्तमानः । इदानीं तु धनवियोगकातरतया यत्स पलायते, तदनुरूपमेवास्य जन्मसिद्धोपार्जनधर्मस्य ।

प्रथमः— मन्ये विप्रलोभनायैव विप्रलोभोद्धर्षणमनेन दुष्टवैश्येन ह्यो विनीतवदुपक्रान्तमिति । [दृष्ट्वा] अये, दिष्ट्या समासादितवैश्यवराकः कात्यायनः ।

द्वितीयः— पश्यत ! पश्यत ! यथैव यूपायोपकृष्ट इव पशुः कृच्छ्रेणोपनीयते तथास्माकं प्राश्निकत्वं निष्प्रयोजनमापत्स्यते ।

तृतीयः— भवतु द्रक्ष्यामः । अन्ततो वर्तत एव खलु दुर्बलानां बलं राजा।

[ ततः प्रविशति ब्राह्मणेनानुगम्यमानः वैश्यः ]

तृतीयः— कात्यायन ! किं प्रतिपद्यते ते मित्रम् । सन्मनुष्यः खल्वयम्। ज्ञात एव बहुषु व्यतिकरेषु मया। भद्र किं प्रतिश्रुतमात्मनैव विसंवदिष्यसि । ह्यः किल त्वं ... ... ।

वैश्यः— पूज्यमिश्राः ! किमिदं धर्म्यम् ? किमिदं न्याय्यम् ? किमिदं योग्यम् ? कथमिदानीं विक्रीतक्षेत्रस्य ब्राह्मणस्य मदुपलब्धे निधानेऽणुमात्राप्याशंसा समुचिता ? नयदर्शिनां भवतां किमिदमनुमोदनक्षमम् ? यददृष्टायत्तां मदुपचितिं विलोपयितुमीहते लुभ्यन्नयं ब्राह्मणः ।

द्वितीयः— अवधत्त भोः यदणुमात्राप्याशंसा न समुचितेत्युक्तम् ।

प्रथमः— अयं च लुभ्यन् ब्राह्मणः !!

तृतीयः— भोः वैश्यमहत्तर ! तन्नूनमस्य पूर्वैरुपार्जितं स्वम् । यदेषां कुटुम्बेऽनादिनैवानेहसाऽस्य क्षेत्रस्य स्वाम्यमवस्थितम् ।

कात्यायनः— कष्टा खलु सा वेला यस्यां तद्विक्रयमन्वचिन्तयम् ।

तृतीयः— अपि चाज्ञानेन दत्तं न दत्तं भवति । त्वया क्षेत्रमूल्यमेवार्पितम् । किञ्च

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वा ॥ १ ॥

इति धर्मशास्त्रविधिना द्रष्टृहस्तात्स्वामिसंबन्धिना निधानप्रत्यन्वेषणं मनोरनुमतमिति व्यज्यते ।

प्रथमः— भोः वैश्य ! निबोध चैतद्यत्कुलघ्नेष्वघेषु ब्रह्मस्वहरणमुत्कटकोटिमारोहति ।

तृतीयः— तस्मादुभयसामरस्येनैवं विभागो भवतु । अर्धमर्धं स्वीक्रियतां परस्परम् । तत्रापि द्रष्टुः कृतार्थता । तस्यापि पूर्वस्वामिनो न प्रतारणम् ।

कात्यायनः— अहं च दरिद्रामि । अन्यथा कुतः क्षेत्रखण्डं कुलस्वमनादिसिद्धमित्थं हापयामि । त्वं चर्द्धिमान् ! बहुधा लब्धधनः । मामनतिसंदधानः श्रेयः प्राप्स्यसि ।

[1]तावेतौ स्मरशरधी तदुत्थमिन्धे
नाळीकं चरणमिषात्तदन्तिके यत् ।
नाळीकात्मकमिति वर्णनोचिताभ्यां
जङ्घाभ्यां जनितदृगुत्सवं शुभाभ्याम् ॥ २३ ॥

दीव्यत्पीताम्बरपरिवहद्दीप्तिलब्धारुणिम्ना
काञ्चीनीलोपलरुचिलहर्येधमानासितिम्ना ।
गोपीस्नानावसरविसरत्कुङ्कुमाभार्ककन्या-
पूराकारानुकृतिकृतिना भान्तमूरुद्वयेन ॥ २४ ॥

[2]पीताम्बरं परमसूक्ष्मतया वलग्नं
तद्योगयोग्यमिदमेव परं न चान्यत् ।
हित्वेति चेलमपरं नियतं वसित्वा
पीताम्बरं प्रकटितोचितकारिभावम् ॥ २५ ॥

[3]काञ्चीमध्ये केशवस्तस्य मध्ये
काञ्ची दृष्टा तद्यथा भूषणत्वम् ।
साधारण्यं तद्वदाधारतापि
प्राप्नोत्यत्रेत्युत्तमैर्वर्ण्यमानम् ॥ २६ ॥

---

1 तावेतौ जङ्घे (विधेयप्राधान्यात् पुंस्त्वम्) स्मरशरधी-मन्मथतूणीरौ । यत् यस्मात् । चरणमिषात् पादच्छद्मना । तदुत्थं जङ्घाभ्यां उत्पन्नं, नाळीकं पद्मं बाणश्च इन्धे भाति । इदं अलीकात्मकं मिथ्या-स्वरूपं न भवति ; अपि तु सत्यमेवेति वर्णनोचिताभ्यामित्यादि ।

2 परमसूक्ष्मतया, पीतं अम्बरं व्योम येन तत् इति व्युत्पत्त्या, वलग्नं मध्यं पीताम्बरशब्दवाच्यमभूत् । ततः इदमेव—पीतं च तत् अम्बरं चेति व्युत्पत्त्या पीताम्बरशब्दवाच्यं वसनमेव, तस्य मध्यस्य योगे सम्बन्धे योग्यं अर्हं, अन्यत् न च— न योग्यमिति हेतुना अपरं अन्यत् चेलं वसनं हित्वा नियतं पीताम्बरसंज्ञं वसनं वसित्वा आच्छाद्य, प्रकटितः उचितकारिणो भावः येन तं वरदं ववन्दिरे इत्यन्वयः ।

3 काञ्च्याः- काञ्चीनाम्नः पुरस्य मध्ये केशवः दृष्टः । तस्य केशवस्य मध्ये वलग्ने काञ्ची दृष्टा मेखला दृष्टा । अत्र काञ्चीवरदयोः यथा भूषणभावः साधारण्यं प्राप्नोति, तद्वदाधारतापि साधारण्यं

[1]निर्व्यूढमन्तर्वहता प्रपञ्चं येनात्मनस्तत्पितुरप्यगौणम् ।
मातृत्वमाम्नायशिरःप्रसिद्धं तेनोल्लसन्तं तनुनोदरेण ॥ २७ ॥

[2]पूष्णा कृतप्रकाशं पुष्करशब्दार्थयुगळमपि यस्याः ।
अजनिष्ट तया नाभ्या विश्रुतगाम्भीर्यया विराजन्तम् ॥ २८ ॥

[3]सोदरीं हिमकरस्य सुवृत्तां पद्मरागरुचिरां गुणहृद्याम् ।
उज्ज्वलामुरसि मौक्तिकमालामिन्दिरामिव दधानमजस्रम् ॥ २९ ॥

---

प्राप्नोति । काञ्चीपुरस्य केशवो भूषणं, केशवस्य मेखला भूषणं, एवं काञ्चीपुरे केशवस्य आधारः केशवः काञ्च्याः (मेखलायाः) आधारः धारकः इति भावः ।

1 प्रपञ्चं अन्तः वहता येन उदरेण आम्नायशिरःप्रसिद्धं वेदान्तवेद्यं मातृत्वं (जननीत्वं) तत्पितुरपि तादृशप्रपञ्चजनकस्यापि आत्मनः स्वस्य (परमात्मनः), अगौणं मुख्यं सत् निर्व्यूढं समर्थितं, तेन तनुना सूक्ष्मेण उदरेण उल्लसन्तं वरदं ववन्दिरे इत्यन्वयः । माति परिच्छिनत्ति इति व्युत्पत्त्या परिच्छेदकत्वरूपं मातृत्वं रूढ्यभावात् गौणं भवति । कुक्षौ प्राणिधारणरूपमातृत्वं (जननीत्वं) लोकरूढं । परमपुरुषस्य पूर्वोक्तं गौणं मातृत्वं त्रिविक्रमावतारे सम्पन्नमेव । अगौणं मुख्यं यत् कुक्षौ प्राणिधारणरूपं मातृत्वं तदपि अनेन उदरेण निर्व्यूढमित्युच्यते अधुना। चराचरात्मकसर्वप्रपञ्चस्य कुक्षौ धारणात् जगत्पालकस्य पितुरपि सतः तस्य मुख्यं मातृत्वमपि सम्पन्नमिति भावः ।

2 पूष्णा सूर्येण, कृतप्रकाशं, कृतः प्रकाशः– दीप्तिः, विकसनं च यस्य तत् । पुष्करशब्दार्थयोः पुष्करशब्दवाच्ययोः कमलाकाशयोः युगलमपि, यस्याः नाभेः अपादानात् अजनिष्ट उत्पन्नम् । नाभ्यां आसीदन्तरिक्षमिति श्रुतेः, चतुर्मुखाधारस्य पद्मस्य भगवन्नाभ्युत्पन्नत्वप्रसिद्धेश्च ।

3 हिमकरस्य सोदरीं– लक्ष्म्याः मौक्तिकमालायाः चन्द्रस्य च समुद्रोत्पन्नत्वेन लक्ष्मीमौक्तिकमाले चन्द्रस्य सोदर्यौ भवतः । एवं सुवृत्तां वर्तुलाकारां समीचीनचारित्रां च । पद्मरागैरुचिरं पद्मरागवत् रुचिरां पद्मस्य रागेण आरुणिम्ना रुचिरां । गुणहृद्यां गुणेन तन्तुना सद्गुणैश्च हृद्याम् ।

[1]बाहुपन्नगमिव स्वयमात्मग्रासकोपत इव ग्रसमानम् ।
अङ्गदद्युमणिमण्डलमुच्चैरात्मधारणमुदेव वहन्तम् ॥ ३० ॥

दीव्यता तरळमौक्तिकहारस्मेरभाञ्झर [2]शुचिन्युरसि स्वे ।
कौस्तुभेन मथनोच्चलदूर्मौ क्षीरधावुदयतेव लसन्तम् ॥ ३१ ॥

कान्तकुण्डलहरिन्मणिनिर्यत्कान्तिमण्डलकृतेन मुखेन ।
शैवलावृतसरोजसमेन प्रेक्षमाणहृदयं मदयन्तम् ॥ ३२ ॥

षट्पदा विकचवारिजबुद्ध्या चक्षुषोरुपरि मा परिगच्छन् ।
इत्याधायि किमु चम्पकमत्रेत्यूहितां दधतमुन्नतनासाम् ॥ ३३ ॥

माधवो वहति मामिति दृप्ते मन्धरे किल रुषा शिरसि स्वे ।
मेरुणा स्थितवतेव विभान्तं चारुणा नवमणीमकुटेन ॥ ३४ ॥

अनन्तरं निरन्तरानन्दभारतुन्दिलान्तःकरणा गीर्वाणास्सायन्तन कुवलयच्छायं रमासहायं भूयो भूयः कृतप्रणामाः पणायाञ्चक्रुरेवम् ।

दमोत्तरा यं दहराम्बुजे चिरात् [3]परामृशन्ति प्रवणेन चेतसा ।
[4]तमच्युत त्वामपि भाग्यसञ्चयान्निशामयामस्तु दृशाऽमुया वयम् ॥

---

1 बाहुरेव पन्नगः तं । आत्मनः स्वस्य ग्रासः ग्रसनं भक्षणं, उपरागकाले सूर्यमण्डलस्य राहुरूपसर्पग्रस्तत्वं भवतीति तज्जन्यकोपादिव स्वयं ग्रसमानं अङ्गदं केयूरमेव द्युमणिमण्डलं सूर्यमण्डलं (कर्म) आत्मनः स्वस्य (परमात्मनः) धारणं वहनं तज्जन्यमुदा सन्तोषेणेव वहन्तं इत्यन्वयः । सूर्यमण्डलस्य भगवदाधारत्वं शास्त्रप्रसिद्धम् ।

2 शुचिनि- श्वेते ।

3 परामृशन्ति विचारयन्ति ध्यायन्तीति यावत् ।

4 तमपि तादृशपरिशुद्धमनोग्राह्यमपीत्यर्थः ।

[1]मुखं तव स्वीकुरुते विधानतो हुतानि यज्ञेषु हवींषि होतृभिः ।
उषर्बुधो देव तदुद्गतोऽप्यतो हुताशनत्वं जगृहे स्वकारणात् ॥ ३६ ॥

[2]गुहासु वासं कुरुषे निरन्तरं
जहासि निद्राभ्यवहारयोः कथाम् ।
कृशानुमध्येऽपि विभासि निश्चलः
सरोजनाभानुकरोषि योगिनः ॥ ३७ ॥

[3]सुवर्णदीप्तिस्सुमनोभिरञ्चिता
निबद्धकल्याणगुणानपायिनी ।
अनन्यविन्यस्तमना जनार्दन
त्वयि त्रयीयं दयितेव रज्यते ॥ ३८ ॥

---

1 हे देव ! यज्ञेषु होतृभिः कल्पोक्तविधानतः हुतानि हवींषि अग्नौ प्रक्षिप्तानि आज्यपुरोडाशादीनि, तव मुखं स्वीकुरुते गृह्णाति । अतः कारणात् तदुद्गतः तादृशभगवन्मुखात् उद्भूतः उषर्बुधोऽपि अग्निरपि (मुखादिन्द्रश्चाग्निश्चेति अग्नेः भगवन्मुखोद्गतत्वश्रुतेः) स्वकारणात् स्वजनकात् भगवन्मुखात् हुताशनत्वं यथोक्तविधिना अग्नौ प्रक्षिप्तहविर्ग्राहकत्वं जगृहे स्वीचकार । कार्ये कारणगुणाः सङ्क्रमन्तीति न्यायादिति भावः ।

2 हे सरोजनाभ ! योगिहृदयगुहावासात् नित्योन्मेषनित्यतृप्तत्वाभ्यां निद्राहारत्यागात् उत्तवेद्याग्निमध्ये निश्चलं विराजमानत्वाच्च, त्वं, तपश्चरणार्थं गिरिगुहावासिनः नियमार्थं निद्राहारपरित्यागिनः निश्चलं पञ्चाग्निमध्यवर्तिनः योगिनः अनुकरोषीति भावः ।

3 सुवर्णस्य कनकस्य, सुवर्णानां शोभनानामक्षराणां च दीप्तिः यस्यां सा । सुमनोभिः पुष्पैः विद्वद्भिश्च अञ्चिता अलङ्कृता पूजिता च । निबद्धाः कल्याणाः रम्याः गुणाः सौन्दर्यादयः, सत्यसङ्कल्पत्वसत्यकामत्वादिब्राह्मगुणाश्च यस्यां सा । अनपायिनी नित्या । अनन्यविन्यस्तमनाः तदेकायत्तचित्ता, भगवत्प्रतिपादनैकपरा च दयितेव वल्लभा श्रीरिव, त्रयी श्रुतिः हे जनार्दन ! त्वयि रज्यते अनुरक्ताऽस्तीत्यर्थः ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २८] कलि ५०५६ मन्मथ - वृषभ साधारण [सं ९


# मुकुन्दमाला ॥

सम्भावितभाविनरकवेदनां प्रस्तुत्य भगवता भये प्रदर्शितेऽपि राजा कुलशेखरः फलविशेषसाधनतया भगवति भक्तिं कर्तुं न सम्मन्यते स्म । भगवच्चरणारविन्दभक्तिः स्वयमत्यन्तं आह्लादकारिणी भवति । सा स्वयं परमं फलं भवितुमर्हति । तस्याः फलान्तरसाधनत्वेन उपसर्जनीकरणं अत्यन्तमनुचितमिति स मेने। अयमस्य सिद्धान्तः। भगवानपि तस्य तां बुद्धिं निवर्तयितुं न शशाक। अतः तं प्रति अन्यदिदं किञ्चिदवोचत् – "राजन्, यथा ते मतिः तथा कुरु । किन्तु कतिपयानि वर्षाणि यान्तु। तत परं मयि भक्तिं करिष्यसि। अद्य हि महद्राज्यं ते परिपालनीयम्। यावत् अरोगदृढगात्रोऽसि तावत् महाराजभावोचितान् सर्वान् भोगान् भुङ्क्ष्व। परिणते वयसि, मरणे उपस्थिते, मयि आसक्तमना भव।" इति । इदमाकर्ण्य कुलशेखरः प्रतिवक्ति—

कृष्ण त्वदीयपदपङ्कजपञ्जरान्त-
रद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ७ ॥

कृष्णेति प्रथममेव सम्बोधयति, "न तथा त्वया वक्तव्यम्। मया क्रियमाणं इदं विज्ञापनं सादरं श्रुत्वा तथैव कर्तुमर्हसि" इति दीनदीनं प्रार्थयमानः ।

त्वदीयं यत् पदपङ्कजं तदेव पञ्जरं तस्य अन्तः मे मम मानसमेव राजहंसः अद्यैव विशतु । यदाऽहं पटुकरणोऽस्मि, न जरया न च

मरणावस्थया अभिभूतोऽस्मि, तादृशे अस्मिन्नेव काले विशतु । यथा गोपुरप्राकारादिपालिकासु प्रविष्टाः कपोतादयः पक्षिणः शीतवातादिपीडां विना सुखं वर्तन्ते, तथा इदानीमेव त्वच्चरणारविन्दरूपं पञ्जरं प्रविश्य कामक्रोधादिशत्रुपीडारहितं तत्रत्यमधुधारारसानुभवसुखितं च वर्ततामित्यभिप्रायः । भगवच्चरणारविन्दरसाभिज्ञत्वकृतं उत्कर्षं व्यञ्जयन् कविः स्वकीयं मनः राजहंसत्वेन रूपयति । नीरसदृशमितरत् सर्वं परित्यज्य क्षीरसदृशं भगवच्चरणारविन्दं विविच्य आदरेण गृह्णन् अस्य राज्ञो मनः राजहंसः कुतो न भवति ?

कालान्तरे को दोष इत्यत्राह– प्राणप्रयाणेत्यादि । प्राणानां शरीरात् प्रयाणं मरणम् । तस्य समये । तद् यदा भवति तदा कफवातपित्तानि कण्ठस्यावरोधनं विधास्यन्ति । तैः कण्ठावरोधनविधाने सति ते तव त्वद्विषयं स्मरणं कुतः कथं मे भविष्यति ? सर्वथा न भविष्यति । तस्मिन् हि काले वाङ्मनःप्रभृतीनि सर्वाणि इन्द्रियाणि उपरतानि भविष्यन्ति । तदा स्मरणस्य का प्रसक्तिः ।

ननु साक्षान्मरणक्षणे तथा नाम स्थितिर्भवेत् । ततः पूर्वमेव कुतो मां न स्मरसि ? शृणु कृष्ण, अत्र वदामि । मरणात् पूर्वावस्था हि जरा नाम । तत्र यद्यपि इन्द्रियाणि अत्यन्तं नोपरतानि, तथापि विकलानि भवन्ति । स्वस्वकार्यं यथावात् निर्वर्तयितुं न क्षमन्ते । चित्तस्य स्मरणशक्तिः क्षीयते । तस्मात् जराऽपि मरणस्य सन्निहितत्वात् मरणतुल्यैव । तस्यां सत्यां यथामनोरथं त्वां स्मृत्वा रसानुभवः कर्तुं न शक्यते । अतः करणकलेबरपाटववति अस्मिन्नेव क्षणे मम मनः त्वच्चरणारविन्दपञ्जरं विशतु । अद्य आरभ्य उत्तरोत्तरं अविच्छेदेन क्रियमाणं स्मरणं संस्कारदार्ढ्यात् पश्चात् जरायामपि, मरणोपस्थितिसमयेऽपि स्वयमनुवर्तेत । तस्मादेवमहं प्रार्थये ।

एवं कुलशेखरो महाराजः तारुण्यपूर्णायां अरोगदृढगात्रत्वावस्थायामेव मनसो भगवत्प्रवणतां कामयाञ्चक्रे । एवंविधा आशा आचार्यैरपि कृता—

अशिथिलकरणेऽस्मिन्नक्षतश्वासवृत्तौ
वपुषि गमनयोग्ये वासमासादयेयम् ।
वृषगिरिकटकेषु व्यञ्जयत्सु प्रतीतै-
र्मधुमथनदये त्वां वारिधाराविशेषैः ॥ इति ।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

## 1 ऋचां प्राचीत्याद्यनुवाकार्थसङ्ग्रहः ।

काठके तृतीयप्रपाठके 'ऋचां प्राची ..' इत्यादिरनुवाको विद्यते । अयं, येऽभ्यन्तरलेखायामुपधानार्था ब्रह्माख्येन ऋत्विजा पठनीया अष्टादशमन्त्राः, यत्त सहस्रसंवत्सरमत्रस्वरूपप्रतिपादकं ब्राह्मणं, यानि तत्सत्रगतविश्वनिष्पत्तिहेतुत्वं प्रदर्शयन्ति तत्सत्रस्यानुष्ठातृन् एतद्ग्रन्थजाताध्यापकशिष्यांश्चानुसृत्य विश्वप्रजननं तेषां चतुर्मुखादित्यसायुज्यादिप्राप्तिं च प्रतिपादयन्ति च वाक्यानि, यश्चोक्तस्य दर्शपौर्णमासादिसहस्रवत्सरान्तकर्मजातस्य वैकल्यपरिहारार्थं पुरुषार्थपर्यवसानार्थं चान्ते पठितः परतत्त्वप्रतिपादकः प्रणवस्तदात्मकः । तत्र प्रथममन्त्रस्यायमर्थः-- 'ऋगभिमानिदेवतानां प्राचीदिक्प्रियेत्यभिज्ञैरुच्यते । अत एव सा दिक् महती-गुणैरभ्यधिका । विद्वांसो यजुरभिमानदेवतानां दक्षिणां दिशं प्रियामतिविस्तीर्णां च वदन्ति । अथर्वाङ्गिरोनामकद्विविधमन्त्राभिमानिदेवतानां प्रतीचीदिक्प्रिया । सामाभिमानिदेवतानामुदीचीदिक्प्रियेति सुधीभिराख्यायते । सा च महती ।' इति । अत्र माधवामात्यविरचितभाष्यमेवम्-
"एताश्चतुर्वेदाभिमानिदेवता आदित्यस्य प्राच्यादिदिक्ष्ववस्थाय सेवन्ते । एतच्छन्दोगाः 'असौ वा आदित्यो देवमधु' इत्यस्यां मधुविद्यायां बहुप्रपञ्चेनामनन्ति" इति । 'ऋग्भिः पूर्वाह्णे दिवि देव ईयते ।' इत्यादीनां 'पूर्वे पूर्वेभ्यो वच एतदूचुः ।' इत्यन्तानां द्वितीयतृतीयचतुर्थमन्त्ररूपाणां वाक्यानामयमर्थः-'दिवि वर्तमान आदित्यो देवः पूर्वाह्णे काले ऋग्देवताभिस्सह गच्छति । अह्नो मध्यमे भागे यजुर्वेददेवतायास्समीपेऽवतिष्ठते । अस्तमयकाले सामवेददेवतया पूज्यते । तदेवं त्रिभिर्वेदैरवियुक्तस्सूर्यस्सर्वदा याति । या या मूर्तिरस्ति दिवाकरस्य वा देवतान्तरस्य वा तां सर्वामपि बुधा ऋग्भिस्समुत्पन्नामभिदधति । या या गतिर्देवतानां वर्तते सा सर्वदैव यजुषैव सम्पादिता । यद्यत्तेजो देवेषु विद्यते तत् सदा साम्नैव सृष्टम् । प्राज्ञा निरूपणीयम् । तदेवं सर्वमपीदं देवव्यवहारजातं देवेनैव सृष्टम् । सामवेदो वैश्यं वर्णमृग्भिर्जातं यजुर्वेदं क्षत्रियस्य योनिं च भणन्ति । सामवेदो ब्राह्मणानामुत्पादकः । यथा देवव्यवहारस्य सर्वस्य वेदत्रयमेव कारणमेवं

# महद्भयम् ॥

—:o:—

अनादेः कालादारभ्य अस्मद्देशे जनानां जीवनपद्धतिः केनचित् प्रकारेण प्रवृत्ता । सा उत्तमनागरिकतायाः विनयप्रकर्षस्य च लक्षणं बभूव । तया अस्मद्देशः देशान्तरापेक्षया व्यराजततराम् । देशान्तरजनाः सर्वे अत्र महद्गौरवं चक्रुः । एतदनुसारेण स्वकीयान् आचारान् अशिक्षन्त ।

एतादृश्यां चिरन्तन्यां जीवनपद्धतौ या अचञ्चला परमा श्रद्धा सैव अस्माकं मतम् । हिन्दुमतमिति अस्मदीयं मतं व्यवहरन्ति । सनातनमतमिति युक्तमस्माभिर्व्यवहर्तुम् । तदास्ताम् । तेन नाम्ना किमुच्यत इति परामर्शे तु इदं तदिति विशिष्य विविच्य निर्देष्टुं नूनं कतिपय एव प्रभवन्ति । अस्मिन् लोके सर्वेषां जनानां सुखजीवनस्य उपायतया अस्मदीयैः पूर्वपुरुषैः दृढपरिगृहीतः सादरं प्रवर्तितश्च यो मार्गः तस्मिन् विश्वासः अस्मन्मतम् । हिन्दुमतमिति इदमेव निर्दिश्यते, यद्यपि व्यवहर्तारः इदं न जानन्ति ।

इदं तत्त्वं सम्प्रति प्रायः सर्वैः विस्मृतम् । मतस्य जीवनस्य च नास्ति कश्चन सम्बन्ध इति जनानां बुद्धिरुत्पन्ना । अतस्तत्र उपेक्षा अजनि, दिनेदिने वर्धते च ।

जनानां स्थितौ एवं वर्तमानायां राज्याधिकारे स्थिताः न उपेक्षामात्रेण विश्राम्यन्ति, अपि तु विध्वंसन एव उद्युक्ताः सन्तीति अतीव शोचनीयमेतत् ।

अस्मन्मतसम्बन्धिषु विषयेषु प्रधानतमं पतिपत्नीभावाश्रयं गार्हस्थ्यम् । कन्याया विवाहयोग्यवयोवर्धनेन पतिपत्न्योः परस्परपरित्यागसौकर्यसंविधानेन प्रकारान्तरेण च इदमुन्मूलयितुं प्रवृत्ताः ।

मतान्तरप्रविष्टानामपि पुत्राणां दायप्राप्तिं परिकल्पयन्ति ।

एवमुत्तरोत्तरं किमपि किमपि उच्छृङ्खलं कुर्वन्तः हिन्दुमतस्य अत्यन्तविनाशौपयिकं सर्वं निरशङ्कं कर्तुं सज्जा वर्तन्ते । स्वयं मताभिमानरहिताः, अपरिचितास्मन्मताः, केवलं पाश्चात्यप्रक्रियानुसारिसर्व-

समाचाराः, एतद्विपरीतवृत्तीनां साधूनां मनसि का व्यथा जायत इत्येतद्-गणयन्तः अधिकारबलमत्ता एवं आचरन्ति ।

मतसम्बन्धरहितं केवलं लौकिकं राज्यमिति घोषयन्तोऽपि सर्वात्मना हिन्दुमतविरोधि राज्यमिति कर्मणा प्रकाशयन्ति ।

अनेन क्रमेण कतिपयेषु वर्षेषु गतेषु हिन्दुमतं सर्वथा विनष्टं भवेदिति विवेकिनां महद्भयं न न जायेत । इमे अस्मदीया नेतारः अचिरात् कृत्स्ने भारतदेशे बौद्धादिमतान्तरव्याप्तिमभिलषद्भिः यत् कर्तव्यं तत् कुर्वन्तो वर्तन्ते ।

हन्तेदं न कश्चिज्जानाति, न कश्चित् अवदधाति, न कश्चित् आक्षिपतीति अस्मन्मतस्य दुरवस्था दुर्वचा ।

आ बाल्यात् नवीनपाश्चात्यप्रक्रियायामेव शिक्षितमतयः त्रिकालज्ञानां सर्वलोकहितैषिणां परमकारुणिकानां प्राचामृषीणां वचनानि गणनापदं नैव मन्यन्ते ।

सर्वं स्वबुद्धिवैभवेनैव ज्ञेयं निश्चेयं च अध्यवस्यन्ति ।

> कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
> चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥

इतीदं तत्त्वं तेषां बुद्धिं नैव विशति ।

अस्यां स्थितौ आस्तिकाः शास्त्रमार्गयाथात्म्यविदः यथाशक्ति प्रयत्य सर्वेषामेव तत्त्वावबोधो यथा भवेत्, नेतॄणां विपरीतप्रवृत्तिपरम्परया जनिष्यमाणं महान्तमनर्थं प्रति जागरो यथा भवेत् तथा किमपि कर्तुमर्हन्ति ।

एकतः अस्मन्मतस्य आत्यन्तिकलोपाय तीव्रा उद्यमाः क्रियन्ते । अपरतस्तु मताभिमानवत्तया प्रसिद्धा एव जनाः परमशान्ताः स्वस्थाः तूष्णीं वर्तन्ते । तदिदं पश्यतामस्माकं अन्तरात्मा परितप्यते । हृदयं ज्वलति ।

---

> यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् ।
> अवकरनिकरं विकिरति तत् किं कृकवाकुरिव हंसः ॥

# संस्कृतस्य पुनरुज्जीवनम् ॥

कतिपयदिनेभ्यः प्राक् प्रचलिते रामेश्वरदेवस्थानसंस्कृतविद्यालय-वार्षिकोत्सवसमारम्भे संस्कृतविद्यार्थिनां संख्या प्रतिवर्षं न्यूनतामापद्यत इति वार्ता प्रधानाध्यापकद्वारा श्रुता। तां ज्ञात्वा न केवलं संस्कृताभिमानिनः, अपि तु सर्वे भारतीयाः शोकसंतप्ता भवेयुः। व्याकरणशिरोमणिकक्ष्या च च्छात्राभावेन विरमतीति वार्ता नात्याश्चर्यकरी। नैषा स्थितिरस्यां पाठशालायामेव। किंतु सर्वत्रापि। संस्कृतस्य हि प्रोत्साहो न्यूनतामायाति। क्वचित् कदाचित् केचन पण्डिता यद्गैर्वाण्याः पारम्यं मुक्तकण्ठं स्तुवन्ति, तदेतद्भाषाभिमानप्रदर्शन एव पर्यवस्यति। तात्कालिकोत्साहिन एव ते। न किमपि श्रूयते तदनन्तरम्। अस्मद्देशनायकश्रेष्ठाश्च सुसंस्कृतिनः संस्कृतस्य माहात्म्यज्ञा अपि तदभिवृद्धिकर्मणि अश्रद्धालव एव वर्तन्ते। स्वतन्त्रे भारते भारतीयानां सर्वासां भाषाणां प्रोत्साहे क्रियमाणे, अस्मद्देशभाषामातृभूतायाः सकलशास्त्रमूलभूतायाः सुरभारत्याः प्रचारकर्मणि विद्याधिकारिभी राज्यनिर्वाहकैर्वा न किमपि क्रियमाणं दृश्यते।

ईदृश्यां दुर्दशायां किंचिद्विचार्यमाणायां इदं सुव्यक्तं भवेत्। प्रथमतः आधुनिकपाठशालासु शिक्ष्यमाणानां सर्वेषां विषयाणां जीवनौपयिकतया विद्यमानत्वात् संस्कृतस्यावनतेः तदभाव एव मूलकारणं भवति। किं च अस्या भाषायाः शिक्षणे भासमाना कठिनता, शिक्षणक्रमे पुरातनकालात्प्रभृति अनुष्ठीयमाना परिवर्तनरहिता व्यवस्था चेत्यादीन्यन्यानि कारणानि उदाहरणीयानि। किमेतैः कारणैः पाठशालानां पिधानं युक्तम्? तत् सुकरमपि न श्रेयस्करम्। भारतीयसंस्कृतिविषये दत्तदृष्टयस्सर्वे अस्या भाषायाः प्रसारक्रियायां दृढसंकल्पा भवितुमर्हन्ति। यतः प्राचीनकालादारभ्य निरतिशयवैभवेन विद्यमानायाः भारतीयसंस्कृतेः गैर्वाण्येव मूलमिति न केवलं भारतीया जानन्ति, किंतु वैदेशिका अपि। अस्मत्पवित्रग्रन्था वेदशास्त्रपुराणेतिहासाः सर्वे संस्कृतमया एव। अपि नाम भारतीयभाषाभिवृद्धिकर्मणि बद्धश्रद्धानां सर्वेषां स्वमातृभूतायां संस्कृतभाषायां अवज्ञा युक्ता? गृहे विद्यमानानां वृद्धपितामहादीनां स्थाने

विद्यते संस्कृतभाषा। भक्तिभरितमानसाः पुत्रपौत्रादयः तेषां नमस्कारमात्रेणैव तृप्तिमुपयान्ति ; न च तेषां वचनानुरोधने यतन्ते पण्डितंमन्याः। यद्यपि संस्कृतस्य माहात्म्यं सर्वैरभ्युपगतं, तथापि तन्माहात्म्यसाक्षिभूतकार्याचरणेनैव अस्माकं तृप्तिर्जायेत। न तन्माहात्म्योद्घोषणेन केवलेन। यथाकालं संस्कृतभाषाभिवर्धककर्माचरणमेव समीचीनं भवेत्।

1) एतत्साधनप्रवृत्तौ च भाषाशिक्षणक्रमे परिवर्तनमवश्यंभावि। संस्कृतमधिजिगासूनां बालानां उपक्रम एव कालिदासबाणादीनां उद्ग्रन्थानां पठनं न क्रमबद्धमिति मन्यामहे। किंच इतरभाषासु विद्यमानानि पाठ्यपुस्तकानीव अस्यां भाषायामपि क्रमबद्धानि गद्यप्रचुराणि च भवितुमर्हन्ति। बालानां प्रौढानां च मनोरञ्जनदृष्ट्या आधुनिकव्यवहारान्तर्गतानि तानि रचनीयानि। सरलया रीत्या माणवकानां यथाबुद्धिविकासं आबद्धानि स्युः। कक्ष्याक्रमबद्धगद्यग्रन्थाभाव एव पूर्वनिवेदितदुरवस्थाहेतुः। सर्वे पण्डिताः संमिल्य नव्यया रीत्या पाठ्यपुस्तकलेखनविषये यद्यवधानं ददति, तदा सार्वजनिकपाठशालासु संस्कृताध्यायिनां संख्या इतोऽप्यधिका स्यात्।

2) वैदिकपाठशाला अपि केवलं व्याकरणमीमांसादिग्रन्थाध्यापनेनैव न कृतार्थाः संपद्येरन्। नास्माकं तेषां विषये अप्रीतिः। जीविकाऽनुपयुक्तत्वे तेषामध्ययनं प्रति अनुत्साह एव जायेत। यतः कालानानुगुण्येन तत्त्वग्रन्थपठनेनैव नास्माकं ऐहिकक्लेशपरिहारः स्यात्। यद्यपि तेषामध्ययनमावश्यकं तथापि तैः सह जीवनोपयुक्तार्थशास्त्रराजनीत्यादीनां विविधानां ग्रन्थानां संमेलनेनाध्यापनमेव पिपठीषूणां मनसि आवर्जयेत्। सप्रयोजनं च भवेत् सामाजिकराजकीयव्यवहारैः। किं नाम संस्कृतसाहित्यजलधौ जीविकोपयुक्तग्रन्थानामभावः? प्रसिद्धाः चतुष्षष्टिकला नामावशेषाः। अथाप्यधुना, तद्ग्रन्थानां प्रकाशनमारचय्य तेष्वभिरुचिर्जनताया यथा वर्धेत तथा कर्तुं युक्तम्। अथवा आधुनिकवैज्ञानिकराजकीयविषया उद्ग्रन्था निष्पादनीया अस्यां भाषायामपि। कुलपरंपराप्राप्तवेदान्तादिपारमार्थिकग्रन्था अद्यतनानां यूनां मनांसि नैवाकर्षेयुः। नापि तेषामध्ययनेन अर्थिकप्रयोजनम्। अत एव लौकिकविषयान्तर्गता ग्रन्था जीविकोपयुक्ता अचिरेणैव रचनीयाः। तद्द्वारेणैव गैर्वाण्याः पारम्यं

आधुनिकभारते संपादनीयम् । वेदशास्त्रपिपठिषुभिः प्रज्ञाशालिभिः तेषामध्ययनं भवतु नाम। न चात्र वेदशास्त्रादिषु सर्वेषां प्रवृत्तिः स्यात्। इतरेषां बहूनामुपयोगाय पूर्वोक्तक्रमोऽवलंबनीयः ।

महान्यायालय (सुप्रीं कोर्ट्) निवृत्तन्यायाधीशेन श्रीमता पतञ्जलिशास्त्रिणा प्रयागविश्वविद्यालयस्नातकभाषणावसरे एवमुक्तम्— "संस्कृतं बहुजनोपयुक्तं मनोरञ्जकं च तदा भवेत् यदाऽस्य पुनरुज्जीवनं भवति। कतिपयजनोपयोगयोग्यत्वेन नास्या व्यापकता भवितुमर्हति। किंतु जनतोपयोगेनैव सा साधनीया" इति।

3) संस्कृतस्य सर्वजनीनत्वे गडुभूता व्याकरणक्लिष्टशैली यथायोग्यं परिष्करणीया । अस्मिन् विषये मद्रपुर्यां मैलापूर्-संस्कृतपाठशालायामनुष्ठीयमाना नव्या रीतिः प्रचारणयोग्येति मन्यामहे। तत्र सरलरीत्या अल्पेनैव कालेन बालकाः पाणिनीयव्याकरणे न केवलमावश्यकं प्रौढिमानमाप्नुवन्ति ; किंतु, गैर्वाण्यां व्यवहर्तुमपि शक्नुवन्तीति श्रुत्वा परं मोदामहे।

4) तत्र तत्र विभिन्नतया विद्यमानाः संस्कृतप्रोत्साहनसंघाः तद्व्यवस्थापकाश्च संस्कृतपुनरुज्जीवनकर्मणि एकोन्मुखा भूत्वा यदि यथोक्तमाचरन्ति तदेव श्लाघ्यं भवेत्। यद्यपि राज्यशासकेभ्यः संस्कृतप्रोत्साहोऽधुना न सिद्ध्यति, तथापि यावत्तत्सिद्धि तत्र तत्र विद्यमानैः संस्कृताभिमानिभिः संघैः प्रचारकर्मनिरतैर्भाव्यम्। एतद्विषये अस्मद्देशस्थविविधमठाधिपा धर्मप्रचारधुरीणा यदि मार्गदर्शिनः स्युः तदा बहूपकृतं भवेत्। यथाकालं विद्वज्जनपरिषदमाकार्य संस्कृतप्रचारकर्मणि दत्तदृष्टयस्ते भवेयुरिति सादरमाशंसामहे। प्रचारभूयिष्ठेऽस्मिन् काले नास्माभिर्मौनेन वर्तितुं युक्तम्। पत्रिकासु चासकृल्लेखनद्वारा जनानां दृष्टिरत्रावर्जनीया। वर्तमानाः संस्कृतपत्रिका अपि आर्थिकसाहाय्यसंपादनेन तुष्टिपुष्टियुताः सत्यः जनतोपकारिण्यो भवितुमर्हन्ति। उत्तरदेश इव दक्षिणदेशेऽपि पाक्षिक्यो मासिक्यो वा संस्कृतवार्तापत्रिकाः प्रकाशनीयाः।

परं च स्वतन्त्रे भारते संस्कृतस्य राष्ट्रभाषात्वकरणे उद्घोषा असकृत् श्रूयन्ते। संस्कृतस्य सर्वजनसाधारण्याभावे कथं तस्य राष्ट्रभाषात्वकरणोद्यमः सफलो भवेत्। बहुजनसाधारणी या भाषा सैव राष्ट्रभाषात्वयोग्यतां

वहेदिति राष्ट्रनिर्वाहकाणामुक्तिरनिवार्या। यन्नवदिल्यां कतिपयदिनेभ्यः प्राक् प्रचलिते संस्कृतसाहित्यसंमेलने पण्डितोत्तमैः संस्कृतराष्ट्रभाषात्व-करणं संस्कृतविश्वविद्यालयस्थापनं च उद्घुष्टं, तन्मानसिकप्रासादनिर्माण एव पर्यवस्येत् , यदि ते तत्पूर्वकरणमुपरिनिर्दिष्टकार्याचरणं नारभन्ते। एतदर्थं संस्कृतविद्याकेन्द्रस्थानानि तिरुप्पदि-मैसूर्-मद्रपुरीत्यादिक्षेत्राणि अस्मिन् विषये नवीनचैतन्याविष्टानि भूत्वा यथावत् कार्याण्याचरेयुरिति दृढं विश्वसिमः। अनेनैव मार्गेण सुरभारत्याः पुनरुज्जीवनं सम्पद्येत। जनतायाश्च क्लेशपरिहारः सौशील्यादिगुणविकासश्च जायेत । तद्द्वारा-प्रजाः सुप्रजा भूत्वा लोकक्षेमाय यतेरन्निति आशास्महे।

---

मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्येण द्विजमादरेण युवतिं प्रेम्णा शमैः(ऽशनैः)र्बान्धवान्।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं शीलेन कुर्याद्वशम् ॥ ६ ॥

नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृति-
र्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम्।
लावण्यं वपुषः स्मृतिः सुमनसः क्षान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्डनम् ॥ ७ ॥

[ नवरत्नमाला ]

TIRUPATI ... LIBRARY

# प्रकृतिभेदः ॥

भर्ता— पश्य सोदरी मे कियल्लघु पक्कवती। त्वं तु पचसि, पचसि, पचसि। नाहमेकस्मिन्नपि दिने काले कार्यालयं गतवान्। अस्मिन्नहनि तु गमिष्यामि।

भार्या— (सोपहासम्) सत्यम्, एवमेतत्। किमहं कुर्याम्। आलस्यं मे प्रकृतिः। अन्यासां आशुकारिता।

भर्ता— इदं यदि वस्तुतः अङ्गीकरोषि तत् साधु। किन्तु हसन्ती अहृदयभाषित्वं प्रकाशयसि। प्रकटं ब्रूहि यत् ते हृदये वर्तते।

भार्या— किं वाचा उक्त्वा। प्रत्यक्षं दर्शयामि, आगच्छतु आर्यपुत्रः। क्व पुनरिदानीं अक्का ?

भर्ता— 'समीचीनं पानीयमाहरामि। कूपोदकं मे न रोचत इति वदन्ती तटाकं गता। विस्रब्धा ब्रूहि।

भार्या— तथा करोमि। इमानि पात्राणि भवत्सोदर्या अद्य विशोध्य निहितानि। तेषु एकैकं अन्तर्बहिश्च पश्यत्वार्यपुत्रः।

भर्ता— (दृष्ट्वा) अये, किमेतत्। एवं नु सा पात्राणि शोधयति। एकैकस्मिन्नपि मृत्तिकालेपः तथैव वर्तते। शुष्कः सन् अद्य स्फुटं दृश्यते।

भार्या— किमन्तः अद्राक्षीदार्यपुत्रः ?

भर्ता— तिष्ठ, पश्यामि। (दृष्ट्वा) ही ही ही। न परं मृत्तिकालवः तिन्त्रण्यपि तथैव वर्तते।

भार्या— एवं कार्याणि कुर्वत्यो महिलाः कुतो न शीघ्रकारिण्यो भवन्ति ? कोऽत्र विस्मयः ?

Registered No. M 2300

Book XXVIII ॥ श्रीः ॥ No. 10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५६ मन्मथ - मिथुन [सं १०

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

JUNE 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूर्षद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।



निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* **D.T. Tatacharya Siromani, M. O. L.**
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


## विषयः ॥


शास्त्रानुबन्धः—श्रीगीतार्थदीपः १२१— १२८

TIRUPATI LIBRARY

நஷ்டமென்னலாம்படி ஆயிற்று. நீ யோகத்திற்கு வேண்டிய இந்த்ரிய ஜயமுள்ளவன். என் மேன்மையைக் கண்டு பக்தியுள்ளவன். நீர்மையைக் கண்டு ஸ்நேஹமுடையவன். ஆனதினால் அதே புராதனமான யோகத்தை அதே அங்கங்களுடன் ஸவிஸ்தாமாகச் சொன்னேன். உத்தம ரஹஸ்யமிது. ஆதலால் என்னைத் தவிர்த்து மற்றவர் இதை அறியவும் சொல்லவும் இயலாது. ரஹஸ்யமாகையால் யோக்யனான உனக்கு உபதேசிக்கவேண்டும். 3

अर्जुन उवाच—

१६६ अवरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

अस्मिन् योगकर्तव्यतादृढीकरणार्थकथाप्रसङ्गे भगवदवतारयाथात्म्यं यथावत् ज्ञातुमर्जुन उवाच— 'भवतो जन्म कालसङ्ख्यया अवरं अपकृष्टं, विवस्वतश्च जन्म कालसङ्ख्यया परं उत्कृष्टम् ; अष्टाविंशतिचतुर्युगसङ्ख्यासङ्ख्यातम् ; त्वमेवादौ प्रोक्तवानित्यसम्भावनीयमेतत् कथं यथार्थं जानीयाम् ।' जानात्येवायं भगवन्तं वसुदेवसूनुं पार्थः ; जानतोऽप्यजानत इव पृच्छतोऽयमाशयः— 1) सर्वेश्वरस्य कर्मपरवशदेवमनुष्यादिसजातीयं जन्म किमिन्द्रजालादिवन्मिथ्या ? उत सत्यं ? मिथ्यात्वपक्षे न तत्र कश्चित्प्रकारो निरूपणीयः 2) सत्यत्वे च किं पारमेश्वरस्वभावपरित्यागेन, अन्यथा वा जन्मप्रकारः ? 3) किं त्रिगुणात्मकः उताप्राकृतोऽयं देहः ? 4) कश्च जन्महेतुः— किं सङ्कल्पमात्रं ? उतेश्वरस्यापि स्वेच्छापरिगृहीते पुण्यपापे ? 5) कदा च जन्म किं पुण्यपापविपाककाले ? उत धर्मग्लान्यादिकाले ? 6) किमर्थं च जन्म— किं सुखदुःखोपभोगार्थं ? उत साधुपरित्राणार्थं ? इति । परिहारप्रकारेणायं प्रश्नार्थो विज्ञायते । न ह्यन्यस्य प्रश्ने तदन्यविषयतया प्रतिवचनमुपपद्यते ; तथा सति प्रतिवक्तुरनभिज्ञतादिप्रसङ्गात् ; अतो यावद्विषयं प्रतिवचनं तावद्विषय एवायं प्रश्न इत्यभ्युपगन्तव्यम् । अत्र च प्रतिवचने चतुर्भिः श्लोकैः—

*'अवतारस्य सत्यत्वमजहत्स्वस्वभावता ।
शुद्धसत्त्वमयत्वं च स्वेच्छामात्रनिदानता ॥
धर्मग्लानौ समुदयस्साधुसंरक्षणार्थता ।'

इत्येतानि क्रमात्प्रतिपाद्यानि प्रतीयन्ते ; अतस्तान्येव प्रष्टव्यतयाभिप्रेतानि ।

கர்மயோகத்தை அவச்யம் செய்தல் வேண்டுமென்பதற்கான இந்த ப்ரஸ்தாவத்திலே பகவானுடைய அவதாரரஹஸ்யத்தை அவன் பக்கலிருந்தே அறியவேணுமென்றெண்ணி அர்ஜுனன் சொன்னதாவது— தேவரீருக்கும் விவஸ்வானுக்கும் ஜன்மகாலவரையில் உத்கர்ஷாபகர்ஷங்கள் பதினெட்டு சதுர்யுகங்கள் வாசியுள்ளனவே. ஆதியில் தேவரீர் அவருக்கு உபதேசம் செய்தீரென்பதை அடியேன் எப்படி உண்மையென்று அறியலாகும்? வாஸுதேவனைப் பகவானென்று தெளிந்திருக்கச் செய்தேயும் இவ்வாறு கேட்கிறான். இதற்கு உத்தரம் சொல்லுமிடத்தில் ஆறு கேள்விகளுக்கு விடையிறுக்கப்பெறுகிறது. அதை அடியொற்றி ஆறு கேள்விகளில் அர்ஜுனன் நோக்கு. அவையாவன— 1 அவதாரம் ஸத்யமானதா? 2 அவதாரத்தில் ஈச்வரஸ்வபாவம் விலகுவதில்லையா? 3 அவதாரரூபமானது அப்ராக்ருதம்தானா? 4– 5– 6 அவதாரத்திற்குக் காரணம், காலம், ப்ரயோஜனம், 4
எவை? என்ப.

श्रीभगवानुवाच—

१६७ बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥

एपूत्तरं क्रमाद्भगवानुवाच बहूनीत्यादिभिश्चतुर्भिश्श्लोकैः । अनेन श्लोकेन जन्मनस्सत्यत्वमुक्तम् । सत्यत्वे हि बहुत्वातीतत्वादीनि स्वरसानि, जन्मानीति चोक्तम्, न जन्मप्रतिभासा इति । तव चेत्यपृष्टार्थस्य उपादानमप्येतत्सत्यत्वदृष्टान्ताभिप्रायेणैव । न चार्जुनस्य जन्म मिथ्या, तस्य वा तथात्वप्रतिभासः । तानि जन्मानि सर्वाणि अनावृतज्ञानशक्तिरहं जाने । परन्तप कामक्रोधाद्यभिभूतस्त्वं न जानीषे ।

* रहस्यत्रयसारचरमश्लोकाधिकारे

ஸ்ரீ பகவானருளிய உத்தரமாவது— எனக்குப் பல பிறவிகள் கடந்தன. உனக்கும் அவ்வாறே யன்றோ? மழுங்காத ஞானசக்திகள் படைத்த நான் எனதுமுனதுமான ஜன்மங்கள் யாவற்றையும் அறிவேன்! உன் ஞானசக்திகள் மழுங்கியதால் நீ அவற்றை அறியாய். 5

१६८ अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥

'अवतारप्रकारं देहयाथात्म्यं जन्महेतुं चाह'— द्वितीयतृतीयतुरीयप्रश्नानामुत्तरमत्र श्लोके । 'अत्र पूर्वार्धेन तृतीयचतुर्थपादाभ्यां च प्रश्नत्रयस्य क्रमात्परिहारः ।' 'अजोऽपि सन्, अव्ययात्माऽपि सन्, भूतानामीश्वरोऽपि सन् सम्भवामि' । न कस्यचिदपि स्वभावलेशस्य हानिः । अजाव्ययशब्दौ कर्मकृतजन्ममरणनिवृत्तिपरौ । तेन हेयप्रत्यनीकत्वमुक्तं भवति । 'भूतानामीश्वरोऽपि सन्' इति कल्याणगुणाकरत्वाप्रच्युतिरुपलक्ष्यते । अजत्वादि सर्वं पारमेश्वरं प्रकारमजहदेव स्वां प्रकृतिमधिष्ठाय आत्ममायया सम्भवामि । 'स्वामिति निर्देशो जीवसाधारणत्रिगुणप्रकृतिव्यवच्छेदार्थः' । प्रकृतिशब्दोऽत्र विग्रहपरः । स्वासाधारणं 'आदित्यवर्णं' इत्यादिश्रुतिप्रसिद्धं शुभाश्रयं विग्रहमास्थायां आत्ममायया– आत्मीयेन सङ्कल्पेन देवादिरूपस्सम्भवामि । 'मायावयुनं ज्ञानं' इति ज्ञानपर्यायोऽत्र मायाशब्दः । अवतारदशायामपि अजहत्स्वस्वभावता शुद्धसत्त्वमयत्वं स्वेच्छामात्रनिदानता चेति द्वितीयादिप्रश्नत्रयस्य क्रमेणोत्तरमुक्तमिह ।

கர்ம மூலமான ஜந்மமரணங்களின்றிக்கே ஸர்வ நியந்தாவாய் அவதாரம் செய்கின்றேன். அவதாரரூபமானது அப்ராக்ருதமானது. ஸங்கல்பமே அவதாரத்திற்குக் காரணம். இரண்டு மூன்று நான்காவது கேள்விகளுக்கு உத்தரமிவ்வாறு.
6

१६९ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥
[ उद्यानपत्रिका XXVIII-10

जन्मकालमाह — 'तदेत्यत्रापि यदा यदा इत्येतत्प्रतिनिर्देशरूपत्वात् वीप्साऽनुसंधेया।' 'वीप्सा युगान्तर्वर्तिकालानियमपरा।' जीववत्पुण्यापुण्यविपाककृतो वा ऽव्यवस्थितस्वसङ्कल्पकृतो वा मन्वन्तरमहाकल्पादिरूपो वा कालनियमो नास्ति। धर्मस्य प्रमाणतः स्वरूपतश्च यदा ग्लानिः; तद्विपर्ययस्याधर्मस्योद्गमश्च तुलाप्रनमनोन्नमनवद्भवति, तदाऽवतार विग्रहविशिष्टस्वात्मानं अहमेव सङ्कल्पेतरापेक्षणीयनिरपेक्षं सृजामि। धर्मस्य ग्लानिमपि न सहे, किं पुनर्विच्छेदम्। एवमधर्मस्योद्गममात्रमपि न सहे, किमुत शाखानुशाखताम्।' कदा जन्मेति पञ्चमप्रश्नस्योत्तरमिदम्।

எனது அவதாரத்திற்குக் கால நியதியில்லை. தர்மத்திற்கு வாட்டமும் அதர்மத்திற்கு அங்குரமும் எப்பொழுது ஏற்படுகிறதோ, அக்காலத்திலே நானே அவதாரம் செய்கிறேன். அவதாரகாலத்தைப்பற்றிய ஐந்தாவது கேள்விக்கு இவ்வாறு உத்தரம் சொல்லப்பட்டது.

१७० परित्राणाय साधुनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ ८॥

किमर्थमिति प्रयोजनप्रश्नस्य चरमस्योत्तरमाह— साधवो वैष्णवाग्रेसराः, यथावस्थितमुपायं प्राप्यं चावलम्बमानाः। त्राणं हि नामात्रानिष्टनिवर्तनपूर्वकेष्टप्रापणम्। एवंविधवैष्णवाग्रेसराणां अनिष्टश्च भगवदलाभः; तत्समाश्रयणपूर्वकं तल्लाभेनैव च तस्यानिष्टस्य निवर्तनम्। मत्स्वरूपचेष्टितावलोकनालापादिदानेन तेषां आन्तरभयात् परित्राणाय तेषामेव बाह्यभयात्परित्राणार्थं दुष्कृद्विनाशाय च। चकारोन्वाचयार्थः। 'आनुषङ्गिकस्तु दुष्कृतां विनाशः क्षीणस्य वैदिकस्य धर्मस्य मदाराधनरूपस्याराध्यस्वरूपप्रदर्शनेन स्वपर्यन्ततया सम्यक्स्थापनाय च कृतत्रेतादियुगविशेषनियमं विना देवमनुष्यादिरूपेण सम्भवामि।

அவதாரத்திருமேனியை நேரில் ஸேவித்து ஸல்லாப ஸம்ச்லேஷஸஹவாஸாதிகளையே தாரக போஷக போக்யங்களாகக் கொண்ட ஸ்ரீ வைஷ்ணவாக்ரேஸரர்களை அத்திரு

மேனியை ஆவிஷ்காரம் செய்து ஸம்ரக்ஷணம் செய்தற்காகவும் ஆநுஷங்கிகமாய் துஷ்டநிக்ரஹம் செய்தற்காகவும் என் ஆராதன ரூபமான கர்மத்தை ஆராத்யமான ரூபத்தைக் காட்டி ஸ்தாபநம் செய்தற்காகவும் முன்கூறிய தர்மக்லாநி அதர்மாங்குரம் ஏற்படும் காலங்களிலே அவதாரம் செய்கிறேன். இது அவதார ப்ரயோஜநத்தைப் பற்றிய ஆறுவது ப்ரச்னத்திற்கு உத்தரம். 8

१७१ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

प्रासङ्गिकस्यावतारयाथात्म्यकथनस्य परमप्रकृतमोक्षोपयोगित्वमुच्यते । अर्जुन— एवं— 'अजोऽपी'त्यादिनोक्तप्रकारेण, दिव्यं अप्राकृतं मे जन्म, विलक्षणं चेष्टितं च संशयविपर्ययरहितं यो वेत्ति, सः वर्तमानदेहं परित्यज्य पुनर्जन्म नाप्नोति । अवताररहस्यज्ञानवान् मामेव प्राप्नोति, न केवलं विरोधिनिवृत्तिमात्रम् ।

அர்ஜுந, இவ்வாறு அவதாரரஹஸ்யத்தையும் அவதாரக்ருத்யத்தையும் தெளிவாக அறிபவன் இத்தேஹவியோகத்திற்குப் பிறகு மறுபிறவி அடைவதில்லை. இந்த ஜந்மத்திலேயே உபாஸநம் விஷ்பந்நமாய் முக்தி பெறுகிறான். இது அவதாரரஹஸ்ய ஜ்ஞானத்திற்குப் பலம். 9

१७२ वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

उपासनपौष्कल्यहेतुतयाऽवताररहस्यज्ञानस्य परम्परया मोक्षसाधनत्वमिति पूर्वश्लोकोक्त एवार्थोऽनेन श्लोकेनोच्यते । मदीयजन्मकर्मतत्त्वज्ञानाख्येन तपसा पूताः विध्वस्तसमस्तमत्समाश्रयणविरोधिपापाः । बहवः, मामुपाश्रिताः— मामुपासीनाः, वीतरागभयक्रोधाः— वीताः रागभयक्रोधाः येभ्यस्ते । 'विषयान्तरेषु प्रीतिः रागः ; तद्विरोधिषु निरसनेच्छा क्रोधः ;

आगामीष्टविरोध्यनिष्टागमोत्प्रेक्षा भयम् । तदेतदखिलमपि न वासुदेवभक्तानामस्ति, तदेकप्रियत्वेन विषयान्तरे रागाभावात्, तत एव तन्मूलक्रोधाभावात्, तल्लाभालाभव्यतिरिक्तेष्टानिष्टाभावेन भयाभावाच्च' । मन्मयाः— 'ज्ञानविषयभूतेन मया प्रचुराः' । मदेकचित्ता इति यावत् । मद्भावमागताः— मत्स्वभावमपहतपाप्मत्वादिकं प्राप्ताः ।

*பலர் அவதாரரஹஸ்ய ஜ்ஞானமாகிற தபஸ்ஸினால் மேன்மேல மற்று என்னை உபாஸனம் செய்து சிற்றின்பங்களில் இன்பதுன்பங்கள் கழிந்து என்னிடத்திலேயே மனதை ஈடு படுத்தி வீடு பெற்றார்கள்.* 10

१७३ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

"एवं साधुपरित्राणाद्यर्थावतारवर्णनमुखेनोपासनोपयुक्तं स्वस्य सौलभ्यमुक्तम् । अथ तस्यैव काष्ठाप्राप्तां दशां दर्शयति— 'ये यथा' इति श्लोकेन । अत्र कृष्णावतारवृत्तान्तेन सहार्चावतारवृत्तान्तोऽपि सङ्गृहीतः । 'ये यथा तांस्तथैव' इति शब्दाः पूर्वोक्ताधिकारितदनुष्ठानप्रकारादिनियमनिवृत्तिपराः" । 'न केवलं देवमनुष्यादिरूपेणावतीर्य मत्समाश्रयणापेक्षाणां परित्राणं करोमि, अपि तु ये— मत्समाश्रयणापेक्षाः, यथा— येन प्रकारेण, 'पतित्वपुत्रत्वसारथित्ववाराहनारसिंहादिप्रक्रियया' । मां प्रपद्यन्ते— 'समाश्रयन्ते, एतदेवात्र प्रपदनम्' तान् प्रति तथैव— 'तन्मनीषितप्रकारेण' । 'न तु स्वकीयपरत्वानुरूपप्रकारेण' ! अहं भजामि— 'मां दर्शयामि' । 'सेवकान् प्रति सेव्यस्य भजनं नाम सुलभदर्शनत्वम्' । 'उक्तार्थस्य लोकेऽपि प्रदर्शनपरमुत्तरार्धम्' । हे पार्थ ! मनुष्याः— मांसचक्षुषः स्त्रीपर्यन्तास्सर्वे । मम वर्त्म— मत्स्वभावं स्वासाधारणविग्रहचेष्टासौशील्यादिस्वभावसमुदायपरोऽत्र वर्त्मशब्दः' । ईदृशं मत्स्वभावं सर्वयोगिनां वाङ्मनसागोचरमपि सर्वशः— स्वापेक्षितैः सर्वप्रकारैः प्रियतमपितृपुत्रसुहृदादिरूपैः अर्चावताररूपैः 'अलङ्करणयात्रोत्सवसेवादिभिर्वा प्रकारैः । अनुवर्तन्ते— अनुभवन्तो वर्तन्ते । ईदृशी मम सौलभ्यकाष्ठा लोकविश्रुता ।

என்னை யாச்ரயிக்க விரும்புமவர்கள் என்னை எவ்வாறாக விரும்பி ஆச்ரயிக்கின்றார்களோ அவர்களுக்கு அந்நிலையில் ஸுலபதர்சனனாகின்றேன். இவ்வாறான என்னுடைய ஸ்வபாவத்தை ஸாமான்ய மனிதர்களும் நேரில் கண்டு அனுபவித்து வருகின்றார்கள்.
11

१७४ काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

'एवमध्यायार्थतयाऽभिहितेषु षट्सु प्रासङ्गिकमवतारयाथात्म्यमुक्तम्। अथ प्रकृतस्य कर्मयोगस्य ज्ञानाकारताप्रकारं वक्तुं तदुपोद्घाततया षट् श्लोकाः प्रवर्तन्ते। तत्राधिकारिविषयाश्चत्वारः, कर्मस्वरूपविषयौ द्वावित्यवान्तरविभागः।' कर्मयोगाधिकारिणो दुर्लभत्वमाह' सर्व एव पुरुषाः कर्मणां सिद्धिं फलं काङ्क्षमाणाः इह लोके इन्द्रादिदेवता एवाराधयन्ति। न तु तदात्मभूतं मां यजन्ते। हि– 'यतः क्षिप्रमस्मिन्नेव मानुषे लोके कर्मजा पुत्रपश्वन्नाद्यादिसिद्धिर्भवति।' 'न तु कश्चिन्मुमुक्षुः कर्मयोगं मदाराधनभूतमारभते।'

இந்த்ராதி தேவதைகளை ஆராதநம் செய்வதால் சீக்ரத்தில் பலஸித்தி ஏற்படுகின்றது. அதனால் பலத்தை விரும்பியவர்களாய் அத்தேவதைகளையே எல்லோரும் ஆராதநம் செய்கிறார்கள். அத்தேவதைகளுக்கு அந்தராத்மாவான என்னை கர்மயோகத்
12
தினால் ஆராதிப்பதில்லை.

१७५ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

कर्मयोगारम्भविरोधिपापक्षयहेतुमाह श्लोकद्वयेन। चातुर्वर्ण्यप्रमुखं ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत् सत्त्वादिगुणविभागेन तदनुगुणशमादिकर्मविभागेन च विभक्तं मया सृष्टम्; मयैव रक्ष्यते; मयैव चोपसंह्रियते। चत्वारो वर्णाः चातुर्वर्ण्यम्। सात्त्विको ब्राह्मणः तस्य शमो

दमस्तपः' इत्यादीनि कर्माणि । सत्त्वोपसर्जनरजःप्रधानः क्षत्रियः । तस्य शौर्यतेजःप्रभृतीनि कर्माणि । तमउपसर्जनरजःप्रधानो वैश्यः । तस्य कृष्यादीनि कर्माणि । रजउपसर्जनतमःप्रधानश्शूद्रः । तस्य शुश्रूषा कर्म । इत्येवं गुणकर्मविभागः । तस्य– विचित्रसृष्ट्यादेः, कर्तारमपि मां अकर्तारं अव्ययं– सृष्ट्यादिकर्मफलसङ्गाभावेन व्ययरहितं च विद्धि ।

பிரஹ்மாதியாய் புல் பூண்டனவாகவுள்ள உலகமானது அதற்குரிய ஸத்வம் ரஜஸ் தமஸ்ஸு ஆகிய குணங்களையும் அவற்றுக்கு அநுகுணமாகச் செயல்களையும் வகுத்து என்னால் படைக்கப் பெற்றதும், காப்பாற்றி அழிக்கப்படுவதும் என்னாலேயே அவ்வுலகத்திற்குக் கர்த்தாவாகச் செய்தே கர்த்தாவன்று என்பதாகவும் ஸ்ருஷ்ட்யாதி கர்ம பல ஸங்கம் 13
அற்றவனாகவும் என்னை அறிவாய்.

१७६ न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

'एककार्यापेक्षयैकस्यैव कर्तृत्वं तदभावश्चेति व्याहतमिति चेत्; कर्तृत्वं तावन्मुख्यम, अकर्तृत्वं तु वैषम्यप्रयोजकत्वाभावादुच्यते इति व्यञ्जयति ।' 'यत इमानि विचित्रसृष्ट्यादीनि कर्माणि मां न लिम्पन्ति– न मां सम्बध्नन्ति ; न मत्प्रयुक्तानि तानि देवमनुष्यादिवैचित्र्याणि, सृज्यानां पुण्यपापरूपकर्मविशेषप्रयुक्तानि ।' 'यथा विचित्रेष्वङ्कुरेषु क्षितिजलादीनि सामान्यकारणानि, वैचित्र्यं स्वबीजवैचित्र्यहेतुकं तद्वत् ।' सृष्ट्यादिकर्मणां क्षतः प्राप्ताप्राप्तविवेकेन विचित्रसृष्ट्यादेर्नाहं कर्ता ।' सृष्ट्यादिकर्मणां फले– करणकलेबरादौ न मे स्पृहा । किन्तु सृष्टानां क्षेत्रज्ञानामेव सा । तथाह सूत्रकारः– वैषम्यनैर्घृण्ये न सापेक्षत्वात्' इति । इति– एवमुक्तेन प्रकारेण सृष्ट्यादेः कर्तारं कर्मफलसङ्गरहितत्वादव्ययञ्च यो मामभिजानाति ; स कर्मयोगारम्भविरोधिभिः फलसङ्गादिहेतुभिः प्राचीनकर्मभिर्न सम्बध्यते । मुच्यत इति यावत् । 'एवं श्लोकद्वयेन यथोक्तकर्मयोगारम्भविरोधिपापक्षयहेतुरुक्तः ।'

Registered No. M 2300.

Book XXVIII ॥ श्रीः ॥ No. 12

# उद्यान पत्रिका

नाम

॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५६ मन्मथ - सिंह [सं १२

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

AUGUST 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription **Rs. Two only.**

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखा ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः ।
(संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।


निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*

*Panditaraja* **D.T. Tatacharya Siromani, M. O. L.**

TIRUPATI.

**मुद्रणकारः— S. Vijayaraghavan,**

*Proprietor,* The Srinivasa Press,

Thiruvaiyaru P. O., Tanjore Dt.


# विषयाः ॥


शास्त्रानुबन्धः—श्रीगीतार्थदीपः १२९—१३६

ஸ்ருஷ்டியில் காணும் தேவமனுஷ்யாதி வேற்றுமைக்கும் எனக்கும் ஸம்பந்தமில்லை, அவ்வேற்றுமை அவரவருடைய புண்யபாபகர்மாநுரூபமாயமைந்தது. செடி கொடி முதலிய வற்றிற்கு ஜலம் போலே நான் ஸாமாந்ய காரணம். விதை போலே புண்யபாப கர்மாக்கள் விசேஷ காரணங்கள். ஸ்ருஷ்டி மூலமாக உடல் முதலியதை அடைவதில் ஜீவர்களுக்கே அபேக்ஷையன்றி, எனக்கு இல்லை. இவ்வாறாக என்னையறிபவன் கர்மயோகம் ஆரம்பித்தற்கு விரோதிகளான கர்மாக்களால் விடுபடுகிறான். 14

१७७ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

शिष्टानुष्ठानमपि पश्य । एवं कर्तृत्वाकर्तृत्वादिनोक्तप्रकारेण मां ज्ञात्वा विमुक्तपापैः पूर्वैरपि मुमुक्षुभिः कर्मयोगः कृतः। तस्मात् उक्तप्रकार-मद्विषयज्ञानविधूतपापस्त्वं विवस्वन्मन्वादिभिः पूर्वैः कृतं, पूर्वतरं पुरातनं, कर्मयोगमेव कुरु ।

எல்லாவற்றிற்கும் நான் கர்த்தாவாகச் செய்தேயும் அவற்றிலுள்ள வேற்றுமைக்கு காரணமல்ல என்றிவ்வாறாக வென்னைத் தெளிந்து முமுக்ஷுக்களான முன்னோர்களும் கர்மயோகம் அனுஷ்டித்துள்ளார்கள். ஆதலால் நீயும் முன்னோர்கள் செய்ததும் புராதனமுமான கர்மயோகத்தையே செய்வாயாக. 15

१७८ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

'वक्ष्यमाणस्य कर्मणो दुर्ज्ञानतामाह।' मुमुक्षुणाऽनुष्ठेयं कर्म किंरूपम्; अकर्म च किम्, अकर्मेति कर्मान्तर्गतं कर्तुरात्मनो याथात्म्यज्ञानमुच्यते। इति उभयत्रात्र विद्वांसोऽपि विप्रकीर्णैश्शास्त्रैर्मोहिताः । एवमन्तर्गता-त्मज्ञानं यत्कर्म तत्ते प्रवक्ष्यामि, यत् ज्ञात्वा अनुष्ठाय अशुभात् संसार-बन्धात्, मोक्ष्यसे। कर्तव्यकर्मज्ञानं ह्यनुष्ठानफलम् ।

முமுக்ஷுவின் கர்மயோகம் எவ்வாறுனது ? அதில் அடங்கியுள்ள ஆத்மஜ்ஞானம் எத்தகையது ? என்றிவ்விரண்டு விஷயங்களில் ஞானிகளும் உண்மை யறியவில்லை. ஆத்ம ஜ்ஞானத்தையுட்கொண்ட கர்மாவையுனக்குச் சொல்லுகிறேன். அதை அறிந்து அநுஷ்டானம் செய்து ஸம்ஸாரபந்தத்திலி ருந்து விடுபடுவாய். 16

१७९ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

'कुतोऽस्य दुर्ज्ञानतेत्यत्राह ।' अत्र सर्वत्र सम्बन्धसामान्ये षष्ठी। विकर्म— 'नित्यनैमित्तिककाम्यरूपेण तत्साधनद्रव्यार्जनाद्याकारेण च विविधतामापन्नं कर्म।' अकर्म— आत्मयाथात्म्यज्ञानमिति पूर्वमेवोक्तम् । अथमर्थः — हि यस्मात् , मोक्षसाधनभूते कर्मस्वरूपे बोद्धव्यमस्ति। नित्यनैमित्तिकादिरूपे विकर्मणि च बोद्धव्यमस्ति । तदन्तर्गतात्मयाथात्म्य-ज्ञानरूपेऽकर्मणि च बोद्धव्यमस्ति । तस्मात् कर्मणो गतिः बोद्धव्य-प्रक्रिया, गहना दुष्प्रवेशा, दुर्विज्ञानेति यावत् । विकर्मणि बोद्धव्यं नित्यनैमित्तिककाम्यद्रव्यार्जनादौ कर्मणि फलभेदकृतं वैविध्यं परित्यज्य मोक्षैकफलतयैकशास्त्रार्थत्वानुसन्धानम् ।'

மோக்ஷஸாதனமாயுள்ள கர்மஸ்வரூபத்தைப்பற்றித் தெளிய வேண்டியிருக்கிறது. நித்யம், நைமித்திகம், காம்யம் முதலிய கர்மாவில் மோக்ஷத்தையே பலமாகக்கொண்டு ஒரே நோக்கம் வேண்டும், ஆத்ம ஜ்ஞானத்தைப் பற்றியும் தெளிதல் வேண்டும். ஆகவே கர்மாவில் அறியவேண்டிய ப்ரகாரமானது ஸூக்ஷ்ம மானது. 17

१८० कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

'कर्माकर्मणोर्बोद्धव्यमाह— अकर्मशब्देनात्र कर्मेतरत्प्रस्तुतमात्मज्ञान-मुच्यते । कर्मणि क्रियमाण एवात्मज्ञानं यः पश्येत्, अकर्मणि चात्मज्ञाने

वर्तमान एव यः कर्म पश्येत् । क्रियमाणमेव कर्मात्मयाथात्म्यानुसन्धानेन ज्ञानाकारं यः पश्येत्, तच्च ज्ञानं कर्मयोगान्तर्गततया कर्माकारं यः पश्येदित्युक्तं भवति । क्रियमाणे हि कर्मणि कर्तृभूतात्मयाथात्म्यानुसन्धानेन तदुभयं सम्पन्नं भवति ।' सः ईदृशज्ञानवान् । 'बुद्धिमान् कृत्स्नशास्त्रार्थवित्, मनुष्येषु स युक्तः मोक्षायार्हः । सः कृत्स्नकर्मकृत् कृत्स्नशास्त्रार्थकृत् ।'

கர்மாவை அநுஷ்டானம் செய்யும் காலத்தில் கர்த்தாவாகிய ஆத்மாவைப்பற்றிய தத்வஜ்ஞானம் வேண்டும். இதனால் அநுஷ்டிக்கப் பெறும் கர்மாவானது ஜ்ஞானாகாரமாகிறது. அந்த ஜ்ஞானமும் கர்மயோகத்தில் அடங்கியதாகையால் கர்மாகாரமாகிறது. இவ்வாறு கர்மாவை ஆத்மஜ்ஞானத்தோடு பார்ப்பவன் எல்லா சாஸ்த்ரார்த்தங்களையும் தெரிந்தவன். மனிதர்களுக்குள் அவனே மோக்ஷத்திற்கு அதிகாரி. அவனே எல்லா சாஸ்த்ரார்த்தங்களையும் அநுஷ்டானம் செய்பவன். 18

१८१ यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९ ॥

प्रत्यक्षेण क्रियमाणस्य कर्मणो ज्ञानाकारता कथमुपपद्यत इति चेत्– यस्य मुमुक्षोः सर्वे द्रव्यार्जनादिलौकिककर्मपूर्वकनित्यनैमित्तिककाम्यरूपकर्मसमारम्भाः कामवर्जिताः - फलसङ्गरहिताः, सङ्कल्पवर्जिताश्च- प्रकृत्या तद्गुणैश्चात्मानमेकीकृत्यानुसन्धानं सङ्कल्पः, समित्येकीकारे, कल्पो धात्वर्थानं तद्रहिताः, तं एवं कर्म कुर्वाणं, पण्डितं हेयोपादेयभूतदेहात्मादिविवेकवन्तं ; ऊहापोहक्षमा हि बुद्धिः पण्डा । कर्मान्तर्गतात्मयाथात्म्यज्ञानाग्निना दग्धप्राचीनकर्माणं, तत्त्वज्ञा आहुः । अतः कर्मणो ज्ञानाकारत्वमुपपद्यते ।

தேஹாத்ம விவேகத்துடன் பலாபேக்ஷையின்றிக்கே லௌகிக வைதிக கர்மாக்களை எவனொருவன் செய்கின்றானோ அந்தப் பண்டிதனை ஆத்மஜ்ஞானத்தினால் ப்ராசீன பாபகர்மாக்களைப் போக்கியவனென்று ஞானிகள் சொல்லுகிறார்கள். 19

१८२ त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥ २० ॥

कर्मफलसङ्गं त्यक्त्वा नित्ये स्वात्मन्येव तृप्तः अस्थिरप्रकृताश्रयबुद्धिरहितो यः कर्माणि करोति, सः कर्मण्याभिमुख्येन तदेकपरतया प्रवृत्तोऽपि नैव किञ्चित्कर्म करोति । कर्मापदेशेन ज्ञानाभ्यासमेव करोति ।

கர்மாக்களுடைய பலன்களில் பற்றுதலில்லாமல் நித்யனான தன் ஆத்மாவிலேயே த்ருப்தியுடன் நிலையற்றதான ப்ராக்ருத போகத்தை வெறுத்து எவனொருவன் கர்மாநுஷ்டானம் செய்கிறானோ அவன் கர்மாக்களை ஊக்கத்துடன் அநுஷ்டானம் செய்தாலும் கேவல கர்மாவைச் செய்பவனாகமாட்டான். கர்மாநுஷ்டானத்தை வ்யாஜமாகக்கொண்டு ஜ்ஞாநாப்யாஸமே 20
செய்கிறான்.

१८३ निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

"'यस्य' इति श्लोकेन ज्ञानाकारत्वमुपपादितम । 'त्यक्त्वा' इति श्लोकेन तदेव विवृतम । अतःपरं श्लोकत्रयेण तदेव विशोध्यते ।" निर्गताः आशिषः यस्मात् सः निराशीः— निर्गतफलाभिसन्धिः यतचित्तात्मा यतचित्तः आत्मा यस्य सः, चित्तमिह चिन्ता । 'अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते' इति शारीरकभाष्यम् । विषयान्तरचिन्तारहितमनाः । 'अत्र चित्तस्य पृथगभिधानं मनसो बुद्ध्यहङ्कारावस्थयोरप्युपलक्षणम् ।' त्यक्तसर्वपरिग्रहः— 'सर्वविषयः परिग्रहः सर्वपरिग्रहः स च स्वकीयताभिमानः ।' प्रकृतिप्राकृतवस्तुनि ममतारहितः । शारीरं शरीरसम्बन्धि शरीरिणो दुस्त्यजम् । यावज्जीवं केवलं शारीरमेव कर्म कुर्वन् किल्बिषं संसारं नाप्नोति, ज्ञाननिष्ठाव्यवधानरहितकेवलकर्मयोगेनैवं रूपेणात्मानं पश्यति ।' 'केवल' शब्दोऽत्र ज्ञाननिष्ठाव्यवधाननिषेधपरः ।

கர்மபலன்களில் நோக்கமில்லாமலும் மற்ற விஷயங்களில் மனம் செலுத்தாமலும், ப்ராக்ருத வஸ்துக்களில் 'எனது' என்கிற அபிமானமில்லாமலும் சரீரமுள்ளகாலமனைத்தும் கர்மாநுஷ்டானம் செய்து வந்தாலும் ஸம்ஸாரத்தை அடையமாட்டான். ஜ்ஞானயோகமின்றிக்கே கர்மயோகத்தினாலேயே ஆத்மஸாக்ஷாத்காரம் பெறுவான். 21

१८४ यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समस्सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥ २२ ॥

यदृच्छोपनतशरीरधारणहेतुभूतवस्तुसन्तुष्टः द्वन्द्वातीतः— यावत्साधनसमाप्त्यवर्जनीयशीतोष्णादिसहः, विमत्सरः— अनिष्टोपनिपातहेतु-भूत-स्वकर्मनिरूपणेन परेषु, विगतमत्सरः, युद्धादिकर्मसु जयादिसिद्ध्यसिद्ध्योस्समचित्तः कर्मैव कृत्वापि ज्ञाननिष्ठां विनापि न निबध्यते न संसारं प्रतिपद्यते । कर्मणैव ज्ञाननिष्ठाफलं सिद्ध्यति ।

தற்செயலாகக் கிடைத்தவற்றில் ஸந்தோஷம் கொண்டு சீதோஷ்ணம் முதலியவற்றை ஸஹிக்கும் தன்மையுடன், பிறர் பக்கல் த்வேஷமில்லாமல், தன் காரியங்களில் பலம் ஸித்தித்தாலும் ஸித்தியாவிடிலும் ஸமபுத்தியுடையவனாய் கர்மாநுஷ்டானம் செய்பவன் மறுபடி ஸம்ஸாரியாகான். ஜ்ஞானயோகமின்றிக்கே ஆத்மஸாக்ஷாத்காரம் பெறுகிறான். 22

१८५ गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

पूर्वं बुद्धिपूर्वस्सङ्गपरित्यागादिरुक्तः । इदानीं तथाविधनिममवतो द्रव्यार्जनादिव्यापृतस्यापि स्वरसत एव सङ्गाभावादिकं वदन्ननन्तस्यापि विरोधिकर्मणो निवृत्तिमाह । आत्मविषयज्ञानावस्थितमनस्त्वेन निर्गततदितरसङ्गस्य तत एव सर्वपरिग्रहैस्स्वयत्ननिरपेक्षं मुक्तस्य यज्ञादिकर्मनिर्वृत्तये द्रव्यार्जनादिव्यापारं कुर्वतः पुरुषस्य बन्धहेतुभूतं प्राचीनं कर्म निश्शेषं क्षीयते । 'कर्मशब्दः प्रथमान्तः 'प्रविलीयते' इत्यनेनान्वितः ।'

ஆத்மஜ்ஞானத்தில் மனதைச் செலுத்தினவாறே மற்ற சிற்றின்பங்களில் பற்றுதலற்றுவிடுகிறது. அதனால் தன் முயற்சியின்றிக்கே எனது என்கிற அபிமானம் தானே விலகி விடுகிறது. இத்தகைய அதிகாரியானவன் யஜ்ஞம் முதலியவற்றிற்காக த்ரவ்ய ஸம்பாதனம் முதலிய வ்யாபாரத்திலிருக்கச் செய்தேயும் ஸம்ஸார பந்தத்திற்குக் காரணமான பூர்வகர்மாவானது நிச்சேஷமாய் நாசமடைந்துவிடுகிறது. 23

१८६ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

प्रकृतिवियुक्तात्मस्वरूपानुसन्धानयुक्ततया कर्मणो ज्ञानाकारत्वमुक्तम्, इदानीं सर्वस्य सपरिकरस्य कर्मणः परब्रह्मभूतपरमपुरुषात्मकत्वानुसन्धानयुक्ततया ज्ञानाकारत्वमाह । अर्प्यतेऽनेनेत्यर्पणं स्रुगादि, तत् ब्रह्मकार्यत्वाद्ब्रह्म । ब्रह्म अर्पणं यस्य हविषः इति बहुव्रीहिः । ब्रह्मकार्यभूतस्रुगादिविशिष्टं तादृशस्रुगादिनिष्पाद्यं हविः स्वयं च ब्रह्मभूतं, ब्रह्मभूतेऽग्नौ ब्रह्मणा कर्त्रा हुतम् । 'इति' इत्यध्याहर्तव्यम् । ब्रह्मात्मके कर्मणि समाधिरनुसन्धानं यस्य सः ब्रह्मकर्मसमाधिः, तेन पुरुषेण ब्रह्मैव गन्तव्यम्, ब्रह्मात्मकतया ब्रह्मभूतयात्मस्वरूपं गन्तव्यम् । मुमुक्षुणा क्रियमाणं कर्म परब्रह्मात्मकमेवेत्यनुसन्धानयुक्ततया ज्ञानाकारं साक्षादात्मावलोकनसाधनं, न ज्ञाननिष्ठाव्यवधानेनेत्यर्थः ।

யஜ்ஞத்திற்கு அபேக்ஷிதங்களான ஹவிஸ்ஸு, அதை ஹோமம் செய்தற்கு வேண்டிய பாத்திரம், அக்நி, ஹோமம் செய்பவன், ஆகிய எல்லாவற்றையும் ப்ரஹ்மமயமாக அநுஸந்தானம் செய்பவன் ஜ்ஞானயோகமின்றிக்கே ப்ரஹ்மாத்மகமான ஸ்வாத்மாவை ஸாக்ஷாத்காரம் செய்கிறான். 24

१८७ दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

एवं कर्मणो ज्ञानाकारतां प्रतिपाद्य 'दैवमेव' इत्यादिना 'प्राणान् प्राणेषु जुह्वति' इत्यन्तेन सार्धश्लोकपञ्चकेन कर्मयोगभेदानाह। देवसंबन्धि दैवम्, तत्संबन्धित्वं च तदर्चनरूपत्वम्। देवार्चनरूपं यज्ञं अपरे कर्मयोगिनः पर्युपासते– सेवन्ते। तत्रैव निष्ठां कुर्वन्ति। यागादेरपि देवार्चनत्वेऽपि तत्तद्देवतारूपादिसपर्यायां ह्यर्चनशब्दः प्रसिद्धः। अपरे ब्रह्माग्नौ– ब्रह्म च तत् अग्निश्च ब्रह्माग्निः तस्मिन् ब्रह्मात्मकेऽग्नौ यज्ञं हविः, यज्ञेनैवोपजुह्वति– अयं यज्ञशब्दो हविस्स्रुगादियज्ञसाधने वर्तते। ब्रह्मार्पणं ब्रह्म हविरिति न्यायेन यागहोमयोर्निष्ठां कुर्वन्ति।

சில கர்மயோகிகள் தேவதாராதநத்திலேயே ஈடுபட்டிருக்கிறார்கள். மற்றும் சில யோகிகள் அக்நி ஹவிஸ்ஸு முதலியவற்றை ப்ரஹ்மாத்மகங்களாக த்யானித்து யாக ஹோமங்கள் செய்வதில் நிலைபெற்றிருக்கிறார்கள். 25

१८८ श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन् विषयानन्ये इन्द्रियाग्निषु जुह्वति ॥ २६ ॥

अन्ये योगिनः श्रोत्रादीनीन्द्रियाणि संयमा एव अग्नयः तेषु जुह्वति। इन्द्रियाणां संयमने प्रयतन्ते। संयमस्याग्नित्वं श्रोत्रादीनां निर्व्यापारत्वलक्षणं भस्मसात्करणात्। प्रतीन्द्रियं संयमभेदात् 'संयमाग्निष्वि'ति बहुवचनम्। अन्ये योगिनः शब्दादीन् विषयान् इन्द्रियाण्येवाग्नयः तेषु इन्द्रियाग्निषु जुह्वति। इन्द्रियाणां शब्दादिविषयप्रवणतानिवारणे प्रयतन्ते। 'श्रोत्रादीनि' इत्यत्र विषयसन्निधिपरिहारो विवक्षितः; 'शब्दादीन्' इत्यत्र तु सन्निहितानामपि विषयाणामकिञ्चित्करत्वापादनमिति विभागः।

சிலர் சப்தம் முதலிய விஷயங்களை நெருங்காதவாறு இந்திரியங்களை கட்டுப்படுத்துவதில் முயற்சிக்கின்றார்கள். மற்றும் சிலர் விஷயங்கள் நெருங்கச்செய்தேயும் அவற்றில் இந்திரியங்கள் ஈடுபடாதவாறு செய்வதில் ஊக்கம் கொண்டிருக்கிறார்கள். 26

TIRUPATI. LIBRARY

१८९ सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

'इन्द्रियेभ्यः परा ह्यर्थाः' इति श्रुतक्रमेणेन्द्रियार्थयोर्नियमनं पूर्वश्लोकेऽभिहितम् । अत्र 'अर्थेभ्यश्च परं मनः' इति क्रमप्राप्तं मनोनियमनमुच्यते । आत्मसंयम - मनोनियमनम् । तस्य योगः - प्राप्तिः; तस्य ज्ञानदीपितत्वं देहातिरिक्तशुद्धात्मस्वरूपानुसन्धानमूलत्वम् । अन्ये ज्ञानदीपिते मनस्संयमयोगाग्नौ सर्वाणीन्द्रियकर्माणि प्राणकर्माणि च जुह्वति । इन्द्रियकर्म वचनादानादिकम् ; प्राणकर्म - नात्रोच्छ्वासनिश्वासादिकम्, प्राणायामस्य पृथग्वक्ष्यमाणत्वात् । अपि तु प्राणसंवादादिसिद्ध इन्द्रियव्यापारादिहेतुभूतस्सूक्ष्मो व्यापारविशेषः । मनस इन्द्रियप्राणकर्मप्रवणतानिवारणे प्रयतनमेव तस्मिन् तेषां होमः । श्रोत्रादीनां पूर्वश्लोक उपादानात् कर्मेन्द्रियमात्रनियमनपरोऽयं श्लोकः ।

மற்றும் சிலர் பரிசுத்தமான ஆத்மஸ்வரூபத்தின் தெளிவு பெற்று மனதை அடக்குவதாகிய அக்னியில் இந்த்ரிய கருமங்களாகிய வ்யவஹாரம் முதலியவற்றையும், ப்ராணவாயுவின் கருமங்களையும் ஹோமம் செய்கிறார்கள். மனதை அவற்றில் ஈடுபடாதவாறு செய்வதில் முயற்சிக்கின்றார்கள் என்ப. 27

१९० द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयस्संशितव्रताः ॥ २८ ॥

अत्र प्रत्येकं यज्ञशब्दप्रयोगात् बहुविधकर्मयोगभेदनिष्ठा उच्यन्ते । तत एवापरशब्दोऽपि प्रत्येकमन्वितः । द्रव्यैर्यज्ञा येषां ते द्रव्ययज्ञाः । द्रव्यसाध्या यज्ञास्तु देवार्चनदानयागहोमाः । तेषु देवतार्चनयागहोमानां पूर्वमुक्तत्वेऽपि दानस्यानुक्तत्वेनापौनरुक्त्यम् । दानयज्ञा इति विशिष्यानुक्त्वा द्रव्ययज्ञा इति सामान्यशब्दप्रयोगस्तु अर्चनदानयागहोमानां चतुर्णामपि तपोयज्ञयोगयज्ञादिभ्यो व्यावृत्तावान्तरसङ्ग्राहकसूचनार्थः न्यायार्जितद्रव्यसाध्यत्वज्ञापनार्थश्च यद्वा अर्चनादिस्वरूपस्य यज्ञत्वं प्रागुक्तम्, इह तु तदर्थद्रव्यार्जनादेरेव । केचित्कर्मयोगिनो द्रव्ययज्ञाः, न्यायतो द्रव्याण्यु-

Registered No. M 2300

Book XXVIII ॥ श्रीः ॥ No. 11

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २८] कलि ५०५६ मन्मथ - कर्कट [सं ११

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

JULY 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्ध-सञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D.T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 कलिप्रादुर्भावम् ।
2 वरदाभ्युदयचम्पूः ।
3 मुकुन्दमाला ।
4 वैदिका विशेषाः ।
5 वृद्धभाषितम् ।
6 वीरलब्ध पारितोषिकम् ।
7 संस्कृतस्य पुनरुज्जीवनम् ।
8 प्रकृतिभेदः ।
9 लोकवार्ता ।

प्रथमः — भोः एवं कुरु, उभयोरप्यनिर्वेदो भवतु ! स्मर तवैव ह्यो दिनान्ते ब्राह्मणमुद्दिश्य कृतं निर्बन्धम् । कथमिदानीं वाक्परिवर्तनं वितन्वन्न त्वं सङ्कुचसि ।

द्वितीयः—कुत्र तन्निधानम् , आनयेह शीघ्रम्, अस्मत्समक्षं कुरु विभागम् । किं मुधा विलम्बसे ।

वैश्यः — यूयमन्योन्यकृतसङ्केताः पक्षपातेन धर्मविरुद्धं भाषथ । न शक्यं मत्क्षेत्रादधिगतं मदीयं स्वं ब्राह्मणाय विभज्य दातुम् । कुतो यूयमापणनारिकेलमध्वविनायकस्य निवेदयथ । नैतदनुपेतनयं भवतां माध्यस्थ्यं मयि प्रभविष्यति ।

[ इति सत्वरमपक्रम्य निष्क्रान्तः ]

कात्यायनः — हा हन्त ! भ्रष्टोऽयं पापिष्ठः । कष्टं भोः कष्टम् । किमिदानीं करवाणि ?

प्रथमः — भोः कात्यायनमिश्र ! इदानीमेव नः प्रतिभूकरोषि । निर्गते नीरे सेतुबन्धाय सहस्रैरपि मिलितैः किं क्रियताम् ? ह्यः सायमेव मामनतिदूरस्थं यद्यबोधयिष्यः नैवेदानीं शोकभागभविष्यः । अलमनुशोचनेन । प्राप्तव्यमर्थं लभते मनुष्यः ।

द्वितीयः— यदस्मदीयं न हि तत्परेषाम् ।

तृतीयः— सखे ! राज्ञः सकाशे निवेदय । अस्मिन्षड्भागहारी किल राजा धर्मशास्त्रवचनात् । तत्त्वया प्रतिबोधितः कृतज्ञतया प्रसादचिह्नं किमपि दापयिष्यति ।

कात्यायनः— एवमेव ममाप्याशयः । मम भवतु मा वा, अस्य द्रोहिणो निधानं सुखोपभोग्यं न भवितुमर्हति यद्यहं कात्यायनः । तिष्ठ भोः दुष्टवैश्य, निर्घृण, मत्कुलस्वापहारिन्, ब्राह्मणावमन्तः, अयं न भविष्यसि ।

[ इति सत्वरं निष्क्रान्तः । ]

प्रथमः — हृदयविदारणं कात्यायनपरिदेवितम् ।

द्वितीयः— अहो निष्ठुरता वणिजः ।

तृतीयः — वणिक् खलु, किं धनं लब्ध्वा मुञ्चति । कष्टं भोः दुस्तरं कात्यायनस्य कार्पण्यम् ।

[ नेपथ्ये कलकलः ]

तृतीयः — किमिदं भोः राजशासनमिव । सभेरीताडनमुद्घोष्यते वीथ्याम् ।

अन्यौ — शृणुमस्तावत् ।

[ ततः प्रविशति घोषणा ]

राजपुरुषः — शृणुत शृणुत भोः ! पौरजानपदाः महाराजस्य मन्त्रिसभानुमोदितस्याभिनवावतारमनुशासनम् ।

दृष्ट्वा निधानमवनौ तदपजिहीर्षां प्रजासु यः कुर्यात् ।
आरात्स मार्गते तद्रुस्वधमित्यस्तु वो विदितम् ॥ २ ॥

[निष्क्रान्तः]

प्रथमः— अहो व्युत्पत्तिगम्यता दारुणोद्घातस्य ।

द्वितीयः — अयमेवमधिगतमहिम्नां मकरदंष्ट्रायाः पल्लवाङ्कुरताविष्कारः । सुनिष्ठित एव सम्प्रदायः ।

तृतीयः— तेन हि कात्यायनप्रतिबोधितो राजा वैश्यं यन्त्रनिष्पीडितस्याखुपोतस्य समवस्थां प्रापयिष्यति ।

द्वितीयः — ही ही भोः, द्रक्ष्यामः कुतूहलम् ।

प्रथमः— अहो अप्रतीतपरिपाकोद्धुरता लोकतन्त्राणाम् एतं, एतम् ।

[ निष्क्रान्ताः सर्वे ]

इति षष्ठोऽङ्कः ।

---

## अथ सप्तमोऽङ्कः ।

[ ततः प्रविशत्यधिकरणस्थले आधिकरणिकः कायस्थः कात्यायनमिश्रो वैश्यः परिवारश्च ]

आधिकरणिकः— भोः, अभिजातोऽसि वणिक्पुत्र ! किमेवं महाकूष्माण्डमन्धसोऽन्तर्निगूहितुमिच्छसि । किं न त्वया निधानकुम्भो ब्राह्मणायास्मै ह्यो वासरावसाने संन्यवेद्यत ?

कात्यायनः— अस्त्येतदनपलपनीयम्।

वैश्यः – आर्यमिश्राः! निधानकुम्भलाभ एवायथार्थः। कुतो मया कुम्भाविष्कारो विप्रस्याग्रतः। स्वक्षेत्रविक्रयमन्तरा प्राप्तानुशयोऽयं विप्रः असूयामर्षपरुषो मद्विनिपातहेतुमलीककुम्भवृत्तान्तमुपनिबध्य मयि युष्मत्कोपमुत्तेजयति। नास्माकं नैगमानां मिथ्यावदनं शिक्षितम्।

कात्यायनः– अहो विप्रलम्भधाष्टर्यं वैश्यब्रुवस्य। तथैव मायाप्रपञ्चमाविर्भावयति यथेदानीं सत्यस्वरूपमेव दुष्करप्रतिलम्भमापद्यते।

आधिकरणिकः– भो ऊरुज! किमद्य प्रातः शिष्टानां पुरतः त्वया प्रतिपादनं प्रति विवदमानेन स्थितम्?

वैश्यः– विप्रेणानेनोद्भावितां कुम्भकथामालम्ब्याविज्ञाततत्त्वास्तेऽस्यैव पक्षपातिनः किमपि माध्यस्थ्यमुपाक्षिपन्।

आधिकरणिकः— कीदृशं तेषां माध्यस्थ्यम्?

वैश्यः— निधानस्यार्धभागः प्रत्येकमादीयतामिति।

आधिकरणिकः– तदा च त्वयोक्तं "मत्क्षेत्रे समासादितं निधानं कस्मादन्येन विभज्य भोक्ष्य" इति।

वैश्यः– नेदृशं मया भणितम्।

आधिकरणिकः– नैव भणितं त्वया तदानीं तेषां पुरतो "नासीदेव निधानमिति"। परन्तु निधानलाभमभ्युपगम्य तद्विभागे एव विप्रतिपन्नं त्वया।

वैश्यः– तेषामेव निधानसंभावनासमाहिता वाचः। न जाने निधानवार्ताम्। ह्यः प्रातरेव क्षेत्रं मद्धस्तगतम्। कथं दिनावसाने एव निधानलाभो घटिष्यते। महतीमेनामस्य विप्रस्यानृतकल्पनां कः श्रद्धास्यति।

आधिकरणिकः– तिष्ठ तावत्! अये, कः कोऽत्र भोः।

भटः– [प्रविश्य] अयमस्मि।

आधिकरणिकः– प्रतिबोध्यतां राष्ट्रियः! सांप्रतमेवास्य वैश्यस्यावसथशोधनं कृत्वा गृह्यतां निधानकुम्भ इति। मा च स्त्रीबालेष्वनुशयः कर्तव्यो यावन्निधानप्रतिपादनम्। लप्स्यते शाठ्यस्यास्य फलं वैश्यपाशः।

वैश्यः– स्वामिनः। मया चानुवर्तिना भूयते। नाहमपराधी। राष्ट्रियप्रवेशेन मे गृहजनः संत्रासमूढो भविष्यति। प्रसीदन्त्वार्यमिश्राः। कामं क्रियतां विचयनम्। कुतो दस्युकातरताऽनूढद्रव्यविशेषस्याध्वगस्य। तस्माद्राष्ट्रियपार्श्ववर्ती भवन्नहमप्यन्वेषणानुकूल्यमाचरिष्यामि।

आधिकरणिकः– भोः कात्यायनमिश्र! राष्ट्रियस्य पार्श्ववर्ती भवन् कुम्भोपलम्भसाहाय्यमाचरतु भवान्।

कात्यायनः– तथा। (इति भटेन सह निष्क्रान्तः)

आधिकरणिकः– भो वैश्य। न जानासि राजद्रव्यमपलपसीति। मन्यसे विप्रमेव खलु विप्रलभे। किमतः संपत्स्यत इति।

वैश्यः– अक्षमोऽहं राजकोपस्य पात्रीभवितुम्। यदि निधानस्यांशहरो राजा तदसत्यपि निधाने राजकोपनिर्हरणार्थं सपरिकरोऽस्मि यं कंचिदुचितं मदुपार्जितधनादंशमुपदीकर्तुम्।

आधिकरणिकः— अरे दुर्मते! उपस्थितविनिपात। किमाढ्यंमन्यस्त्वं राज्ञा सह सौमनस्यमूल्यदानेन समकक्ष्य इव व्यवहरिष्यसि। न तावदवगतं त्वया यन्नूतनेनानुशासनेनाद्यैव घोषणाप्रख्यापितेन सर्वत्र निधानसर्वस्वस्वामी द्रष्टारमतिक्रम्य राजैवेति। शृणु तावदनुशासनम्। कायस्थ! पठ्यतामनुशासनम्।

[कायस्थः "दृष्ट्वा निधान"मित्यादि पठति]

[वैश्यः निर्घातनिहत इव स्तब्धस्तिष्ठति]

[ततः प्रविशति राष्ट्रियपुरःसरः भटो निधानकुम्भमादाय पश्चात्कात्यायनश्च]

आधिकरणिकः– [राष्ट्रियं प्रति सस्मितम्] समासादितं किल?

राष्ट्रियः—बाढम्। यदा अस्माभिराविष्कृतं राजशासनं तदा भर्तृप्राणरक्षणपरया वैश्यपत्न्या कुम्भः सत्वरमुपढौकितः भिक्षते च सा तपस्विनी भर्तृप्राणान्।

आधिकरणिकः– भो वैश्य! मुक्तोऽसि सजीवः प्राथमिक एष राजाज्ञानुरोधान्निधानपरिग्रह इति। किन्तु दण्ड्यसे उन्मस्तकमिथ्याभिभाषणशाठ्यस्य कारणात् निवासगृहं वाणिज्यमूलं च वर्जयित्वा*

* शिष्टं ११७ तमे पुटे द्रष्टव्यम्।

अमोघसङ्कल्पतया [1]त्वया मदो
न धार्यतामस्ति तवाऽपि दुर्लभम् ।
सहस्रकृत्वोऽपि यतस्त्व सर्वथा
निजोपमानं न कदाऽपि लप्स्यसे ॥ ३९ ॥

जगत्प्रभुस्त्वं क्व जरद्गजः क्व वा
क्व चक्रमुग्रं क्व च नक्रकोऽधमः ।
चकर्थ तत्कर्म तदर्थमद्भुतं
श्रितार्थमुज्झन्ति घनास्त्वगौरवम् ॥ ४० ॥

भवश्रमच्छेदि भवन्मनः प्रभो
स्वभावशीतं प्रतिभाति तत्र नः ।
[2]प्रमाणमेतत्प्रभवो हिमद्युति-
र्भजन्ति कार्याणि हि कारणाद्गुणान् ॥ ४१ ॥

बलिप्रमाथिन् भवदीयनाभितो
बभूवतुर्द्वे किल [3]पुष्कराभिधे ।
तयोस्सवित्रैकमुपाश्रितं बुधाः
पितामहेनापरमामनन्त्यहो ॥ ४२ ॥

[4]स पुण्डरीकाक्ष तवैव चक्षुष-
स्सहस्रभानुस्समभूत्पुरा यतः ।
स्वहेतुबन्धुत्वधियोचितं तत-
स्सरोरुहेष्वेव करोत्यनुग्रहम् ॥ ४३ ॥

---

1 त्वया मदः न धार्यतां तव गर्वो माभूत् इत्यर्थः । 2 एतत्प्रभवः एतस्मात् मनसः प्रभवः उत्पत्तिः यस्य सः, हिमद्युतिः चन्द्रः, 'चन्द्रमा मनसो जातः' इति श्रुतेः । 3 पुष्कराभिधे पुष्करनामके, द्वे, अम्बरं अम्बुजं च । 'नाभ्या आसीदन्तरिक्षम्' इति श्रुतिः भगवन्नाभितः अम्बरोत्पत्तौ प्रमाणम् । 4 "चक्षोस्सूर्यो अजायत" इति श्रुतेः । भगवन्नेत्राम्बुजोत्पन्नः सः सूर्यः, स्वहेतोः उत्पत्तिकारणस्य चक्षुषः बन्धुत्वधिया उपमानत्वरूपसम्बन्धज्ञानेन सरोरुहेषु उचितं अनुग्रहं करोतीति भावः ।

[1]पदारविन्दात्पृथिवीमजीजनः
पयोविशेषञ्च तयोरपश्चिमम् ।
फणन्ति भूतं फणिशीर्षभूषणं
परं च तद्भूषणमौलिभूषणम् ॥ ४४ ॥

एवं बुधैरभिनुतो वरदो निजाङ्घ्रौ
भावं विधाय[2] विधिना [3]विधिना हुतानि ।
आस्वादयन्नथ हवींषि विमानमध्ये
भास्वानिवोदयगिरौ भगवान् बभासे ॥ ४५ ॥

तदा किल महाचलशिखरिशिखरस्फुरदुत्तरवेदिमध्यादभ्युत्थितमत्यद्भुतं देदीप्यमानं विमानमध्यासीने, कनकसुभगमकुटखचितवलभिद्रुपलशकलपटलरुचिरकिरणविसरणमसृणितनिर्मलसितहसितसदन [4]वदनतुलिततपनदुहितृविमलसलिलवलननिलयसुरसरिदमलपरिवहकलितोदयविकचारविन्दे [5]निजपदाश्रितयोश्चन्द्रसूर्ययोः [6]करयुगळेन परिगृहीताभ्यां शङ्खचक्रात्मकाभ्यां चन्द्रसूर्याभ्या[7]मुद्भाविताद्भुतरसे, निस्तुलकौस्तुभ-

---

1 पदारविन्दात् पृथिवीं भूमिं (पद्भ्यां भूमिमिति श्रुतेः) पयोविशेषं च गङ्गां च अजीजनः । तयोर्मध्ये अपश्चिमं भूतं प्राथमिकं पृथिवीरूपं भूतं, फणिशीर्षभूषणं आदिशेषशिरोभूषणं, परं च भूतं द्वितीयं गङ्गारूपं जलभूतं च, तद्भूषणमौलिभूषणं सः फणी भूषणं यस्य तस्य शिवस्य मौलिभूषणं शिरोभूषणं फणन्ति वदन्तीति भावः, (शिवस्य गङ्गाधरत्वात्) । 2 विधिना चतुर्मुखेन, । 3 विधिना कल्पोक्तविधानेन ।
4 तादृशवदनेन तुलितं समीकृतम् । तादृशगङ्गाप्रवाहोदितं अरविन्दं येन तस्मिन् । 5 निजपदं विष्णुपदं आकाशम् । 6 करयुगलेन भगवतः करयुगलेनेत्यर्थः । 7 उद्भावितः उत्पादितः अद्भुतरसः आश्चर्यरसः (अहो शङ्खचक्रात्मकचन्द्रसूर्यौ अस्मदपेक्षयातीव तेजस्विनाविनाविति आकाशस्थचन्द्रसूर्ययोः आश्चर्यरसः) येन तस्मिन् ।०

रत्नमध्यप्रतिफलितां वक्षस्थलस्थलक्ष्मीमूर्तिमभिलक्ष्य शिलायामबलाजननसामर्थ्यमस्य श्रुतचरमिदानीं साक्षात्क्रियत इति प्रेक्षावद्भिर्भृशं प्रशस्यमाने, दळमयफणसहस्रपरिमण्डितपुण्डरीकनाळव्याळवल्मीकायमाननाभीरूपगभीरकूपनिमग्नलोचन-पुनरुन्मज्जनकृतयतनसज्जनसन्दर्शनकन्दळितमन्दस्मिते, कल्पान्तरोत्पादयिष्यमाणस्य विरिञ्चान्तरस्य स्रक्ष्यामाणप्रपञ्चावलोकनार्थमुदरं प्रवेक्ष्यतः स्फुटावलोकनकृते सज्जीकृताभिर्दिव्यप्रदीपपङ्क्तिभिरिव मेखलाकलापप्रत्युप्तप्रत्नरत्नपरंपराभिः प्रकाशिताशान्तरे शरणवरणपरिचेतनवर्गोपवर्गार्पण विरुदायमानमञ्जुमञ्जीरशिञ्जितरञ्जितसकलजनहृदयेन, [1]पारावारस्य पश्यत्पादस्य च पत्नीप्रदेन प्रणतसुखावहेन चरणवारिरुहेण लोकलोचनलोलम्बकदम्बमाकर्षति वारिधाविव [2]वनमालापरिवृते विधृतविविधरत्नोर्मिके च सुग्रीव इव [3]शोभमानङ्गदे हरिमण्डलमध्यवर्तिनि च श्रोत्रिय इव [4]श्रुत्यन्तावगाहिदृष्टौ पालितब्रह्मयज्ञे च, कालमेघ इव [5]कल्लोलिनीवल्लभाद्गृहीतकमले सत्वरसस्याभिवृद्धिसंपादके च, महोद्यान इव [6]पुष्पवदक्षे मञ्जुलतमालच्छाये च भानाविव

---

1 पारावारस्य समुद्रस्य, पश्यत्पादस्य च गौतमस्य च पत्नीप्रदानेन गङ्गाहल्यारूपभार्ययोः प्रदानेन । 2 वनमालया वृक्षपङ्क्त्या, वैजयन्त्या च । विधृताः रत्नानि ऊर्मयः तरङ्गाश्च । विधृताः रत्नोर्मिकाः रत्नखचिताङ्गुलीयकानि च ।

3 शोभमानः अङ्गदाख्यपुत्रः, शोभमानं अङ्गदं केयूरकं च यस्य तस्मिन्, हरीणां कपीनां, मण्डलस्य समूहस्य, सूर्यमण्डलस्य च ।

4 श्रुत्यन्तावगाहिदृष्टौ वेदान्तावगाहिज्ञाने, कर्णान्तायतलोचने च, पालितः ब्रह्मयज्ञः पञ्चमहायज्ञान्तर्गतः दैनन्दिनवेदावृत्तिरूपः । चतुर्मुखयागश्च येन तस्मिन ।

5 कल्लोलिनीवल्लभात्, सरित्पतेस्समुद्रात्, गृहीतकमले गृहीतं कमलं जलं, कमला श्रीश्च येन तस्मिन्, सत्वरसस्याभिवृद्धिसम्पादके च सत्वरं द्रुतं सस्याभिवृद्धिसम्पादके, सत्त्वरसस्य सत्वगुणे अभिलाषस्य सम्पादके च । 6 पुष्पवदक्षे पुष्पाण्यस्य सन्तीति पुष्पवान् अक्षः विभीतकवृक्षः यस्मिन् तस्मिन्, पुष्पवन्तौ चन्द्रसूर्यौ अक्षे नेत्रे यस्य च । "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" इति निघण्टुः । मञ्जुलतमालानां तमालस्येव च छाया कान्तिः यस्मिन् ।

[1]गिरीशमौलिधृतपादे लोकेष्वसदृक्षतावहानां तेजसामास्पदे च, [2]मन्दारातिगर्वहरदानकारिण्यप्यमन्दारातिगर्वहरदानकारिणि, [3]पङ्कजनाभाख्यातिकलनाप्रकटितप्रकर्षेप्यपङ्कजनाभाख्यातिकलनाप्रकटितप्रकर्षे, [4]गजेशोपासितेप्यगजेशोपासिते, [5]मतिविकासमादधानेऽपि नमति विकासमादधाने, [6]साररूपानीतशुभाऽगमेऽपि विसाररूपानीतशुभागमे, [7]अमरसात्कृतविभवेऽपि नामरसात्कृतविभवे वरदे, परदेवतेयमुदितेति, सञ्जातनिश्चयेन दृष्टीरष्टावपि निभृतं निदधानेन कुशेशयासनेन भक्तिपरवशेन मुमुदे रुरुदे दिदिहे जहसे किमपि किमपि जगदे ननृते

1 गिरीशानां पर्वतश्रेष्ठानां मौलिभिः शिखरैः, धृताः पादाः किरणाः यस्य, गिरीशस्य शिवस्य मौलिना, शिरसा धृतः पादः चरणः यस्येति च । असदृक्षतावहानामित्यादि असन्ति च तानि ऋक्षाणि च, तेषां भावः असदृक्षता तद्वहानां तेजसां दीप्तीनां। नास्ति सदृक्षं समानं यस्य, तस्य भावः असदृक्षता, तद्वहानां दीप्तीनामश्रये चेति विग्रहः ।

2 मन्दारः कल्पवृक्षः, तस्य अतिगर्वः अहमेव सर्वं ददामीत्यहङ्कारः, तस्य हरं तादृशं दानं वितरणं करोतीति, तादृशेऽपि तद्भिन्ने इति विरोधः । अमन्दानां अधिकानां अरातीनां शत्रूणां, गर्वहरं मदनाशकं, दानं खण्डन (दो अवखण्डन) करोतीति परिहारः ।

3 पङ्कजं नाभौ यस्य सः पङ्कजनाभः स इति आख्यातिः, नाम तस्य कलना सम्बन्धः, तेन प्रकटितः प्रकर्षः उत्कर्षः यस्य तस्मिन्नपि तद्भिन्ने इति विरोधः । अपङ्कजनानां पापरहितानां आभा तेजः, ख्यातिः प्रसिद्धिः, तयोः कलनया कृत्या (उत्पादनेन) प्रकटितप्रकर्षे इति परिहारः ।

4 गजेशेन गजराजेन, अगजा पर्वतपुत्री पार्वती तदीशेन शिवेन ।

5 मतेः बुद्धेः विकासं स्फूर्तिम् । नमति प्रणम्रे आश्रिते इत्यर्थः । विकासं श्रेयोऽभ्युदयम् । 6 साररूपेण प्रशस्तबलेन (प्रशंसायां रूपप्प्रत्ययः) आनीतः भुवं प्रापितः, शुभः अगमः पारिजातवृक्षः येन तस्मिन् । विसारस्य मत्स्यस्य रूपेण मूर्त्या आनीताः प्रत्याहृताः शुभागमाः, वेदाः येन तस्मिन् । 7 अमराणां अधीनं अमरसात्, तथा कृतः विभवः येन तस्मिन् । नामरसात्, स्वनामसङ्कीर्तनहर्षात् कृतविभवे च ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २८] कलि ५०५६ मन्मथ · कर्कट साधारण [सं ११


# मुकुन्दमाला ॥

———o———

फलाभिसन्धिवर्जने दृढसङ्कल्पेन राज्ञा कुलशेखरेण स्वयं प्रयोजनभूतां दृढां भक्तिं प्रार्थितो भगवान् सुप्रीतः 'तव मनोरथः सिद्ध्यतु' इति तमनुगृह्य तिरोदधे ।

अथ भगवदनुग्रहबलेन राज्ञ आन्तरस्य चक्षुषः पुरस्तात् भगवतो दिव्यं रूपं प्रस्फुटं प्राकाशत । एवं अत्यन्तशोभनस्य ध्यानालम्बनस्य लब्धत्वात् तत्र प्रीतिमयध्यानसन्ततिरूपां भक्तिं करिष्यामीति अपारकरुणाशालिनो भगवतोऽनुग्रहं स्मरन् प्रतिजानीते—

करचरणसरोजे कान्तिमन्नेत्रमीने
श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे ।
हरिसरसि वि(व)गाह्यापीय तेजोजलौघं
भवमरुपरिखिन्नः खेदमद्य त्यजामि ॥ ८ ॥

अतिसुन्दरस्य भगवद्दिव्यमङ्गलविग्रहस्य ध्यानं चिकीर्षति । यथा चित्तं तत्र लीनं भवेत् तथा चिकीर्षति । तदा दिव्यौ करौ, पादौ, दयावर्षिणी नेत्रे, दीर्घवृत्तमसृणौ भुजौ, इत्येवं पृथक् तं तं अवयवमपि अनुभविष्यामीति मनोरथं करोति । अवयवशः कार्त्स्न्येन च दिव्यमङ्गलविग्रहे अनुभूते अथ क्रमेण तद्गुणानुभवो भवेत् । तत्र सर्वातिशायिप्रभामण्डलशालित्वं प्रकाशेत । "न तत्र सूर्यो भाति न चन्द्र-

तारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ।" इति हि औपनिषदो घोषः ।

एवं विग्रहस्य तद्गुणानां च अनुभवे जाते तदवधि तदलाभप्रयुक्तो यो महान् तापः तस्य शान्तिर्भविष्यतीति मन्यमानः प्रहृष्यति । मनोरथपरम्परामिमां ग्रन्थतो निबध्नन् भक्तः कविः भगवतो दिव्यं वपुः सरस्त्वेन रूपयति । सरो हि तापं शमयति । तदनुगुणतया करचरणं कमलत्वेन, नेत्रे मीनत्वेन, भुजौ वीचित्वेन, तेजः जलत्वेन च रूपयति । दिव्यरूपध्यानं अवगाहनत्वेन, तेजसोऽनुभवं पानत्वेन च अतिशयोक्तिविधया निबध्नाति ।

दयावर्षुकतया प्रसादाभिव्यञ्जकतया च नेत्रयोः कान्तिमत्त्वम् । भक्तजनदर्शनवैयग्र्यकृतचाञ्चल्याच्च नेत्रमीनयोः । एवं दयाशिशिरदिव्यकटाक्षधारापाते सति सद्यः श्रमः सर्वो नश्यति, सरसि आप्लुवे सति यथा तथा । अत आह श्रममुषीति । श्रमः शरीरस्यावसादः । कटाक्षपातेन पुनर्नवीकृता इव जना भवन्ति ।

अस्मिन् सरसि अवगाहनाय परिग्राह्यौ मार्गौ द्वौ, कर्मयोगज्ञानयोगरूपौ । तौ अगाधौ सुखेन उपादातुमशक्यौ । शक्तिमतामेव अनुसर्तुं शक्यौ । अचिन्त्यहेतुकेन भगवत्प्रसादविशेषेण तु ममाद्य तौ विनाऽपि अवगाहनं सुलभमभूदिति हृष्यति ।

अद्य भगवदनुग्रहलाभसमनन्तरम् । खेदं सर्वं सन्तापं, त्यजामि त्यक्ष्यामि ।

कुतस्ते सन्ताप इति शङ्कायां तद्धेतुं सरोरूपकानुरूपरूपकान्तरविन्यासेन दर्शयति—भवमरुपरिखिन्न इति । भवः संसारः भगवदितरनिस्सारतुच्छविषयानुभवदायी । स एव मरुः, अस्माकं प्राणधारणाय सन्तापहरणाय च उपयोक्तव्यं यज्जलं तस्य लवेनापि शून्यः । तत्र अटित्वा अटित्वा खिन्नोऽस्मि सन्तप्तोऽस्मि । तं तापमखिलं अद्य त्यक्ष्यामि । 'वर्तमानसामीप्ये वर्तमानवत्' इति कृत्वा एवं व्याख्यातम् । साक्षाद्वर्तमानतयैव व्याख्यानेऽपि नास्ति काचिदनुपपत्तिः ।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

## एकतद्वितत्रितकथा ।

तैत्तिरीयसंहितायाः प्रथमकाण्डे प्रथमप्रपाठकेऽष्टमानुवाके, 'एकताय स्वाहा द्विताय स्वाहा त्रिताय स्वाहा' इत्यस्ति । अस्य माधवाचार्यविरचिते भाष्ये 'तेभ्य इदं पात्रप्रक्षालनोदकं हुतमस्तु' इत्यर्थोऽवर्ण्यत । तैत्तिरीयब्राह्मणे तृतीयाष्टके द्वितीयप्रपाठकेऽष्टमानुवाके 'देवा वै हविर्भृत्वाऽब्रुवन् ... ... तदात्म्यानामात्म्यत्वम्' इति वेदभाग एकतादीनामुत्पत्तिप्रकारमेवमाह— 'देवाः पूर्वं व्रीह्यवघातादिना हविः सम्पाद्य बीजवधादिपापं कस्मिन् पुरुषे मार्जनीयमिति व्यचारयन् । तदानीमग्निर्देवान् प्रति मयि भवद्वीर्यं सम्यक्स्थापयन्तु । यस्मिन्पुरुषे युष्माभिरिदं मार्जनीयं तं पुरुषं युष्मदर्थमहं जनयिष्यामीत्यब्रवीत् । ते देवा अग्नेर्वचनेन स्ववीर्यं तस्मिन् संन्यदधत, तस्मादग्निः सर्वा देवता इत्याहुः । ततः सोऽग्निः सर्वदेववीर्यधारिणाऽङ्गारेणाब्देवतामभिलक्ष्य तद्वीर्यमपातयत् । तत एकतोऽजायत । तदनु द्वितीयं तृतीयं च वारं स तथा व्यदधात् । तेन क्रमेण द्वितः त्रितश्चोदपद्यत । यस्मादेकतादिनामका देव विशेषा अद्भ्य आत्मभ्यश्चोदभवन् तस्मादेतेषामापो मातरो देवा आत्मानः पितर इत्याप्त्यनामधेयकत्वमात्म्यसंज्ञितत्वं चोचितम्' इति । अथ तदनन्तरः 'ते देवा आप्त्येष्वमृजत ... ... तद्ब्रह्महणं नात्यच्यवत' इति वेदभागः स च पापलेपः परम्परया जीवघातिनि पुरुषे पर्यवसित इत्याह । तदित्थं— 'ते देवास्तत्पापमाप्त्येष्वेकतद्वितत्रितेष्वमृजन् । आप्त्या सूर्योदयकाले सुप्ते नरे तदमार्जन् । सूर्योदयसमये सुप्तः पुरुषः सूर्यास्तमयसमये सुप्ते नरे, स, रोगविशेषवक्रनखे, स, रोगविशेषमलिनदन्ते, स ज्येष्ठायामनूढायां कनिष्ठामूढ्वाऽवस्थिते, स, कनिष्ठे ऊढ्वति सति विवाहरहिते ज्येष्ठे, स, वीरक्षत्रियस्य हन्तरि, स नरो ब्राह्मणस्य हन्तरि पुरुषे च तत्पापममार्ट् । पापमार्जनं ब्रह्महणं नात्येति' इति । अत्र भाष्ये 'एतेष्वाप्त्यानामेकतादीनां देवानां पापलेपमार्जनायैव सृष्टत्वात्तेषु तन्मार्जनमुचितम् । सूर्याभ्युदितादीनां ब्रह्महान्तानां

पापप्रवणत्वान्निम्नगाजलस्येव लेपस्यापि तेषु प्रवाहो युक्तः । ब्रह्महत्याया: पापाधिक्यतारतम्यविश्रान्तिभूमित्वाल्लेपो ब्रह्महणं नातिक्रामति' इत्यभाष्यत ।

तत्रैव सप्तमप्रपाठके "यद्देवा देवहेडनम्" इत्यादिर्द्वादशानुवाकोऽग्निष्टोमादावेकविंशत्या दर्भपुञ्जीलैः पाव्यमानस्य यजमानस्य जपार्था ये विंशतिर्मन्त्रास्तदात्मकः । तत्र त्रयोदशमन्त्ररूपस्य "त्रिते देवा अमृजतैतदेनः ...... करोतु मामनेनसम्" इति वेदभागस्यायमर्थोऽन्यगद्यत । "त्रिते देवा एनत्पापमलिम्पन्, त्रितः सूर्याभ्युदिते, स सूर्याभिनिम्रुक्ते, स, कुनखिनि स, श्यावदति, सोऽग्रदिधिषौ, स, परिवित्ते, स वीरहणि, स, ब्रह्महणि चैतत्पापमलिम्पत् । सूर्याभ्युदितादिमनुष्येष्ववस्थितात्पापात्किञ्चित्पापं मामानशे यदि तस्मात्पापाद्गार्हपत्योऽग्निर्मां प्रमुञ्चतु । सपुत्रपौत्रा वयं यानि चान्यानि दुरितानि चकृम तत्र मां पापरहितं करोतु । पुत्रादीनपि पापरहितान्कलयतु" इति । श्रीमहाभारते शल्यपर्वणि सप्तत्रिंशाध्याये एकतद्वितत्रितकथैवमाख्यायत — "पूर्वयुगे एकतद्वितत्रितनामानः प्रजापतिसमाः प्रजावन्तो मुनयस्त्रयो भ्रातर आसन् । तेषां तपोदमनियमैः प्रीतो धर्मरतो भगवान् पिता गौतमश्चिरं तेषां प्रीतिमवाप्य स्वर्गं जगाम । तस्य ये राजानो याज्या अभवन् ते सर्वेऽपि तस्य पुत्रानपूजयन् । तेषां मध्ये त्रितः कर्मणाऽध्ययनेन चास्य पितेव श्रेष्ठतां प्राप्य सर्वेषां मुनीनां पूज्यो बभूव । कदाचिदेकतद्वितत्रिताः सर्वेभ्यो याज्येभ्यः पशून्प्रतिगृह्य महाफले यज्ञे तुष्टाः सोमं पास्याम इति विचिन्त्य सर्वान्याज्यानासाद्य तान्याजयित्वा सुबहून्पशूंल्लब्ध्वा प्राचीं दिशमाययुः । तेषां मध्ये त्रितः पुरस्तान्मुदितोऽव्रजत् । एकतद्वितौ पृष्ठतः पशून्कालयन्तावसरताम् । पापावेतौ इमा गावस्त्रितं विनाऽऽवाभ्यां कथं स्युरित्यालोच्य मिथ इत्थमूचतुः । "त्रितो यज्ञेषु कुशलस्तथा वेदेषु निष्ठितः । ततस्स बहुतरं गा लप्स्यते । तदावां सहितौ भूत्वा गाः प्रकाल्य व्रजाव । सोऽप्याबाभ्यां त्यक्तः काममयताम्" इति । तेषां रात्रावागच्छतां पथिस्थानां च सतां वृको दृष्टिगोचर आसीत् । तत्र सरस्वत्यास्तटे विदूरे महान्कूपोऽभूत् । अथ त्रितोऽग्रतः पथि तिष्ठन्तं वृकं दृष्ट्वा तद्भयादपसर्पन् तस्मिन्नगाधे कूपे पपात । ततः स कूपस्थ आर्तनादं चक्रे । एकतद्वितावार्तनादश्रवणेन भ्रातरं त्रितं कूपे पतितं

ज्ञात्वापि वृकत्रासाल्लोभाच्च समुत्सृज्य प्रजग्मतुः । तदा त्रितो निर्जले पांसुसंवृते वीरुत्तृणच्छन्न उदपान आत्मानं निमग्नमालक्ष्यैवमचिन्तयत्—"असोमपो मृतभूतो हि । इहस्थेन मया सोमः कथं नु पातव्यो भवेत्" इति । स एवं विचिन्त्य तस्मिन्कूपे लम्बमानां वीरुधमालोक्य तत्र सलिलं निखायाग्नीन्होतॄनात्मानं यष्टारं वीरुधं सोमं च संकल्प्य ऋचो यजूंषि सामानि मनसाऽनुसन्धाय शर्कराः ग्राव्णः कृत्वा सोमाभिषवं चक्रे । सलिलमाज्यमकल्पयत् । सोमाभिषवस्य तुमुलो ध्वनिस्त्रितस्य स्वरश्च दिवमाविशत् । अथ तं शब्दं शृण्वता बृहस्पतिना बोधितास्सर्वे देवास्तेन सह यत्र कूपे त्रितस्य यज्ञः प्रवर्तते तं गत्वा यज्ञे दीक्षितं श्रीमन्तमेनं वीक्ष्य वयं भागार्थिनः प्राप्ता इत्यभणन् । अनन्तरं ऋषिस्त्रितो देवान् प्रति, हे त्रिदशाः, भयङ्करेऽस्मिन्कूपे निमग्नं नष्टचेतसं मां पश्यतेत्युक्त्वा मन्त्रयुक्तांस्तेषां भागान्यथाविधि तेभ्यः प्रदाय तानप्रीणयत् । तदनु स, प्रीतेभ्यः सुरेभ्यो मामितस्त्रातुमर्हथ य इह कूपे तोयमुपस्पृशेत्स सोमपगतिं लभेत इति वरं वव्रे । तत्रोदपाने सरस्वत्यूर्मिमत्युत्पपात । तयोक्षिप्तस्स निर्जरानानर्च । विबुधास्तथेत्युक्त्वा यथागतमायन् । तदानीं त्रितः प्रमुदितः स्वमेव निलयमभ्यागमत् । तदा स महातपा भ्रातरौ तावृषी समासाद्य क्रुद्धः परुषं वाक्यं व्याहरन्नेवं शशाप—"पशुलुब्धौ युवां यस्मान्मां विहाय प्रधावितौ तस्मान्मया शप्तौ वृकाकृती रौद्रौ दंष्ट्रिणावभितश्चरौ भविष्यथः । युवयोः प्रसवो गोलाङ्गूलर्क्षवानररूपो भविष्यति च" इति । सत्यवादिनस्तस्यानेन शापेन तौ क्षणादेव तथाभूतावदृश्येताम् । हलायुध ऋत्विक्सुहृद्द्विप्रगणैः सार्धं सरस्वतीनदीगतं त्रितस्य कूपमवाप्य तत्रोदकमुपस्पृश्य विविधान् देयान् दत्त्वा द्विजान् पूजयित्वा प्राहृष्यत्" इति ।

---

# वृद्धभाषितम् ॥ (14)

—:o:—

आचार्यः— सुधियः, अस्मत्सम्भाषणस्य किञ्चिद् दीर्घ इव विच्छेदोऽजनि । अस्तु । अद्य त्वेदं प्रति किञ्चिद् वदामि । अवहिताः शृणुत ।

केशवार्यः— अनुग्रहप्रतीक्षिणः सर्वे वयम् । अवहिताः स्मः ।

आचार्यः– सर्वो लोको वेदमय इति वेद एव वदति ।

ऋचां प्राची महती दिगुच्यते
दक्षिणामाहुर्यजुषामपाराम् ।
अथर्वणामङ्गिरसां प्रतीची
साम्नामुदीची महती दिगुच्यते ॥

इति चतसृणां दिशां चतुर्वेदसम्बन्धमाह । अथ उपरिष्टाद् व्योम्नि सञ्चरतः लोकैकदीपस्य दिनकरस्य वेदसम्बन्धमाह—

ऋग्भिः पूर्वाह्ने दिवि देव ईयते
यजुर्वेदे तिष्ठति मध्ये अह्नः ।
सामवेदेनास्तमये महीयते
वेदैरशून्यस्त्रिभिरेति सूर्यः ॥

इति । अथ लोके यानि वस्तूनि सन्ति, या तेषां स्वस्वकार्यकरणाय प्रवृत्तिः यत् तस्याः साफल्यं, तत्सर्वं वेदाधीनमित्याह—

ऋग्भ्यो जातां सर्वशो मूर्तिमाहुः
सर्वा गतिर्याजुषी हैव शश्वत् ।
सर्वं तेजः सामरूप्यं ह शश्वत्

इति । अथ या लोके प्रजाः, ता अपि वेदप्रभवा इत्याह—

ऋग्भ्यो जातं वैश्यं वर्णमाहुः
यजुर्वेदं क्षत्रियस्याहुर्योनिम् ।
सामवेदो ब्राह्मणानां प्रसूतिः

इति ।

केशवार्यः– आश्चर्यमाचार्यपादा विषयं प्रतिपादयन्ति । अधीतवेदा अपि, शास्त्रज्ञा अपि, ईदृशमिदं वेदस्य वैभवं न जानन्ति ।

आचार्यः– न तथा वक्तव्यम् । बहवः स्युः वेदवैभवविदः । किन्तु अस्मिन् काले तद्विषयायाः चर्चायाः प्रसङ्गो नातीव भवति । तस्मात् ते तूष्णीं तिष्ठन्ति ।

अथ तैत्तिरीयोपनिषदारम्भे स्थितमिदं शृणुत ।

वेदस्य हि द्वौ भागौ, मन्त्रो ब्राह्मणं चेति । तत्र मन्त्रभागस्य संहितेति व्यवहारोऽस्ति । अस्यां संहितायां स्थितायां सत्यां, तैत्तिरीयोपनिषत् "अथातः संहिताया उपनिषदं व्याख्यास्यामः" इत्युपक्रम्य

1 पृथिवी द्यौः आकाशः वायुः ।
2 अग्निः आदित्यः आपः वैद्युतः ।
3 शिष्यः आचार्यः विद्या प्रवचनम् ।
4 माता पिता प्रजा प्रजननम् ।
5 अधरा हनुः उत्तरा हनुः वाक् जिह्वा ।

इतीमाः पञ्च 'महासंहिताः' इत्यभिधाय एतद्वेदनस्य फलम्--

**य एवमेता महासंहिता व्याख्याता वेद, सन्धीयते प्रजया पशुभिः, ब्रह्मवर्चसेनान्नाद्येन सुवर्गेण लोकेन ।**

इत्युपदिशति । ऐहिकमामुष्मिकं च सर्वं सौख्यं सम्पद्यत इत्युक्तं भवति । यासां वेदनस्य इदं फलं भवति तासु संहितासु प्रथमा लोकसम्बन्धिनी, द्वितीया ज्योतिस्सम्बन्धिनी । अस्मिन् लोके जनित्वा वसन्तो वयं

**अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।**
**आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥**

इत्युक्तरीत्या अग्न्यादिज्योतिरुत्पादितवृष्टिलब्धाभिरद्भिः तदधीनवृद्धिकैर्धान्यैश्च जीवामः । तदिदं उक्तसंहिताद्वयतात्पर्यम् । अथ जीवद्भिः यत् कर्तव्यं तत्र विवेकः अनधीतविद्यानां दुर्लभः । अतः सर्वप्रथमं विद्यासम्पादनं कार्यम् । इदं तृतीयसंहितापाठेन ज्ञाप्यते । लब्धविवेकैः शास्त्रोक्तप्रक्रियाऽनतिलङ्घनेन समीचीनप्रजोत्पादनं कार्यमिति ततः परं चतुर्थसंहिताव्याख्यानेन गम्यते । अथ उत्पन्नया प्रजया किं कर्तव्यम् ? वेदाध्ययनं कर्तव्यम् । इदं चरमया पञ्चमसंहितया व्यज्यते ।

अस्मिन् लोके मनुष्यजन्म लब्ध्वा जीवद्भिः कामभोगमात्रदृष्टिमकृत्वा शास्त्रोक्तविधिना सत्पुत्रानुत्पाद्य तन्मुखेन वेदाध्ययनं अविच्छिन्नं प्रवर्तनीयम् । अन्यथा योगक्षेमनिर्वाहो दुष्कर इति उपनिषद इह निगूढो भावः ।

केशवार्यः-- केवलाध्ययनमात्रस्य एतावत्फलम् ?

आचार्यः- आम्, केशवार्य। केवलाध्ययनमात्रस्य एतावत् फलम्। अर्थज्ञानमपि अवश्यं सम्पादनीयम्, न तत्र कश्चित् सन्देहोऽस्ति। तेन तु केवलाध्ययनं निष्फलमिति नैव मन्तव्यम्। केवलवेदपारायणं बहूनां पापानां प्रायश्चित्तमामनन्ति। यस्मिन् देशे वेदघोषः श्रूयते तत्र अलक्ष्मीर्न तिष्ठति, न प्रविशतीति प्राज्ञाः कथयन्ति। अर्थज्ञाने सति तु महान् विशेषः। यो वेदार्थं जानाति स एव पूर्णो विद्वान्। वेदो हि अङ्गी। अन्यानि शास्त्राणि तस्य अङ्गानि। तस्मात् तेषु पाण्डित्ये समग्रे सत्यपि अङ्गिभूतवेदार्थज्ञानविरहे पूर्तिर्न भवति।

अद्य तु न वेदं नापि तदनुसारीणि शास्त्राणि अधीयते। केवलं नवीनया पाश्चात्यप्रक्रियया दीयमानां शिक्षां लब्ध्वा प्राज्ञा इति प्रख्याता भवन्ति। यो वेदविद्यां परित्यज्य अन्यत्र बह्वपि कृतश्रमो भवति तस्य वाचि उपादेयोऽंशो अल्पिष्ठोऽपि नास्तीति, सुकृतमार्गज्ञानं प्रति अहेतुत्वात् विद्यान्तरविज्ञानं सुसम्पन्नमपि सर्वं सर्वथा व्यर्थमिति च कश्चिन्मन्त्र आह—

यस्तित्याज सखिविदं सखायं
न तस्य वाच्यपि भागो अस्ति।
यदीँ शृणोत्यलकँ शृणोति
न हि प्रवेद सुकृतस्य पन्थाम्॥

इति। सखिवित् सखा वेदः। यः सश्रद्धमधीते तं आत्मनः सखायं मन्यमानो वेदः तस्य हितकारी भवति। ब्राह्मणस्य यो विशेषः स सर्वः वेदाध्ययनाधीन एव। स्वकुलक्रमागता या वेदशाखा सा नियतमध्येया। इयं स्वाध्याय इत्युच्यते। तदनध्ययने दोष उच्यते। अधीतस्य विस्मरणे च महान् दोष उक्तः। अतः अधीतो वेदः अविस्मरणेन धार्यः। प्रत्यहं तस्य एकदेश आवर्तनीयः। प्रत्यहं यथाशक्ति क्रियमाणं स्वाध्यायपठनमेव परमं तप इत्याह मनुः—

यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम्।
आ हैव स नखाग्रेभ्यः परमं तप्यते तपः॥

इति। स्रग्वी अपि स्रक्चन्दनादिभोग्यवस्तुसेवनपरोऽपि।

——

# वीरलब्धं पारितोषिकम् ॥

[ R. Ramamurti, M. A. ]

आविरासीत् प्रभातसमयः । सुतप्ततपनीयगोल इव प्राचीमूले प्रचण्डभानुः गगनभागस्य तिमिरनिकुरुम्बं निरस्यन् ज्वलदंशुमाली उदियाय । मधुरानगरीतः तञ्जापुरीं प्रति गच्छन्त्यां सुविहितायां विशालायां सरणौ अश्वारूढः कश्चन वीरः गच्छन्नासीत् । तं एकवारं वीक्ष्य यः कोऽपि निश्चिनुयात्, "अयम् आर्जवस्य आलवालः, धर्मस्य उदधिः, शौर्यस्य शेवधिः, सौन्दर्यस्य सोदरः, सामर्थ्यानां समुदायः गुणानां कोशः" इति । "प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः" इति सर्वजनसाधारणोक्तेः अभूतपूर्वः अपवाद इव सः अभवत् । न क्वचिदपि तिष्ठन्, न कमप्यालपन्, न किमपि पश्यन्, न कुत्रापि खेदं अपनयन्, आहारमप्यभक्षयन्, सततगतिः वायुरिव सः सवेगं जगाम । आत्मोत्थितैरपि रजोभिः अलङ्घनीयः तस्य अश्वः वियति बहुतरं स्तोकमुर्व्यां चचार । "अस्तं अगात् गभस्तिमान् । तञ्जापुरी प्राप्तप्राया । परीक्षे तावत्" इति चिन्तयन्, अदूरे स्थितां अत्युन्नतां भूमिं आरुरोह । आरूढः सः आश्चर्येण, आनन्देन च अवशः, वज्रलेपघटित इव चित्रे अर्पित इव, अचञ्चलः चिरं तस्थौ ।

अनतिदूरे विद्युत्कान्तिमपि विडंबयन्तीभिः दीपमालाभिः देदीप्यमानां, अमरावतीवासिनां, अमराणामप्यसूयां आदधानां, शरच्चन्द्रशुभ्रैः अभ्रङ्कषैः प्रसादैः धवलितदिङ्मण्डलां, सुविभक्तराजमार्गां, सुप्रसिद्धविपणिपरम्परां, मन्दमारुतानीयमानवेणुवीणादिवाद्यनादां, आलयघण्टानादसंमिलितसुमधुरवेदघोषां, अत्युच्छ्रितैः गोपुरोत्तमैः आकाशमिव अभ्युड्डीयमानां, चोलमण्डलस्य श्वासकोशभूतां, सौन्दर्यस्य सीमान्तलेखां तञ्जापुरीं अनिमेषलोचनः ददर्श । दृष्ट्वा च अचिन्तयत्— "अहो, विश्वकर्मणेव विनिर्मितायाः अस्याः नगर्याः गम्भीरता । सुविस्तीर्णा एते अत्युच्छ्रायाः प्राकाराः अयसेवोत्पादिताः रिपुभिरप्रधृष्याः । दूरीभूतप्रतनुसलिला, प्रसन्नपावनतीर्थायाः महानद्याः कावेर्याः आगच्छन्ती एषा हि परिखापूरणी, या पुरीमिमां समुद्रमाला लङ्कामिव परिरक्षति ।

मन्ये, बहुकालकैलासवासलब्धेश्वरमात्रनाम्ना अतृप्तः पशुपतिः, अत्र अवाप्तबृहदीश्वरनामधेयेन सुतृप्तः, सुप्रतिष्ठितः पौरजनान् अनुगृह्णाति।

तदा शिवपादशेखरः चोलसाम्राज्यस्य चक्रवर्ती आसीत्, यः आन्ध्रकर्णाटकचेरपाण्ड्यसिंहलमहीपतीन् समरे जित्वा, राजराजेत्यन्वर्थं, चरित्रप्रसिद्धं नामधेयं अवाप। तस्मिन् शासितरि, तञ्जापुरी सर्वेष्वपि विषयेषु, सर्वतोमुखं औन्नत्यं अयत्नेन अभजत।

अश्वारूढो युवा नगरसौन्दर्यमधुपानेन आनन्दस्य परां कोटिमध्यगच्छत्। 'जननीजन्मभूमिश्च स्वर्गादपि गरीयसी' इति खलु अनुभवक्षीरोदधिहैयङ्गवीनं शास्त्रं ब्रूते। को वा, कदा वा जन्मभूमिवात्सल्यं विस्मरेत्। विजयनामकोऽयं वीरः चोलदेशीयोऽपि बाल्य एव मात्रा मधुरापुरीं प्रेषितः, मातुलात् पाण्ड्यमहीपतिसेनानायकात् सर्वयुद्धतन्त्रस्वतन्त्रतां स्वायत्तीकर्तुम्। तत्र च सः अश्वारोहणे, असियुद्धे, द्वन्द्वयुद्धे, लक्ष्यभेदने तोमरक्षेपणे च अनुपमं नैपुण्यं अवाप मातुलात्, तत्तच्छास्त्ररहस्य वेदिभ्यश्च। धैर्ये, वीर्ये, सौन्दर्ये, सामर्थ्ये, सङ्ग्रामे च अप्रतिद्वन्द्वं भागिनेयं भाग्यशालिनं मेने मातुलः। तस्मै च पाण्ड्यसेनायां इतरैः अलभ्यां काञ्चन पदवीं दातुमियेष। परन्तु विजयः "उन्नतिर्हि मनुष्याणां जन्मभूमौ प्रशस्यते" इति मत्वा तञ्जापुरीगमनायैव स्पृहयति स्म। पारमातुलोऽपि न तस्मै चुकोप, परं तु तस्य उदारं सङ्कल्पं बहु मेने। पारसीकदेशोद्भवं, मनोजवं समरभूमिसञ्चारचतुरं, इङ्गितज्ञानकोविदं, निर्भयं अश्वरत्नं तस्मै आशिषा सह दत्वा तञ्जापुरीं प्राहिणोत्।

स्वजन्मदेशदर्शनं, अपमेघोदयं वर्षमिव, अदृष्टकुसुमं फलमिव, हृदअनास्वादितं नवं मधु इव, तस्मै अननुभूतपूर्वं, आश्चर्यकरं वितं, परिवेषसंवेशं, आनखशिखमभिव्याप्य रोमविवरेभ्यः विजृम्भमाणं, परिच्छेदातीतं आनन्दं अदात्। जन्मभूमिं पश्यन् जननीं सस्मार विजयः। सत्वरं गृहमेत्य मातरं ववन्दे। तस्याः चरणारविन्दयोः शिरो निधाय, चिरं लुठन्, अश्रूणि अनिवार्यमाणानि मुमोच। तनयविरहविक्लबा जननी जराजर्जरिताङ्गी आनन्देन अतर्कितोपनतेन मूकीभूता, तस्य सर्वाणि अङ्गानि गौः वत्समिव वात्सल्येन पस्पर्श। तं प्रेमप्रवाहपरिपूर्णाभ्यां लोचनाभ्यां ददर्श। परन्तु वाचा एकमप्यक्षरं वक्तुं न शशाक।

क्रमेण, जल्पतोस्तयोः अविदितगतयामा त्रियामा प्रभातोन्मुखी बभूव ।

प्राभातिकं कर्मकलापं कृत्वा, मातरं आपृच्छ्य, आशींषि शुभोदर्काणि लब्ध्वा, विजयः हयं हेपारवाविष्कृतसन्तोषं आरुह्य नगरसौन्दर्यं द्रष्टुकामः प्रतस्थे । तस्मिन् दिने सर्वे राजमार्गाः नानावर्णतोरणालङ्कृताः शुशुभिरे । प्रासादाग्रेषु राजचिह्नाङ्कितानि ध्वजपटानि बभासिरे । नूतनवस्त्रधारिणः, विविधाभरणभूषिताः आनन्दविकसितमुखकमलाः पौराः सङ्घशः राजभवनगामिन्यां विशालायां रथ्यायां गच्छन्तः अभवन् । कारणं जिज्ञासुः विजयः एकतमं आहूय 'महाभाग, अमीषां नगरजनानां कुतूहलस्य कारणं किम् ? कुत्र गच्छन्ति इमे ईदृशेन कोलाहलेन ?' इति अपृच्छत् । सः प्रत्यवादीत् — "त्वं सर्वजनविदितं कारणं न जानासि, इत्यहो ते बुद्धिमान्द्यं, दौर्भाग्यं च । अयं अस्मदीयसार्वभौमस्य जन्मदिवसः । अद्य अस्माकं महोत्सवः । अस्मिन् दिने महीपतिप्रासादस्य पुरतः वर्तमाने सुविस्तीर्णे वालुकाप्रदेशे विविधासु युद्धकलासु परीक्षा चलिष्यति । ये विजयिनः ते महत् पारितोषिकं, महतीं पदवीं च चक्रवर्तिकरकमलात् अवाप्स्यन्ति" इति । इमां वार्तां श्रुतवतः विजयस्य मनः आनन्देन परस्पन्दे । "हृदयगह्वरे चिरप्ररूढस्य मनोरथतरोः वसन्तकालः संप्राप्तः" इति मेने । अम्बिकां, अम्बां च स्मृत्वा सुचिरं दध्यौ अभीष्टसिद्धये ।

वेगवता जनप्रवाहेण नीयमानो विजयः उत्तरेण राजभवनं, महान्तं मण्डपं निर्मितं ददर्श । सैकतमये भूमिभागे, सुविशाले, चक्राकारतया सोपानसमानाः आसनपरम्पराः सुबद्धाः अवर्तन्त । तासु सङ्ख्यातीता जनाः अतिष्ठन् । मण्डपस्य सविशेषालङ्कृते मध्यभागे उन्नता वेदिका निर्मिता अभूत् । तत्र नवरत्नखचिते सौवर्णे सिंहासने सहस्रकिरणसदृशे देदीप्यमाने आस्ताम् । तयोः समीपे वेत्रमयानि आसनानि चीनांशुकावृतानि व्यराजन्त ।

विजयः, "सर्वासु युद्धकलासु परीक्षां अपेक्षे" इति आत्मनामाङ्कितं पत्रं अधिकृताय अधिकारिणे ददौ । प्रातः कुक्कुटसंपातः, उरभ्रसंपातः, उन्मत्तवृषभग्रहणम्, इत्यादयः आविरासन् । "अपराह्णे तोमरयुद्धं असियुद्धं च भविष्यतः इति राजसेवकः उच्चैः उद्घोषत् । उचिते काले, प्रतापानुरागावनतसमस्तसामन्तचक्रः राजाधिराजः राजराजचोलः समग्रदेवीनिबद्धाग्रदेव्या समेतः, परिवारपरम्परावृतः सिंहासनं अध्यतिष्ठत् । "जय, विजयीभव", "वर्धतां, विजृम्भतां चोलमहाराजः महादेव्या सह"

इति घोषः जननाभिकुहरनिर्गतः, नीलनीरधरनिनाद इव अखण्डं अम्बरतलं व्याप्नोति स्म । क्षणकालेन सः जनसमुद्रः निवातनिष्कम्पः अनुत्तरङ्गः, चित्रनिवेशितः अपां निधिरिव अभवत् ।

सिंहासनासीनः सार्वभौमः समीपवर्तिनं सचिवोत्तमं अनिरुद्धब्रह्मरायं यत् किमपि अवादीत । इङ्गितज्ञानकोविदः राजकिङ्करः भेरीं भाङ्कुरुते स्म । तोमरयुद्धसन्नद्धा वीराः वाजिरूढाः युद्धरङ्गं प्राविशन् । विना कालविलम्बं युद्धं च अचलत् । सर्वे निखाता इव निर्निमेषेण चक्षुषा अपश्यन् अदृष्टपूर्वं समरचातुर्यम् । क्षणं सर्वं धावमानतुरगमयमिव, क्षिप्ततोमरसीत्कारपूर्णमिव, निष्प्रलापपतितव्रणितवीरप्रायमिव, किमप्याश्चर्यं अजनि । वीरेषु बहुषु, द्वावेव इतरान् पराजित्य सार्वभौमस्य प्रीतिभाजने अभूताम् । तयोः एकः विजयः, अन्यः अवनिपालस्य अश्वसेनापतिः कुटिलश्च । अयं कुटिलः कर्णाटकदेशीयोऽपि सर्वसङ्ग्रामतन्त्रनैपुण्येन पृथ्वीपतेः प्रीतिभाजनं भूत्वा, कालक्रमेण हयवाहिनीपतिश्च आसीत् । "अनयोः को वा विजयी भविष्यति" इति जनात् जनं प्रसर्पन्त्या वाग्प्रतिवादतरङ्गमालया सः जनजलनिधिः प्रक्षुभितः अभवत् ।

एतावता कालेन विजयः युद्धरङ्गस्य उत्तरं भागं, कुटिलः दक्षिणं कोणं च गत्वा तुरगाधिरूढौ अवर्तेताम् । अनिर्भेद्यकवचधारिणोः तयोर्हस्तयोः सुदीर्घौ निशितौ तोमरौ आस्ताम् । तुरङ्गमौ संयमितावपि धावनाय सज्जाविव सुश्लिष्टान् पादान् उत्क्षिपन्तौ निक्षिपन्तौ च अभवताम् । संमिलितानां अगण्यानां जनानां हृदयं स्पन्दितुमपि नाशक्नोत् । भटः कश्चन प्रथमामात्यशासनं अनुसृत्य भेरीं एकवारमताडयत् । निनादसमकाल एव द्वावपि वीरौ विद्युद्वेगेन परस्परोन्मुखं अडयेताम् । कुटिलेन क्षिप्तः तोमरः कुलिशतीक्ष्णः विजयस्य अयोमयं हस्तफलकं अच्छिनत् । विजयस्य तोमरस्तु कुटिलस्य शिरस्त्राणं अनायासेन भित्वा अधः पातयामास । पारस्परिकं संघट्टं सोढुमक्षमः कुटिलस्य अश्वः सशब्दं पपात । उत्थातुमिव यतमानं वैरिणं उद्धर्तुं विजयः वाजिनः अवरुरोह । अननुभूतेन अवमानेन अग्निकल्पेन पच्यमानहृदयः कुटिलः कोशात् दीर्घां असिलतां आकृष्य विजयं हन्तुकामः अधावत् । सार्वभौमस्य सान्निध्यमपि विस्मरन्तः जनाः कुटिलस्य कापट्यं धिक्चक्रुः ।

---

शिष्टसर्वस्वापहारेण । तत्र च स्वकीयः भूतपूर्वः केदारखण्डो विप्राय निधानलाभप्रकाशकाय प्रमादपर्यायतया प्रतिनिर्यातयिष्यते। प्रवेश्यतां निधानकुम्भः कोशगृहम् ।

[ वैश्यः शिरस्पदनियोजितकरतलः निषीदति ]

कात्यायनः— [स्वगतम्] अहो दैवस्य सार्वज्ञ्यम् । समुचितमिदं पर्यवसानं विप्रलोभस्य वैश्यदौर्जन्यस्य च । [प्रकाशं] सर्वथा कृतार्थोऽस्मि पौर्विकक्षेत्रस्वाम्यप्रत्यावर्तनेन ! तथापीदमस्तु भरतवाक्यम् ।

धर्मस्थेष्विह समीहितातिशयितं विन्दन्तु सन्तः फलं
तेषामार्तिकरान् द्विषः क्षपयतु स्वेच्छाविधेयान् कलिः ।
प्रज्ञाशालिवचांसि शालिकदलीक्षेत्राणि गावः श्रुतं
विप्राश्च प्रतिपादयन्तु सततं सर्वप्रजाभ्यः शुभम् ॥

इति श्रीमन्महालिङ्गकविविरचितं
कलिप्रादुर्भावं नाम
नाटकमवसितम् ।

---

शुभमस्तु

---

## CORRECTION

| Page | Line | For | Read |
|---|---|---|---|
| १ | 7 | विरच्य | विरचय्य |
| १० | 20 | मनोनर | मनोरन |

# संस्कृतस्य पुनरुज्जीवनम् ॥

—:०:—

[ एतच्छीर्षको लेखः अतीतवृषभ(मे मास)पत्रिकायां प्रकाशितः। तल्लेखकनामप्रकाशनं प्रमादाद् विस्मृतम् । श्री. R Rajagopalan, M. A., Bangalore इतीदं तन्नाम ]

---

## प्रकृतिभेदः ॥

भर्ता— अये, अपरं किमपि कारणमस्ति चेद् ब्रूहि, येन पाककरणे तव विलम्बो भवति, इतरासां तु न भवति । वयं पुरुषाः अन्तर्वर्तमानं किं जानीमः ।

भार्या— न तथा आर्यपुत्रो वक्तुमर्हति। कति पुरुषा न सन्ति, ये स्त्रीणामपि कर्तव्येषु समीचीनां शिक्षां निपुणं ददति। आर्यपुत्रस्य तु मातापितृभ्यां बन्धुभिश्च लालयित्वाऽभिवर्धितस्य गृहिणीकृत्येषु अल्पस्यापि परिचयस्य अवसरो नाभूत् ।

व्रीहीणां अवहननं यन्त्रघर्षणं वा कृत्वा तण्डुलान् महाकुम्भे अयःकुसूलके वा निक्षिप्य रक्षामः । कतिपयेषु दिनेषु यातेषु तत्र क्रिमय उत्पद्यन्ते। न तु तत् गृहिण्यः परामृशन्ति। तथैव तण्डुलान् आददते। पचन्ति। किं जन्तव उत्पन्ना इति सम्यगपेक्षणीयम्। अत्यल्पा हि क्रिमयः सन्तोऽपि न सहसा दृष्टिगोचरा भवन्ति । क्रिमिसत्त्वे परापूय तण्डुलाः शोधनीयाः। एकोऽपि जन्तुर्नास्तीति यावता मनसस्तुष्टिर्भवेत् तावच्छोधनाय कियान् कालो भवेत् । तत्र क्षमा बहूनां न भवति। तेन क्रिमिसत्तां सम्भावयन्त्योऽपि तण्डुलाननवेक्षमाणा एव

जले क्षिपन्ति । क्रिमयः पच्यन्त इत्यनुक्रोशो वा, तान् वयमत्स्याम इति जुगुप्सा वा, मनागपि नास्ति । सा तासां प्रकृतिः । मम त्वन्या ।

भर्ता— आपणेभ्यः क्रीत्वा वस्तूनि आनयन्ति । सद्यः पाचकाः तानि उपयुज्य पाकं कुर्वन्ति । सर्वे भुञ्जते । एवं हि बहुत्र भवति । तत्र कति नाम ज॰ ॰ हिंस्येरन्, कियज्जुगुप्सावहं तद्भोजनम् ।

भार्या— सत्यम्, एवमेतत् । परं तु विवेकिनां गृहे न कदाचिदेवं क्रियेत । पूर्वमेव वस्तूनि क्रीत्वा कर्मकरीर्नियुज्य एकैकमपि, सम्यक् शोधयित्वा रक्षेयुः। तत एव पाको भवेत् ।

प्रत्यहमहं एकैकमपि वस्तु सम्यगवेक्षे। सुविशोध्य निक्षिप्तमपि अनवेक्ष्य उपयोक्तुं मे मतिर्न भवति । किमहं कुर्याम् । तेनाहं प्रत्यहं आर्यपुत्रोपालम्भस्य भाजनं भवामि ।

---

# लोकवार्ता ॥

**26—5—55**

1) आङ्गलेषु अद्य 'प्रोद्धार' (एलेक्षन्) सम्भ्रमः प्रचलति । तत्र द्वे कक्ष्ये स्तः । एका 'रक्षा कक्ष्या', अपरा 'क्रिया कक्ष्या । अनयोरेका पर्यायेण तत्र राज्यभारं निर्वहति । उभे अपि इमे सम्प्रति राज्याधिकारं स्ववशे कर्तुं तीव्रमुद्यमं कुरुतः । तदनुबन्धिनि प्रचारे कचित् सम्मिलितेषु जनेषु मरिचचूर्णप्रक्षेपदुश्चर्या वृत्तेति श्रूयते ।

नवीननागरिकतायाः परां काष्ठामारूढ इति यः प्रसिद्धः, तस्मिन् देशे राज्यशासनव्यवस्थापनक्रमः ईदृशो वर्तते । तदनुकरणे वयं प्रवृत्ताः स्मः । प्राणहानिपर्यन्ता स्पर्धा वर्धते । अयं नु क्रमः अस्माभिरनुसर्तव्यः ? बुद्धिमन्तः पर्यालोचयितुमर्हन्ति ।

2) हरिजनाभ्युदयः । को नामाभ्युदयः ? तदवधारणं तावत् तेषां प्रथमापेक्षितं, ये तत्कामा भवन्ति, ये तदुद्देशेन प्रवृत्तिं कुर्वन्ति। अत्र हरिजनानां जीवनार्थवस्त्वपेक्षा अत्यल्पा। यदि दिनस्य द्विरशनं वत्सरस्य द्वे वसने च लभेरन् तावता ते तृप्ताः प्रहृष्टाः स्युः। उद्योगतृष्णया नवीनविद्यापद्धतिपतितास्तु उद्योगं लब्ध्वाऽपि अशनाच्छादनविहारभोगार्थतया नानाविधनानावस्तूपयोगे जातपरिचयाः अपेक्षितसर्ववस्तुप्राप्त्यनुरूपधनागमरहिताः महान्तं क्लेशं अनुभविष्यन्ति, यथा अन्ये सर्वे तथा। हन्त सर्वे गतानुगतिका भवन्ति। न तु उत्थितेषु प्रश्नेषु अन्तः प्रविश्य तत्त्वं ज्ञातुं उत्सहन्ते।

जीवनपद्धतेरुच्छ्रायः सम्पादनीय इति बलवान् घोषः क्रियते। कः स लक्ष्यभूत उच्छ्राय इति तु न कश्चित् स्पष्टं वदति। दन्तधावनं वयं मृत्तिकया कुर्मः, भस्मना कुर्मः, काष्ठेन कुर्मः, पत्रेण कुर्मः मूलेन कुर्मः। महानगरवासिनः तत्संसर्गिणश्च पुनः देशान्तरनिर्मितं चिक्कणं किमपि क्रीत्वा क्रीतेनैव कूर्चेन तदादाय दन्तेषु लिप्त्वा घर्षन्ति। ईदृशो नु जीवनपद्धतेरुच्छ्रायः ? यदि मनोवाक्कायेषु वस्त्रगृहादिषु च शुद्धिं रक्षेयुः, यवागूप्रायमपि आहारं भगवते निवेद्य उपयुञ्जीरन्, परस्परं विनयवतीं गम्भीरां वृत्तिं वर्तेरन् स जीवनमार्गः श्रेष्ठः उत्तमः, इति अस्मत्पूर्वपुरुषसम्प्रदायसिद्धा स्थितिः। इदं यथा सर्वजनविदितं स्यात् तथा करणं अभिनन्दनीयम्।

---

3—6—55

'सिलोन्' इति प्रसिद्धे लङ्काद्वीपे कर्मोपजीविनः अस्मद्देशजना बहवः सन्ति। ते क्षेत्रादिकर्मकरणाय तेषां पितृपितामहकाले तत्र गताः। तमेव स्वं देशमेते मन्यन्ते। तद्देशीया एव भवितुमिच्छन्ति। तद्देशशासने स्थितास्तु तन्नेच्छन्ति। सर्वान् इमान् ततो निष्कासयितुमिच्छन्ति। तदर्थं तीव्रं प्रयत्नं कुर्वन्ति। ततो महती विप्रतिपत्तिः। वैमनस्यम्। कोपतापौ इत्यादि।

अस्मद्देशवत् सोऽपि अचिरादेव स्वातन्त्र्यमलभत। लब्धं स्वातन्त्र्यं प्रथमं तावत् भारतीयजनविद्रावण एवोपयोक्तुं तद्देशराज्याधिकारिणः प्रवृत्ताः। अद्यापि इयं दुरवस्था अनुवर्तते।

अधिकजनसत्त्वे योगक्षेमनिर्वाहे सङ्कटं भवति । तेनैव कारणेन तेषां ततो निर्गममपेक्षामह इति कारणं निर्दिशन्ति ।

अद्यावधि या स्थितिः तां तथैव अनुवर्तमानां अनुमत्य "इतःपरं तत्र केनापि अन्येन जनेन न प्रवेष्टव्यम्" इति चेद् ब्रयुः तत् न्याय्यम् । अत्र सम्प्रतिपन्ना एव अस्मदीया नेतारः । न तु एतावता लङ्कासितारः तृप्यन्ति । कुलपरम्परया तत्र उषितवतः अत एव इतःपरमपि तद्देशीयत्वेन तत्रैव वस्तुमिच्छतो जनान् यावच्छक्ति भूयिष्ठान् निर्गमयितुमीहन्ते ।

अधिकारबलेन तेषां मनोरथे सुसम्पन्नेऽपि कृतस्य अधर्मस्य फलतया जातेन प्रबलेन दैवकोपेन यदि दीर्घा अनावृष्टिर्भवेत् यदि प्रचण्डवातादिभिः सार्वत्रिकी अतिपीडा भवेत् तदा योगक्षेमनिर्वाहः कथं भवेदिति चिन्तयितुं बत तेषां बुद्धिसामग्री नास्ति ।

---

॥ श्रीः ॥

# उद्यानपत्रिका ॥

अष्टाविंशवर्ष-

# विषयसूची ॥

# UDYANA PATRIKA

[XXVIII Year]

## CONTENTS.

1 श्रीराघवेन्द्रचरितामृतम् । [K. L. Vyasaraya Sastri]
1, 17

2 वरदाभ्युदयचम्पूः । 1, 5, 21, 89, 61, 81, 101

3 मुकुन्दमाला । 9, 25, 43, 65, 85, 105
4 राष्ट्रभाषा । [Pandit Saptharishi Dikshitha] 11, 54
5 कश्चनज्योतिषकः । [Pandit V. Anantacharya] 15
6 प्रकृतिभेदः । 16, 96, 118
7 संस्कृतग्रन्थजातम् । 27, 45, 67
8 वैदिकाविशेषाः । [V. R. S. Tatacharya Siromani] 29, 47. 69. 87. 107
9 यथाभिमतम् । 31, 50, 71
10 वृद्धभाषितम् । 32, 109
11 पुस्तकपरामर्शः । 34, 55
12 कलिप्रादुर्भावम् । [Y. Mahalinga Sastri, M. A., B. L.] 35, 57, 77, 97, 117
13 प्रणयप्रवणौ । [Bhasa] 52, 74
14 लोकनीतिः । 55
15 महद्भयम् । 90
16 संस्कृतस्य पुनरुज्जीवनम् । 92, 118
17 वीरलब्धं पारितोषिकम् । [R. Ramamurti M. A.] 113
18 लोकवार्ता । 119
19 विषयसूची । 121
20 शास्त्रानुबन्धः—
श्रीगीतार्थदीपः । [८९—१३६]

---

994

VERIFIED 1985

VERIFIED 1989

VERIFIED-2001

Acc. No. 994

Call No. 178/28

Author

Title The Udyana Patrika